मतत्रयानुसारमानन्दमयाधिकरणस्य सविमर्शनमध्ययनम्

तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्य विध्यावारिधिः (Ph.D) इत्युपाध्यङ्गतया समर्प्यमाणः शोधप्रबन्धः

मार्गदर्शकः
प्रो. नरसिंहाचार्याः पुरोहितः
विभागाध्यक्षाः (द्वैतवेदान्तः)
तिरुपतिः

अनुसन्धाता
यम्. विद्यानिधिः

राष्ट्रियसंस्कृतविद्यापीठम्

(राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा ए+ श्रेण्यां प्रमाणितम्)

तिरुपतिः, आं.प्र

२०२०

मतत्रयानुसारमानन्दमयाधिकरणस्य सविमर्शनमध्ययनम्

तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्य विध्यावारिधिः (Ph.D) इत्युपाध्यङ्गतया रचयिष्यमाणस्य शोधप्रबन्धस्य संक्षिप्तिका

मार्गदर्शकः
प्रो. नरसिंहाचार्याः पुरोहितः
विभागाध्यक्षाः (द्वैतवेदान्तः)
तिरुपतिः

अनुसन्धाता
यम्. विद्यानिधिः

राष्ट्रियसंस्कृतविद्यापीठम्

(राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा ए+ श्रेण्यां प्रमाणितम्)

तिरुपतिः, आं.प्र

२०२०

आचार्यः नरसिंहाचार्यपुरोहितः
द्वैतवेदान्तविभागाध्यक्षः

राष्ट्रियसंस्कृतविद्यापीठम्
तिरुपति - ५१७०६४

प्रमाणपत्रम्

मतत्रयानुसारमानन्दमयाधिकरणस्य सविमर्शनमध्ययनम् इति शीर्षिकाङ्कितोयं शेधप्रबन्धः अयुष्मता एम्. विद्यानिधिनामकच्छात्रेण स्वबुद्ध्या महता श्रमेण च सर्वाः सामग्रीः सङ्कलय्य सुपरिशील्य यथा नियमं यथानुसन्धानप्रविधि च मदीये मार्गदर्शने निरमायि । एवं रूपेण सज्जीकृतोऽयं शेधप्रबन्धः तिरुपतिस्थराष्ट्रिय-संकृतविद्यपीठस्य विध्यावारिधि (द्वैतवेदान्तः) इत्युपाध्यङ्गतया सर्वथा समर्पणयोग्य इति प्रमाणयामि ।

स्थलम् -
दिनाङ्क -

आचार्यः नरसिंहाचार्यपुरोहितः
द्वैतवेदान्तविभागाध्यक्षः

प्रतिज्ञापत्रम्

''मतत्रयानुसारमानन्दमयाधिकरणस्य सविमर्शनमध्ययनम्'' इति शीर्षिकाङ्कितोऽयं शोधप्रबन्धः इतः पूर्वं कस्यापि उपाधेः प्राप्त्यर्थं कुत्रापि न समर्पितः।

राष्ट्रियसंस्कृतविद्यापीठस्य द्वैतवेदान्तविभागीयाचार्याणां नरसिंचार्यपुरोहित महाभागानां मार्गदर्शनेन अपेक्षिताः कृत्स्नाः सामग्रीः सम्पाद्य शोधप्रबन्धं निर्मीय विध्यावारिधि (द्वैतवेदान्तः) इत्युपाध्यर्थं समर्प्यत इति प्रतिजाने।

एम्. विद्यानिधिः

स्थलम् -

दिनाङ्कः-

अनुसन्धाता

कृतज्ञतानिवेदनम्

मतत्रयानुसारमानन्दमयाधिकरणस्य सविमर्शनमध्ययनम् । इति शीर्षिकोपेतः शोधप्रबन्धः गुरुदेवतानुग्रहवलेन समप्तिमगात् । आदौ ग्रन्थनिर्विघ्नतया परिसमाप्तिकारणीभूतस्य अनन्तकल्यणगुणमण्डितस्य,सर्वज्ञस्य, दोषदूरस्य, सकलवेदमुख्यवेद्यस्य,सर्वान्तर्यामिणः क्षेत्रेऽस्मिन् श्रीनिवासरुपेण स्थितस्य तदभिन्न मदिष्टदैवस्य मूलसीतासमेतमूलरामदिग्विजयरामलक्ष्मिनरसिंहात्मक अंभृणिपति-वेदव्यासात्मक श्रीकृणस्य चरणनलिनयोःग्रन्थोऽयं सभक्तिश्रद्धं सप्रमाणं समर्प्यते । तथा देशतः कालतश्च समानतया व्याप्तस्या नित्यमुक्तायाः,परमात्मनः हृत्कमलमध्यनिवासिन्याः श्रीमहालक्ष्म्याः चरणयोः सादरं प्रणमामि । जगत् गुरूणां श्रीमदानन्दतीर्थ श्रिमत् चरणानां चरणनलिनयोः सादरं प्रणमामि ।

समस्ततत्वाभिमानि देवातान् सादरं नमस्कारान् निवेदयामि । श्रीमत्परम-हंसपारिर्वाजकाचार्यणां, प्रातः स्मरणीयनां मम कुलगुरूणां श्रिमदुत्तरादिमठाधीशानां परमगुरूणां श्री १००८ श्री सत्यप्रमोदतीर्थकरकमलसंजातनां श्री १००८ श्री सत्यात्मतीर्थश्रीपादानां,भक्तिपूर्वकं साष्टांगप्रणमानि समर्पयामि । ब्रह्मविद्योपदेशकानाम् मम स्वरूपोद्धारकगुरुणां सत्यध्यानविद्यापीठकुलपतीनां महमहोपाध्याय, महाव्याप्रेति-बिरुदाङ्कितमहापुरुषान्वाये समुत्पन्नानां परमपूज्य माहुलि विद्यासिंहाचार्याणां चरणनलिनयोः प्रणामकुसुमाञ्जलिः सर्मप्यते । सत्यद्यानविद्यापिठस्य उपकुलपतिपदे स्थितानां पं पूज्य, विश्वप्रज्ञचर्याणं सादारं नमस्कारान् निवेदयामि ।

२०१५ ई वर्षमरव्ध मम शोधकार्ये पं पूज्य **नरसिंहाचार्यपुरोहित** महभागानां सहयोगन,तेषां मार्गदर्शनेन च अगतान् अनेकान् संशयान् परिहृत्य विध्यावारिधि इति श्रेष्ठं गम्यस्थानं प्राप्नोत इति समोदं निवेदयामि । **नरसिंहाचार्यपुरोहित** महाभागाः अस्मिन् शोधकार्ये मयि विशेषतः उत्साहं जनयित्वा योग्यवातवरणं निर्माय मां समुचितां वैदुष्यपूर्णां सहायतां प्रदाय अस्मिन् अनुसन्धनकार्ये विशेषोत्साहं समवर्धयन्तः पूज्य अचार्यवर्यान् अस्मिन् अवसरे मनः पूर्वाकधन्यवादान् निवेदायामि । अस्मिन् शोधकार्ये विशेषसहायं कृतवन्तः **डॉ नारायणाचार्यणां** धन्यवादान् ददामि । शेधकर्म कर्तुं अस्मिन् विद्यपीठे अवकाशं दत्तवद्भ्यः कुलाधिपतिभ्यो **डॉ. गोपालस्वामि महोदयेभ्यः**, एवमेव कुलपतिभ्य आचार्येभ्यः **विरिवेण्टि मुरलीधरशर्ममहोदयेभ्यः** कृतज्ञतां वितनोमि। एवमेव कुलसचिवेभ्य आचार्य **जि.यस्.आर्. कृष्णमूर्ति-महोदयेभ्यः** कृतज्ञतां वितनोमि। शैक्षिकसङ्कायप्रमुखेभ्यः आचार्य **आर्.यल्.एन्. सदाशिवमहोदयेभ्यः** दर्शनसङ्कायप्रमुखेभ्य आचार्य. **एम्.एल्.एन्.मूर्ति महोदयेभ्यः** अनुसन्धानविभागाध्यक्षेभ्य आचार्य. **कोराड सूर्यनारायणमहोदयेभ्य** कृतज्ञतां वितनोमि। शोधकार्यं सममनुष्ठातुं नामाङ्कनविधिद्वारअनुमतवद्भ्यः कुलसचिवचरेभ्यो कृतज्ञतपूर्वाकवन्दनानि समर्पयामि । मम शोधप्रबन्धस्य विशिष्टाद्वैतविषये उत्थितान् सकलान् संशयान् परिहरित्वा, विशेषसहायं कृतवद्भ्यः **डॉ. के.ई. देवनाथाचार्य** महभागेभ्यः अस्मिन् अवसरे सदारं कृतज्ञातां समर्पयामि । तथा विशिष्टाद्वैतसिद्धान्त संम्बन्धअनेकान् पुस्तकान् दत्वा विशेषसहायं कृतवद्भ्यः **डॉ. राघवाचार्य** महोदयेभ्यः नमस्कारान् निवेदयामि ।

अस्मिन् शोधकार्ये प्ररम्भादारभ्य इदानींतनपर्यन्तं तेषां गृहे मां आश्रयंदत्वा अन्नपानादिकं दत्वा तथा शोधकार्ये समुत्थितान् सकलसंशयान् अद्यन्तमपोह्य, टङ्कनकार्य-मपिकृतवतानामं बहूपकृतवतानामं पं पूज्य श्रीमतिसुप्रज्ञश्रीनिवासतीर्थाचार्यदम्पतीनां

विशेषतः नमस्सुमाञ्जलीं अविष्करोमि । मां विद्यापीठं प्रेषयित्वा मध्वशास्त्राध्यनं कारयित्वा अस्मिन् शेधकार्ये विशेषअशिर्वादान् दत्तवद्भ्यः मम पितरौ श्री माळिगि नर्मदाबाईपद्मनाभाचार्ययोः भक्तिपूर्वकनमस्कारान् वितनोमि । तथा अस्मिन् शोधकार्ये विशेष सहायं कृतवद्भ्यः मम भ्रातुः माळिगि श्रीमति भार्गाविभानुप्रकाश् तेषां नमस्कारान् ददामि । मम अर्धंगिनी अस्मिन् शोधकार्ये मां विशेतः प्रोत्साहयित्वा अस्य शोधकार्यस्य सकलविधानुकूलान् कृतवति श्रीमति माळिगि वेदवत्यै वेदोक्तार्शिवादान् ददामि । मम मित्रवर्येभ्यः पं अजयाचार्य,पं श्रीशाचार्य, पं प्रसन्नाचार्येभ्यश्च प्रणामाः विनिवेद्यन्ते । कृत विशेषसहायकेभ्यःजीवजि भनोजिराव्सवित्रिदेविभ्यां हर्दं धन्यवदान् वितनोमि । तथा अस्य पुस्तकस्य सुन्दरमुखचित्रं कृतवन्तः सिद्देशपवार् महोदयानमपि धन्यवादान् समर्पयामि ।

ब्रह्मात्मदासदास

एम् विद्यनिधिः
(शोधकर्ता)

सङ्केताक्षर सूची

ब्र.सू.	-	ब्रह्मसूत्रम्
अनु.व्या	-	अनुव्याख्यानम्
ब्र.सू.भा	-	ब्रह्मसूत्रभाष्यम्
न्या.सु	-	न्यायसुधा
ऐ.उ	-	ऐतरेयोपनिषत्
ता.च	-	तात्पर्यचन्द्रिका
च.प्र	-	चन्द्रिकाप्रकाशिका
छा.उ	-	छान्दोग्योपनिषत्
तै.उ	-	तैत्तिरीयोपनिषत्
बृ.उ	-	बृहदारण्यकोपनिषत्
भा. ग	-	भगवद्गीता
म.ना.उ.	-	महानारायणोपनिषत्
प.क.सू	-	परशुरामकल्पसूत्रम्
भा.ग	-	भागवतम्
तै.आ	-	तैत्तिरीयारण्यकम्

गी.भा	-	गीताभाष्यम्
श्वे.उ	-	श्वेताश्वेततरोपनिषत्
वि.पु	-	विष्णुपुराणम्
पा.सू	-	पिणिनिसूत्रम्
शा.दी	-	शास्त्रदीपिका
तै.सं	-	तैत्तिरीयसंहिता
आ.उ	-	आथर्वणोपनिषत्
तै.उ.भा	-	तैत्तिरीयोपनिषद्भाष्यम्

विषयानुक्रमणिका

प्रथमोऽध्यायः

द्वैतमतानुसारेण आनन्दमयाधिकरणस्य विचारः

द्वितीयोऽध्यायः

अद्वैतमतानुसारेण आनन्दमयाधिकरण विचारः

तृतीयोऽध्यायः

चतुर्थोऽध्यायः

आनन्दमयाधिकरणस्यअद्वैतपरव्याख्यानस्य विमर्शः

पञ्चमोऽध्यायः

विशिष्टाद्वैतमतोक्ताक्षेपपरिहारः

उपोद्घातः

द्वपरे सर्वत्र सज्जनेषु कालबलेन गैतमशापाच्च संदेहविपर्ययावृतनयनेषु सत्सु तान् भक्तजनान् उद्धर्तुं कृपालवः ब्रह्मरुद्रादयः श्रीमन्नारयणं शरणं ययुः । ब्रह्मादिदेवताः,भास्करः यथा स्वरश्मिभिः बाह्यान्धकारं निवर्तयति तथा त्वदीयज्ञानरश्मिभिः सज्जनेषु स्थिताज्ञानान्धकारं निर्वत्य ज्ञानमार्गं प्रकाशय इति प्रर्थयामासुः । ब्रह्मरुद्रादिभिः एवं प्रर्थितसन् भगवान् नारायणः पराशरत् सत्यवत्यां वेदव्यासरूपेण अवततार । प्रदुर्भूतः भगवान् व्यासः सांप्रदायपरंपराविच्छेदेन,अपपाठादिना तिरोहितान् वेदान् उज्जहार । चतुर्धा विभजच्च । वेदे न केवलं विष्णुप्रतिपादकवाक्यानि न सन्ति । अपि तु रमाब्रह्मरुद्रादिप्रतिपादकवाक्यानि सन्ति । अतः वेदः केवलविष्णुप्रतिपादकः इति वक्तुं न शक्यते । वस्तुतस्तु विष्णुरेव समस्तेन वेदेन परमुख्यवृत्या प्रतिपाद्यः । अतः तत् प्रतिपादनाय भगवान् व्यासः ब्रह्मसूत्रं चकार । 'ज्ञानेनैव परंपदम्' इत्युक्तानुसारेण ब्रह्मज्ञानेनैव मोक्षः इति ज्ञायते । तत्र ब्रह्मज्ञानार्थं तस्य जिज्ञासाकर्तव्या इति ज्ञापनार्थं ॐॐ अथतोब्रह्मजिज्ञास ॐ इति सूत्रं प्रवर्तितं । ब्रह्मजिज्ञासार्थं तस्य स्वरूपज्ञानं आवश्यकं भवति इति भगवता व्यासेन ॐ जन्माद्यस्य यतः ॐ इत्यत्र सृष्ट्यादिकर्तृत्वरूपब्रह्मणः स्वरुपं प्रतिपादितं । ननु चर्तुमुखब्रह्मद्याः सृष्टिकारः रुद्रः लयकारः इति युत्त्या साधयितुं शक्यत्वात् । अतः उक्त सृष्टादिकर्तृत्वं न परब्रह्मणः स्वरुपमिति चेत् । न । बहुश्रुतिविरोधात् । उक्तस्य अप्रामण्यं प्रसज्जेत । अतः सृष्ट्यादिकर्तृत्वं परब्रह्मणः स्वरुपमेव,तस्य विषये श्रुतिरुपप्रमाणानि ॐ शास्त्रयोनित्वात् ॐ इत्यत्रोपपादितः । रुद्रो वा वा लोकाधारः 'एकोरुद्रो नद्वितीयोयतास्थे'इत्यादिश्रुतिभिः रुद्रादेरपि सृष्ट्यादिकर्तृत्वं प्रतिपादायितुं शक्यते ।

अतः सृष्ट्यादिकर्तृत्वपरब्रह्मणः लक्षणं इति यदुक्तं तल्लक्षणातिव्याप्तम् इति शङ्कायां ॐ तत्तु समन्वयात् ॐ इतिसूत्रे उपक्रमादिलिङ्गैः ऋगादिसकालशास्त्रमुख्यप्रतिपादकत्वं ब्रह्मणः समर्थितम् । ब्रह्मणः ऋगादिसकालशास्त्रप्रतिपादकत्वं तदा भवति यदा येनकेनापि शब्देन वाच्यःस्यात् । न चैवम् । कुतश्चेत् । ब्रह्मणः शब्दवाच्यत्वाङ्गिकारे 'यतोवाचो निर्वतन्ते'इत्यदि श्रुति विरोधः स्यात् । इत्याशङ्कायां ॐ इक्षतेर्नाशब्दम् ॐ इति सूत्रे ईक्षणकर्तृत्वरुपहेतोः ब्रह्मणः सर्वशब्दवाच्यत्वं समर्थितम् । ननु यद्विषयकलक्षणप्रमाणानि सन्ति तदेव वस्तु इति कथ्यते । ब्रह्मविषयकसृष्ट्यादिकतृत्वरुपलक्षण,तद्विषयक प्रमाणनिरुपणात् अन्यत् किमपि वस्तुएव नास्ति। अतः ब्रह्मणः लक्षणज्ञानेनैव मोक्षः भवितुमर्हति । ततः किं अध्यायशेषेण इति प्राप्तस्याशङ्कानिवर्तयितुं उच्यते । यद्यपि लक्षण, प्रमाणात् अतिरिक्तवस्तु नास्ति । तथापि 'तत्तुसमन्वयात्' इत्यत्र शास्त्रब्रह्मणोः यत् प्रतिपाद्य-प्रतिपादकरुपसङ्गतिरस्तीति प्रतिज्ञातं तत् प्रपञ्चयति । ॐ आनन्द-मयोभ्यासात् ॐ इत्याराभ्य अध्यशेषेण । अतः सार्थकं भवति । प्रकृतानन्दमयाधिकरण-मधिकृत्य मतत्रयाभिप्रायं संक्षेपतः अनुवदामि ।

अद्वैतिभिः आनन्दमयः अवयवि जीवः । पुच्छतयोक्तावयवः ब्रह्मः इत्यङ्गीकरोति । अत्र ब्रह्म एव प्रधानतया प्रतिपाद्यः । कुतश्चेत् । 'ब्रह्मविदाप्नोतिपरम्' इति श्रुतौ ब्रह्मवित् स्वरूपानन्दरूपमोक्षं प्राप्नोति इत्युक्तं । ब्रह्मज्ञानाय ब्रह्मणः स्वरुपज्ञानमावश्यकं भवति । तत् 'सत्यंज्ञानमनन्तंब्रह्म' इत्यदि श्रुतिभिः समान्यतया व्याख्याय विशेषज्ञानार्थं 'तस्मद्वा एतस्मात्' इति श्रुतिः प्रवर्तते । तत्र 'तत्' शब्देन ब्रह्मवित् इत्याक्षिप्य,'एतत्' शब्देन सत्यज्ञानतयोपपादितं ब्रह्म अनूद्य 'आत्मनः' इति श्रुत्या ब्रह्मणः सह जीवाभेदमनुसन्धाय 'अन्नात् पुरुषः'इत्यन्तेन ब्रह्मणः सकलजगत्कारणत्वं उपपादयति । अपि च 'स वा एष' इत्यारभ्य 'ब्रह्मपुच्छंप्रतिष्ठा'इत्यन्तेन गुहानिहितत्वरूपब्रह्मणः स्वरूपं समर्थ्यते । ननु अवयवावयविरूपजीवेशभेदस्तु अनुभवसिद्धः । तत् कथं तयोः

अभेदः वक्तुं शक्यते इति चेन्न । अविद्यावशात् तयोः मध्ये औपाधिकभेदः प्रतीयते । अतः न क्वापि अनुपपत्तिः । तस्मात् आनन्दमयः जीवः तस्याधारत्वेन पुच्छतयोक्तब्रह्म स्वप्राधान्येन प्रतिपाद्यः।

विशिष्टाद्वैतिभिः आनन्दमयः परमात्मा । विज्ञानमयः जीवः ।अन्नमयादयः कोशाः इत्याङ्गिक्रियन्ते । तत्र 'ब्रह्मविदाप्नोतिपरम्' इति श्रुतौ यः ब्रह्मवित् तस्य मोक्षरुपफलं उक्तं । तमेव 'सत्यंज्ञानमनन्तंब्रह्म' इत्यदिश्रुतिभिः समान्यतया ब्रह्मणः स्वरुपं व्याख्याय 'तस्मद्वा एतस्मात्' इत्यारभ्य 'अन्नात् पुरुषः' इत्यन्तेन ब्रह्मत्वं प्रतिपादितं । ननु 'अन्नात् पुरुषः' इत्यत्र पुरुषशब्देनशरीरः वाच्यः । तत् कथं ब्रह्मपरत्वं उपपादयति इत्याशङ्कायां 'अन्नात् पुरुषः' इत्यत्र विद्यामानपुरुषशब्दः न शरीरः वाच्यः । किन्तु ब्रह्मैव । यतोहि ब्रह्मवत् तस्य शरीरस्यापि अप्रत्यक्षः । अतः पुरुषशब्दः न शरीरवाची । आनन्दमयः परमात्मा इति केन प्रमाणेन सिध्यति इति जिज्ञासायां 'आनन्दंब्रह्मणोविद्वान्' 'आनन्दो ब्रह्मेतिव्यजानात्' इत्यादि ब्रह्मशब्दाभ्यासात् आनन्दमयः परमात्मा इति उपपादयति । अतः सूत्रकारोऽपि 'आनन्दमयोभ्यासात्'इति सूत्रितवान् । द्वैतमते आनन्दमयः परामात्मा उपलक्षणतया अन्नमयादानामपि परब्रह्मत्वं अङ्गीक्रियन्ते । तत् कथं । ब्रह्मशब्दाभ्यासरूपतात्पर्यलिङ्गात् आनन्दमयस्य ब्रह्मत्वं साधायिष्यन्ति । ब्रह्मशब्दाभ्यासविषयकागमप्रमाणानि दर्शयन्ति । 'रसो वै सः रसह्येवायं लब्ध्वानन्दी भवति तदेव ब्रह्मपरमं कवीनाम्' 'एतमेव ब्रह्म इत्याचक्षते' 'असन्नेवसभवति' 'असद्ब्रह्मेतिवेदचेत्' 'आनन्दंब्रह्मणोविद्वान्' 'आनन्दो ब्रह्मे तिव्यजानात्' । इत्यादि श्रुतौ श्रुतब्रह्मशब्दाभ्यासात् आनन्दमयः ब्रह्म इति उपपादितः ।

अद्वैतमतानुसारेण आनन्दमयाधिकरणसारः

अद्वैतवादिभिः स्वसिद्धान्ते सकलवेदमीमांसाः जीवब्रह्मणोः ऐक्यं मुख्यतया

प्रतिपाद्यते इत्यङ्गीक्रियन्ते । ततश्च वेदार्थनिर्णायकसूत्राण्यपि तत्रैव तात्पर्यवन्ति इति मन्यन्ते । प्रकृतानन्दमयाधिकरणस्थसूत्राणाम् कथं जीवब्रह्मैक्यपरत्वं तैः साधितं इति किञ्चित् विचार्यते । अवयविरुपानन्दमयः जीवः आनन्दमयवाक्यस्थब्रह्मपुच्छंप्रतिष्ठा इति अवयवरूपब्रह्म आनन्दमयशब्देन लक्ष्यते । ब्रह्मपदस्यलक्षाण कुतः इति चेत् । ईक्षत्यधिकरणे समस्तवेदादिभिः परब्रह्म न वाच्यः किन्तु लक्ष्यः इत्यङ्गीकारात् । अत्र ब्रह्म आनन्दमयशब्देन लक्ष्यः । अत्राधिकरणे पुच्छतयोक्त ब्रह्म एव स्वप्राधान्येन प्रतिपादितः न तु आनन्दमयरूपजीवः । ब्रह्मशब्दाभ्यासात् ब्रह्मशब्दविषयकाभ्यासरूप-तात्पर्यलिंङ्गस्य विद्यमानात्वात् ।'असन्नेवसवति''असद्ब्रह्मेति वेदचेत्' इत्यादिश्रुतिभिः ब्रह्मणः एव केवलाभ्यास्यमानत्वात् ।

ननु आनन्दमयवाक्ये ब्रह्म आनन्दमयस्य अवयवत्वेन उक्तः । ततः कथं स एव स्वप्राधान्येन प्रतिपाद्यः इत्यतः उच्यते आनन्दमयः इत्यत्र मयट् प्रत्ययस्य विकारार्थः स्वीक्रियते । विकारार्थस्तु जीवे उपपद्यते । न तु ब्रह्मणि । यतः ब्रह्म निर्विकारः । तर्हि पुच्छशब्दस्य का गातिः चेत् पुच्छो नाम पुच्छवत् पुच्छप्रायम् इत्यङ्गीकुर्मः । अपि च आनन्दमयरूपजीवस्य लौकिकानन्दस्य आधारभूतः ब्रह्म इति 'प्रतिष्ठा' शब्देन कथ्यते । किञ्च 'इदंसर्वमसृजत्'इति जगत्सृष्ट्यादिकार्यहेतुत्वं ब्रह्मणः एव प्रतिपाद्यते । 'सत्यंज्ञानमन्तंब्रह्म'इत्यादि मन्त्रवर्णप्रतिपाद्यं ब्रह्मेव । ब्रह्मणवाक्यपि 'ब्रह्मपुच्छंप्रतिष्ठा' इति ब्रह्मैव स्वप्राधान्येन प्रतिपाद्यते । अपि च आनन्दमयोहि जीवः न तु ब्रह्मपुच्छं इति वाक्यघटकं ब्रह्म । यतो हि 'सोऽकामयत्'इत्यादि जगत्स्राष्ट्रत्वदिकं आनन्दमयरूपजीवे अनिपपत्तेः । 'रसोवै सहः रसह्येवायंलब्ध्वानन्दीभवति' इति आनन्दमयब्रह्मणोः भेदव्यपदेशात् आनन्दमयः

जीवः । ननु युक्त्या आनन्दमयः ब्रह्म इति साधयिष्यामः इति चेत् न । विकारार्थक मयट् प्रत्ययस्यविद्यमानात्वात् विकारार्थस्य जीवे उपपन्नत्वात् । अतः युक्त्या आनन्दमयस्य ब्रह्मत्वं साधयितुं न शक्यते । ननु भेदव्यपदेशाच्च इत्यत्र सगुणनिर्गुणयोः भेदः प्रतिपादितश्चेत् न । निर्गुणं ब्रह्मैव अत्र प्रतिपाद्यः । तथा च 'सएको' इत्युपसंहारवक्यानुसारेण पुच्छब्रह्मैव निर्गुणब्रह्म इति उपपादितं । लोके पुच्छशब्दः अवयावार्थेन प्रसिद्धः । अतः अनन्दमयावयवरूपब्रह्म कथं स्वप्राधान्येन प्रतिपाद्यः इतिचेत् उच्यते पुच्छशब्दः न अवयववाचि किन्तु लाङ्गुलवाचि । अनन्दमयस्य लाङ्गुलं नास्ति तस्य गवादि लक्षणत्वात् । अतः पुच्छशब्दस्य मुख्यार्थत्वासंम्बवात् योग्यतवशाच्च आधारइत्यर्थे लक्षणा । अतः न अवयवत्व विरोधः । अपि च पुच्छब्रह्मविषये अभ्यासस्यविद्यमानत्वात् पुच्छब्रह्मैव स्वप्राधान्यतया आनन्दमय शब्देन लक्ष्यते । अतः आनन्दमयः जीवः तस्याधरत्वेन पुच्छब्रह्म स्वप्राधान्येन-प्रतिपाद्यते ।

विशिष्टाद्वैतमतानुसारेण आनन्दमायाधिकरणसारः

विशिष्टाद्वैतिभिः आनन्दमयः परमात्मा, विज्ञानमयः जीवः, अन्नमय, प्रणमय,मनोमयाः कोशाः इति अङ्गीक्रियन्ते । आनन्दमयाधिकरणे प्रकृतआनन्दमयः परमात्माएव कुतः श्चेत् । ब्रह्मशब्दाभ्यासात् । 'ते ये शतं प्रजापतेरानन्दाः स एको ब्रह्मण आनन्दाः' 'यतोवाचोनिवर्तन्ते अप्राप्यमनसा सह आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन' इत्यादि श्रुतौ श्रूयमाणब्रह्मशब्दाभ्यासात् आनन्दमयः परमात्मा

एव इति सिध्यति । 'स वा एषपुरुषोन्नरसमयः' इति विकारार्थक मयट्प्रत्यय-श्रवणात् आनन्दमयस्यऽपि विकारार्थत्वं प्रतीयते । अतः आनन्दमयः न परमात्मा इति चेत् । उच्यते । मयट् प्रत्ययस्य प्राचुर्यार्थमपि वक्तुं शक्यते । 'तस्माद्वाएतस्मादात्मन आकाश सम्भूतः' इत्यत्र प्रकृत आत्मशब्दात् अविकारित्वं ज्ञायते । आकाशकारणतया प्रतिपादितात्मा अविकारित्वात् । अतः मयटः विकारार्थकासम्भवात् प्राचुर्यार्थकः मयट् इति सिध्यति । तथा च आनन्दप्राचुर्यात् आनन्दमयः परब्रह्मैव इति ज्ञायते । अपि च 'एष ह्येवानन्दयाती'इति जीवान् प्रति आनन्दहेतुत्वं आनन्दमयस्य प्रतिपादकत्वात् आनन्दमयः परमात्मैव । 'सत्यंज्ञानमन्तंब्रह्म' 'तस्मद्वाएतस्मात्' इत्यादि मन्त्रवर्णोदितः परमात्मैव । ननु मन्त्रवर्णोदितः जीवः इति चेत् । न । 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मण विपश्चित' इति श्रुतौ ब्रह्मणः सर्वज्ञत्वं प्रतिपादितमस्ति । तदृशसर्वज्ञत्वं बद्धस्य जीवस्य,मुक्तस्यऽपि अविद्यमानत्वात् मन्त्रवर्णोदितः आनन्दमयः परब्रह्मैव । 'तस्मद्वाएतस्मात् विज्ञानमयात् अन्योऽन्तर आत्म आनन्दमयः' इत्यत्र विज्ञानमयरूप जीवात् भेदः आनन्दमयस्य व्यपदिश्यते । 'सोऽकामयत्' इत्यारभ्य 'इदसर्वमसजत्' इत्यन्तं कामदेव जगत्सर्गादिकं श्रवणात् आनन्दमयस्य जगत्सृष्ट्यादिकार्ये न अनुमानगम्यप्रकृत्यपेक्षा प्रतीयते । अतः कथं आनन्दमयः परमात्मा । 'रसोवै सहः रसह्येवायंलब्ध्वानन्दीभवति' इत्यस्मिन् आनन्दमये रसशब्दनिर्देशं प्रतिपाद्या अयं शब्दनिर्दिष्टस्य आनन्दमययोगमुक्तं । जीवस्ययल्लाभाय आनन्दमययोगः प्राप्तः तत् तस्मात् अन्यः इति सिद्धति । अतः

आनन्दमयः परमात्मा, विज्ञानमयः जीवः,अन्नमय,प्रणमय,मनोमयाः कोशाः इति सिद्धान्तितं ।

द्वैतमतानुसारेण आनन्दमयाधिकरणसारः

अत्राधिकरणे अन्नमयादिपञ्चकस्य विष्णुत्वे साध्ये ब्रह्मशब्दाभ्यासरूपहेतुः उदिमस्ति । विकारार्थकमयट् प्रत्ययान्तान्नमयादिशब्दवाच्यत्वं कथं निर्विकारस्य विष्णोः इत्याशङ्क्य मयटः प्रचुर्यार्थत्वोक्त्य तन्निराकरिष्यते । आनन्दमयस्यविष्णुत्वे लोकचेष्टकत्वरूपहेतुव्यपदेशात् लक्षणा उक्तं भवति । ननु तस्य विकारशब्दात् इत्येतदानन्तर्यं कथं इति चेत् । 'कोह्येवान्यात्कः प्राण्यत्' इति हेतुव्यपदेशाद-काशाख्यानन्दमयस्य पूर्णानन्दत्वे तत् संवादेनानन्दमयगतमयट् ः प्रचुर्यार्थत्वे सिद्धे तत्प्रायपठितान्नमयादिशब्दगतमयटमपि प्रचुर्यार्थत्वमङ्गीकार्यमिति पूर्वोक्तमयटोऽपि प्रचुर्यार्थत्वे एतत्सूत्रोक्तहेतुव्यपदेशस्य हेतुत्वात् । अन्नमयादिपञ्चकस्य विष्णुत्वे अवयवत्वोक्ति विरोधपरिहाराय मन्त्रवर्णसमाख्यारुपहेतुक्तिः । स्वपक्षसादनान्तरं परपक्षप्रतिक्षेपः इति प्रतिज्ञापूर्वकं मान्त्रवर्णिकसूत्रसिद्धान्नमयादिरुपपञ्चकनिष्ठायाः मोक्षजनकज्ञनविषयरूपहेतुः उक्तमस्ति । तेषामेवानन्दमयत्वनिरासे तेषां ततो भेदः प्रतिपादितं । ननु अस्य नेतरोऽनुपपत्तेः इत्येतदान्तर्यम् कथं इति चेत् । विरिञ्चादीनामानन्दमयत्वाभवे तेषां ततो भेदव्यपदेशस्यहेतुत्वकथानात् पूर्वसूत्रक्तमोक्षजनकज्ञानविषयत्वस्य जीवब्रह्मणोरभेदेन ब्रह्मस्वरूपाभेदस्य विरिञ्चादि जीवसमूहस्यऽपि सम्ववति इत्याङ्कानिरासहेतुत्वेन जीवब्रह्मणोः भेदव्यपदेशस्य

कथितमस्ति । अतएव सुधायां उपनिषदर्थानवबोधदित्यादिन जीवब्रह्मणोरभेदेन स्वरूपापेक्षयामोक्षजनकज्ञानविषयत्वस्यापि सम्भवः इत्याशङ्कनिरासहेतुत्वेन एतत् सूत्रक्तभेदव्यपदेशो व्याख्यातः ।

भेदव्यपदेशविरोधकाभेदसाधकानुमानस्याभ्यासोक्तिः। अनुपपत्तिभेदव्यपदेशाभ्यां पूर्वपक्ष्यभिप्रेतानां विरिञ्चदीनां सर्वेषामन्नमयादिपञ्चरूपकामगामित्वोक्तिः अनुव्याख्यानोक्तरीत्यानुपपत्या दूषितस्यापि शरीरादिकोशा एवान्नमयादिशब्दवाच्या इति पक्षस्य विशेषदूषणाभिधानेन निराकरणम्। भाष्यदिशा तु भेदव्यपदेशस्यानुमानविरोधाभावेऽपि तस्य सांसारिकभेदपरत्वेन पारमार्थिकाभेदविरोधित्वाभावात्, विरिञ्चादीनामानन्दमयत्वनिरासे कथं स हेतुरित्याशङ्कापरिहारार्थं तद्भेदस्य पारमार्थिकत्वसिध्यर्थं मोक्षेऽति तदुक्तिः।

अत्राद्वैतोक्तस्य विमर्शः

आनन्दमयः जीवः न ब्रह्म। कुतः श्रुतिविरोधात्। का सा श्रुतिः कथं विरोधः इति चेत् उच्यते 'तस्यप्रियमेव शिरः मोदोदक्षिणपक्षः, प्रमोद उत्तर पक्षः, आनन्दआत्मा, ब्रह्मपुच्छं प्रतिष्ठा' इति श्रुतौ ब्रह्म आनन्दमयस्य पुच्छतयोक्तं। अतः आनन्दमयः अवयवि ब्रह्म तु अवयवः इति श्रूयते। लोके अवयवावयविनोः भेदः अनुभवसिद्धः। अतः आनन्दमयः न ब्रह्म किन्तु जीवः। आनन्दमयरूपजीवस्य अधारः ब्रह्म इति श्रुत्या प्रतिपाद्यते। इति अद्वैतिनां अभिप्रायः।

अत्र विषये द्वैतीनां अभिप्रायः एवं विद्यते। आनन्दमयस्य ब्रह्मत्वे अवयव अवयविविरोधः उक्तः तत् परिहराय पुच्छति (१)किं अवयवस्य पूर्णत्वे अवयविनः पूर्णत्वं न सम्भवति इति (२) किं वा आनन्दमयस्य अवयविनः पूर्णत्वे तदवयवस्य पूर्णत्वाभावः (३) अथवा अवयवावयविनोः भेदात् अवयवः परमात्मत्वे अवयवि न परमात्मा भवति इत्यभिप्रायेणानन्दमयस्य ब्रह्मत्वं नङ्गीक्रियते। इति विकल्प्य सामादधति (१) आद्यस्यसमाधानमाहुः यदा अवयवः ब्रह्म स्यात् तदा अवयवि अनायासेन ब्रह्मता स्यात्। यतो हि अवयवापेक्षयावयविनः महत्वं लोके दृष्टं। अतः अवयवपूर्णत्वे अवयविनोऽपि पूर्णत्वं विज्ञायते। (२) द्वितीयं समाधत्ते-यथा अवयविनः मूलनारायणस्य पूर्णत्वं। तथा तदवयवकृष्णकेशावतारस्यकृष्णस्यऽपि पूर्णत्वं पुरुणेषु प्रसिद्धं। तथा च अवयविनः पूर्णत्वे अवयवस्यऽपि पूर्णत्वविषये किमपि बाधकं नास्ति। तत् केन प्रमाणात् अवगम्यते इति चेत् 'द्यावापृथिव्योरिदमन्तरंहि व्याप्तं त्वयैकेन दिशाश्चसर्वा' इति गीतोक्तश्लोके अवयवावतारस्यकृष्णस्य पूर्णत्वं ज्ञातुं शक्यते। ननु लोके अवयवस्य परिच्छिन्नत्वं दृष्टं। तत् कथं अवयवावतारस्य कृष्णस्याऽपि पूर्णत्वं वक्तुं शक्यते इत्यतः आह तत् परमेश्वरस्याघटितघटकतया सर्वत्राप्रतिबद्धया शक्त्या अन्यत्रादृष्टमपि घटते। (३) तृतीय विकल्पस्य समाधानं एवमहुः अत्राऽपि अघटितघटना समार्थ्यात् अवयवावयविनोः पूर्णत्वं उपपद्यते। अतः आनन्दमयः न जीवः किन्तु ब्रह्मैव इति द्वैतिनां अभिप्रायः।

अत्र विशिष्टाद्वैतमतोक्तस्य विमर्शः

विशिष्टाद्वैतवादिनः आनन्दमयः ब्रह्म अन्नमय-प्रणमय-मनोमयाः कोशाः

विज्ञानमयः जीवः इत्यभिप्रेयन्ति। विज्ञानमयः जीवः कथं ? इत्यतः आह - 'विज्ञानं यज्ञं तनुते कर्माणि तनुतेपि च' इत्यत्र यज्ञकर्तृत्वं विज्ञानमयस्य श्रूयते। तत् यज्ञकर्तृत्वं लोके जीवे प्रसिद्धः। अतएव उत्तरवाक्ये 'विज्ञानं च अविज्ञानं च' इति विज्ञानशब्देन तद्गुणं चेतनं वदति। अपि च अन्योन्तरात्माऽनन्दमयः इति श्रुत्यनुसारात् अन्यः अर्थात् जीवादन्यः अन्तरात्मा अर्थात् जीवान्तर्यामि आनन्दमयः इति आन्दमयः एव परमात्मा, विज्ञानयः जीवः इति समर्थ्यते। इति विशिष्टाद्वैतीनां अभिप्रायः।

अत्र विषये द्वैतीनां एवमभिप्रायः विद्यते। यथा आनन्दमयस्य ब्रह्मत्वविषये ब्रह्मशब्दाभ्यासस्य प्रमाणत्वेन उक्त्वा आनन्दमयस्य ब्रह्मत्वं साधयिष्यति भवद्भिः। तथा विज्ञामयेऽपि ब्रह्मशब्दाभ्यासस्य विद्यमानत्वात् विज्ञानमयोऽपि ब्रह्म एव इति उच्यते, 'विज्ञानं ब्रह्म चेद्वेद' 'विज्ञानं देवा सर्वे ब्रह्मज्येष्ठमुपासते' इत्यादि श्रुतिभिः ब्रह्मशब्दाभ्यासात्, सर्वदेवज्येष्ठोपसकत्वादि हेतुभिः विज्ञानमयः ब्रह्म इति विज्ञायते। यज्ञकर्तृत्वादिकं तु सर्वकर्तृत्वात् ब्रह्मणः उपपद्यते। 'यज्ञभृद्यज्ञकृत्' इत्यत्र 'यज्ञकृत्' इति यज्ञकर्तृत्वस्यापि ब्रह्मणः श्रुतत्वात्। अतः विज्ञानमयः ब्रह्म इति द्वैतिनां अभिप्रायः।

मङ्गळाचरणम्

श्रियःपत्ये नित्यागणितगुणमाणिक्यविशदप्रभाजालोल्लासोपहतसकलावद्यतसे ।
जगज्जन्मस्थेमप्रलयरचनाशीलवपुषे नमोअशेषाम्नामयस्मृतिहृदयदीप्ताय हरये ।।
येन प्रदुरभावि भूमिवलये व्यस्तारि गोसन्ततिः प्राबोधि श्रुतिपङ्कजं करुणया प्राकाशि तत्वं परम् ।
ध्वान्तं ध्वंसमनायि साधुनिकरश्चाकारि सन्मार्गगस्तेन व्यासदिवाकरेण सततं मा त्याजि मे मानसम् ।।
नारायणं निखिलपूर्णगुणैकदेहं निर्दोषमाप्यतममप्यखिलैः सुवाक्यैः ।
अस्योद्भवादिदमशेषविशेषतोपि वन्द्यं सदा प्रियतमं मम सन्नमामि ।।
अशेषवाक्जाड्यमलापहन्त्रि नवंनवं स्पष्टसुवाक्प्रदायिनि ।
ममेहजिह्वाग्रसुरङ्गनर्तकि भवप्रसन्नवदनेच मे श्रीः ।।
व्याप्तिर्यस्य निजे निजेन मनसा पक्षे सपक्षे स्तिथिर्व्यावृत्तिश्च विपक्षोतोथविषये सर्क्तिनैव बाधिते ।
नैवास्ति प्रतिपक्षयुक्तिरतुलं शुद्धं प्रमाणं स मे भूयात् तत्वविनिर्णयाय भगवान् आनन्दतीर्थो मुनिः ।।
भवति यदनुभावादेडमूकोपि वाग्मि जडमतिरपि जन्तुर्जायते प्राज्ञमौलिः ।
सकलवचनचेतोदेवता भारती सा मम वचसि निद्धत्तां सन्निधिं मानसे च ।।
नमोस्तु तात्विकादेवाः विष्णुभक्तिपरायणाः ।
धर्ममार्गे प्रेरयन्तु भवन्त सर्वएवहि ।

वक्रतुण्ड माहाकाय कोटिसूर्यसमप्रभ ।
निर्विन्घं कुरु मे देव सर्वकार्येषु सर्वदा ।।
रमानिवासोचितवासभूमिः सन्यरत्नावलिजन्मभूमिः ।
वैराग्यभाग्यो मम पद्मनाभतीर्थामृताब्धिर्भवताद् विभूत्यै ।।
पदवाक्यप्रमणज्ञान् प्रतिवादिमदच्छिदः ।
श्रीमदक्षोभ्यतीर्थाख्यानुपतिष्ठे गुरून् मम ।।
श्रीमदानन्दतीर्थार्यसन्मनः सरसीभूवि ।
अनुव्याख्याननलिनेचञ्चरीकति मे मनः ।।
न शव्दब्धौ गढाः नच निगमचर्चासु चतुरा ।
नच न्याये प्रौढा नच विदितवेद्या अपि वयम् ।।
परं श्रीमत्पूर्णप्रमतिगुरुकारुण्यसरणिं ।
प्रपन्ना मान्याः स्मः किमपि च वदन्तो अपि महताम् ।।
यस्य वाक् कामधेनुर्नः कामितार्थान् प्रयच्छति ।
सेवे तं जययोगीन्द्रं कामबाणच्छिदं साद ।।
अर्थिकल्पित कल्पोयं प्रत्यर्थिगजकेसरि ।
व्यासतीर्थ गुरुर्भूयात् अस्मदिष्टार्थ सिद्दये ।।
भावावोधकृतं सेवे रघूत्तम महागुरुम् ।
यच्छिष्यशिष्यशिष्याद्याः टिप्पण्याचार्य संज्ञिताः ।।
पूज्याय राघवेन्द्राय सत्यधर्मरताय च ।
भजतां कल्पवृक्षाय नमतां कामधेनवे ।।
विद्यायांविभुदाचार्यं वेदज्ञानाब्धिचन्दिरम् ।
दुर्मतध्वान्तमार्ताण्डं सत्यध्यानमुनिंभजे।।

सत्याभिज्ञकराब्जोथान् पश्चाशद्वर्षपूजकान् ।
सत्यप्रमोदतीर्थार्यान् नौमिन्यासुधारथान् ।।
बन्दुस्त्वं गुरुरिष्टदैवतमिति त्वत्पादपंकेरुहं।
प्राप्तं माम् परिपालयेति सततं याचेनिबधान्जलिः ।।
चित्तं मद्गुणदोणचिन्तविदौनुनङमनाङमाकृताः।
श्रीसत्यात्मगुरो त्वदग्रयुगलं हत्वनमे सद्गतिः ।।
वेदेशमुनिसत्पाद सेवासम्प्रार्थवैभवान् ।
यादवार्यान् वरसुधा टीकाकारन् वयं नुमः ।।
विद्यापीठविधातारं विद्यावरिधिचन्दिरम् ।
विद्यार्थिवत्सलं वन्दे महमहिसद्गुरुम् ।।
यैरहं शुकवत् सम्यक् शिक्षितोस्मि कृपालुभिः ।
तान् वन्दे ज्ञानपश्चास्यान् वन्दे विद्यगुरुन् मम ।।

मतत्रयानुसारमानन्दमयाधिकरणस्य सविमर्शनमध्ययनम्

तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्य विध्यावारिधिः (Ph.D)
इत्युपाध्यङ्गतया समर्प्यमाणः शोधप्रबन्धः

मार्गदर्शकः
प्रो. नरसिंहाचार्याः पुरोहितः
विभागाध्यक्षाः (द्वैतवेदान्तः)
तिरुपतिः

अनुसन्धाता
यम्. विद्यानिधिः

राष्ट्रियसंस्कृतविद्यापीठम्

(राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा ए+ श्रेण्यां प्रमाणितम्)

तिरुपतिः, आं.प्र

२०२०

आचार्यः नरसिंहाचार्यपुरोहितः
द्वैतवेदान्तविभागाध्यक्षः

राष्ट्रियसंस्कृतविद्यापीठम्
तिरुपति - ५१७०६४

प्रमाणपत्रम्

मतत्रयानुसारमानन्दमयाधिकरणस्य सविमर्शनमध्ययनम् इति शीर्षिकाङ्कितोयं शेधप्रबन्धः अयुष्मता एम्. विद्यानिधिनामकच्छात्रेण स्वबुद्ध्या महता श्रमेण च सर्वाः सामग्रीः सङ्कलय्य सुपरिशील्य यथा नियमं यथानुसन्धानप्रविधि च मदीये मार्गदर्शने निरमायि । एवं रूपेण सज्जीकृतोऽयं शेधप्रबन्धः तिरुपतिस्थराष्ट्रिय-संकृतविद्यपीठस्य विध्यावारिधि (द्वैतवेदान्तः) इत्युपाध्यङ्गतया सर्वथा समर्पणयोग्य इति प्रमाणयामि ।

स्थलम् -
दिनाङ्क -

आचार्यः नरसिंहाचार्यपुरोहितः
द्वैतवेदान्तविभागाध्यक्षः

प्रतिज्ञापत्रम्

‘‘मतत्रयानुसारमानन्दमयाधिकरणस्य सविमर्शनमध्ययनम्’’ इति शीर्षिकाङ्कितोऽयं शोधप्रबन्धः इतः पूर्वं कस्यापि उपाधेः प्राप्त्यर्थं कुत्रापि न समर्पितः।

राष्ट्रियसंस्कृतविद्यापीठस्य द्वैतवेदान्तविभागीयाचार्याणां नरसिंचार्यपुरोहित महाभागानां मार्गदर्शनेन अपेक्षिताः कृत्स्नाः सामग्रीः सम्पाद्य शोधप्रबन्धं निर्मीय विध्यावारिधि (द्वैतवेदान्तः) इत्युपाध्यर्थं समर्प्यत इति प्रतिजाने।

एम्. विद्यानिधिः

स्थलम् -

दिनाङ्कः-

अनुसन्धाता

कृतज्ञतानिवेदनम्

मतत्रयानुसारमानन्दमयाधिकरणस्य सविमर्शनमध्ययनम् । इति शीर्षिकोपेतः शोधप्रबन्धः गुरुदेवतानुग्रहवलेन समप्तिमगात् । आदौ ग्रन्थनिर्विघ्नतया परिसमाप्तिकारणीभूतस्य अनन्तकल्यणगुणमण्डितस्य,सर्वज्ञस्य, दोषदूरस्य, सकलवेदमुख्यवेद्यस्य,सर्वान्तर्यामिणः क्षेत्रेऽस्मिन् श्रीनिवासरुपेण स्थितस्य तदभिन्न मदिष्टदैवस्य मूलसीतासमेतमूलरामदिग्विजयरामलक्ष्मिनरसिंहात्मक अंभृणिपति-वेदव्यासात्मक श्रीकृणस्य चरणनलिनयोःग्रन्थोऽयं सभक्तिश्रद्धं सप्रमाणं समर्प्यते । तथा देशतः कालतश्च समानतया व्याप्तस्या नित्यमुक्तायाः,परमात्मनः हृत्कमलमद्यनिवासिन्याः श्रीमहालक्ष्म्याः चरणयोः सादरं प्रणमामि । जगत् गुरूणां श्रीमदानन्दतीर्थ श्रिमत् चरणानां चरणनलिनयोः सादरं प्रणमामि ।

समस्ततत्वाभिमानि देवातान् सादरं नमस्कारान् निवेदयामि । श्रीमत्परम-हंसपारिर्वाजकाचार्यणां, प्रातः स्मरणीयनां मम कुलगुरूणां श्रिमदुत्तरादिमठाधीशानां परमगुरूणां श्री १००८ श्री सत्यप्रमोदतीर्थकरकमलसंजातनां श्री १००८ श्री सत्यात्मतीर्थश्रीपादानां,भक्तिपूर्वकं साष्टांगप्रणमानि समर्पयामि । ब्रह्मविद्योपदेशकानाम् मम स्वरूपोद्धारकगुरुणां सत्यध्यानविद्यापीठकुलपतीनां महमहोपाध्याय, महाव्याग्रेति-बिरुदाङ्कितमहापुरुषान्वाये समुत्पन्नानां परमपूज्य माहुलि विद्यासिंहाचार्याणां चरणनलिनयोः प्रणामकुसुमाञ्जलिः सर्मप्यते । सत्यद्यानविद्यापिठस्य उपकुलपतिपदे स्थितानां पं पूज्य, विश्वप्रज्ञचर्याणं सादारं नमस्कारान् निवेदयामि ।

२०१५ ई वर्षमरव्ध मम शोधकार्ये पं पूज्य **नरसिंहाचार्यपुरोहित** महभागानां सहयोगन,तेषां मार्गदर्शनेन च अगतान् अनेकान् संशयान् परिहृत्य विध्यावारिधि इति श्रेष्ठं गम्यस्थानं प्राप्नोत इति समोदं निवेदयामि । **नरसिंहाचार्यपुरोहित** महाभागाः अस्मिन् शोधकार्ये मयि विशेषतः उत्साहं जनयित्वा योग्यवातवरणं निर्माय मां समुचितां वैदुष्यपूर्णां सहायतां प्रदाय अस्मिन् अनुसन्धनकार्ये विशेषोत्साहं समवर्धयन्तः पूज्य अचार्यवर्यान् अस्मिन् अवसरे मनः पूर्वाकधन्यवादान् निवेदायामि । अस्मिन् शोधकार्ये विशेषसहायं कृतवन्तः **डॉ नारायणाचार्यणां** धन्यवादान् ददामि । शेधकर्म कर्तुं अस्मिन् विद्यपीठे अवकाशं दत्तवद्भ्यः कुलाधिपतिभ्यो **डॉ. गोपालस्वामि महोदयेभ्यः**, एवमेव कुलपतिभ्य आचार्येभ्यः **विरिवेष्टि मुरलीधरशर्ममहोदयेभ्यः** कृतज्ञतां वितनोमि। एवमेव कुलसचिवेभ्य आचार्य **जि.यस्.आर्. कृष्णमूर्ति-महोदयेभ्यः** कृतज्ञतां वितनोमि। शैक्षिकसङ्कायप्रमुखेभ्यः आचार्य **आर्.यल्.एन्. सदाशिवमहोदयेभ्यः** दर्शनसङ्कायप्रमुखेभ्य आचार्य. **एम्.एल्.एन्.मूर्ति महोदयेभ्यः** अनुसन्धानविभागाध्यक्षेभ्य आचार्य. **कोराड सूर्यनारायणमहोदयेभ्य** कृतज्ञतां वितनोमि। शोधकार्यं सममनुष्ठातुं नामाङ्कनविधिद्वारअनुमतवद्भ्यः कुलसचिवचरेभ्यो कृतज्ञतपूर्वाकवन्दनानि समर्पयामि । मम शोधप्रबन्धस्य विशिष्टाद्वैतविषये उत्थितान् सकलान् संशयान् परिहरित्वा, विशेषसहायं कृतवद्भ्यः **डॉ. के.ई. देवनाथाचार्य** महभागेभ्यः अस्मिन् अवसरे सदारं कृतज्ञातां समर्पयामि । तथा विशिष्टाद्वैतसिद्धान्त संम्बन्धअनेकान् पुस्तकान् दत्वा विशेषसहायं कृतवद्भ्यः **डॉ. राघवाचार्य** महोदयेभ्यः नमस्कारान् निवेदयामि ।

अस्मिन् शोधकार्ये प्ररम्भादारभ्य इदानींतनपर्यन्तं तेषां गृहे मां आश्रयंदत्वा अन्नपानादिकं दत्वा तथा शोधकार्ये समुत्थितान् सकलसंशयान् अद्यन्तमपोह्य, टङ्कनकार्य-मपिकृतवतानामं बहूपकृतवतानामं पं पूज्य श्रीमतिसुप्रज्ञश्रीनिवासतीर्थाचार्यदम्पतीनां

विशेषतः नमस्सुमाञ्जलीं अविष्करोमि । मां विद्यापीठं प्रेषयित्वा मध्वशास्त्राध्यनं कारयित्वा अस्मिन् शेधकार्ये विशेषअशिर्वादान् दत्तवद्भ्यः मम पितरौ श्री माळिगि नर्मदाबाईपद्मनाभाचार्ययोः भक्तिपूर्वकनमस्कारान् वितनोमि । तथा अस्मिन् शोधकार्ये विशेष सहायं कृतवद्भ्यः मम भ्रातुः माळिगि श्रीमति भार्गाविभानुप्रकाश् तेषां नमस्कारान् ददामि । मम अर्धंगिनी अस्मिन् शोधकार्ये मां विशेतः प्रोत्साहयित्वा अस्य शोधकार्यस्य सकलविधानुकूलान् कृतवति श्रीमति माळिगि वेदवत्यै वेदोक्ताशिर्वादान् ददामि । मम मित्रवर्येभ्यः पं अजयाचार्य,पं श्रीशाचार्य, पं प्रसन्नाचार्येभ्यश्च प्रणामाः विनिवेद्यन्ते । कृत विशेषसहायकेभ्यःजीवजि भनोजिराव्सवित्रिदेविभ्यां हर्दं धन्यवदान् वितनोमि । तथा अस्य पुस्तकस्य सुन्दरमुखचित्रं कृतवन्तः सिद्देशपवार् महोदयानमपि धन्यवादान् समर्पयामि ।

ब्रह्मात्मदासदास

एम् विद्यनिधिः
(शोधकर्ता)

विषयानुक्रमणिका

प्रथमोऽध्यायः

द्वितीयोऽध्यायः

अद्वैतमतानुसारेण आनन्दमयाधिकरण विचारः

तृतीयोऽध्यायः

विशिष्टाद्वैतमतरीत्यआनन्दमयाधिकरणस्य विचारः

चतुर्थोऽध्यायः

आनन्दमयाधिकरणस्यअद्वैतपरव्याख्यानस्य विमर्शः

पञ्चमोऽध्यायः

विशिष्टाद्वैतमतोक्ताक्षेपपरिहारः

।। द्वैतमतानुसारेण आनन्दमयाधिकरणम् ।।

'[1]अथातो ब्रह्मजिज्ञासा' इति यस्य ब्रह्मणो जिज्ञासा विषयादिमत्वेन कर्तव्यत्वेन उपपादितमस्ति । तादृशब्रह्मस्वरूपं '[2]जन्माद्यस्य यतः', '[3]शास्त्रयोनित्वात्' इति सूत्रद्वयेन लक्षणप्रमाणाभ्यां स्वेतरसमस्तवस्तुव्यावृत्ततया निर्धारितमस्ति लक्षणप्रमाणाभ्यां वस्तुनिरूपणमेव विचारापरपर्यायं जिज्ञासा इति उच्यते । एतदतिरिक्ता जिज्ञासा नास्ति । शास्त्ररूपप्रमाणस्य रुद्राद्यन्य-परत्वशङ्कया लक्षणस्यातिव्याप्तिः समन्वयसूत्रेण समाहिता । ब्रह्मणश्च सकलशास्त्रप्रमाणसिद्धत्वविषये असम्भावनाशङ्का ईक्षत्यधिकरणे दूषितास्ति । तेन सकलशास्त्रप्रमाणसिद्धत्वसम्भवनया परिहृतः। सम्भावना च उक्ता भवति ।

प्रश्नः– सम्भावना नाम ऊहः । अन्यतरकोटिप्रापकप्राचुर्यनिमित्तः अन्यतरकोटिप्रधानः संशयरूपः, तच्च च अयथार्थज्ञानरूपः, अत एव अप्रमाणमस्ति। कथं वस्तुनिश्चये उपयोगो भवति इति चेत्।

उत्तरम्– यदा असम्भावनया समीचीनयोरपि लक्षणप्रमाणयोः तदभावत्वशङ्का भवति । तदा प्रवृत्तसङ्कोचः सम्भवति । तन्निरासाय सम्भावना उपयुज्यते । अतः युक्ता एव ईक्षत्यधिकरणे असम्भावना निरासः ।

---

१. ब्र.सू.१.१.१

२. ब्र.सू.१.१.२

३. ब्र.सू.१.१.३

प्रश्नः– तर्हि भगवता बादरायणेन किमानन्दमयोऽभ्यासादित्यादिना अध्यायशेषेन निरूप्यते ?

उत्तरम्– '[१]तत्तु समन्वयात्' इति सूत्रेण यः समन्वयः प्रतिज्ञातः तदेव '[२]आनन्दमयोऽभ्यासात्' इत्यादिना समग्रेन अध्यायशेषेण प्रायेण समर्थ्यते । उदाहरणत्वेन वाक्यविशेषानुपादाय विमर्शपूर्वकं पूर्वोत्तरपक्षोपालम्भसाधनाभ्यां सविस्तारं निरूप्यते । यद्येवं न क्रियते तदा समन्वयसूत्रेण समन्वस्य उक्तत्वेपि अनुक्तप्रायमेव भवति । कुतः इति चेत् परोपि अन्यदेव जिज्ञास्यं समन्वयादिति उक्त्वा स्वमतं साधयति । अतः तन्निवारणार्थं उर्वरिताध्यायस्यावश्यकता अस्तीति सार्थकं आचार्यबादरायणानां कृतिः ।

प्रश्नः– ननु प्रायेण अध्यायशेषेण समर्थ्यते इति कुतः उच्यते ? समग्रेण अध्यायेन समर्थ्यते इति कुतः नोच्यते ?

उत्तरम्– देवताधिकरणे तथा अपशूद्राधिकरणे समन्वयः न प्रतिपाद्यते । प्रसङ्गवशेन देवानां वेदविद्यासु अधिकारः देवताधिकरणे समर्थितः । अपशूद्राधिकरणे त्रैवर्णिकानामेव वेदविद्यासु अधिकारः उपपादितमस्ति । अतः भाष्यकारैः प्रायेण इति उक्तम् ।

तथा च समन्वयाधिकरणप्रतिज्ञातस्यैव अध्यायशेषेण सोदाहरणं करणात् समन्वयसूत्रेणाध्यायशेषस्य प्रपञ्च्यप्रपञ्चकभावरूपसङ्गतिः ।

---

१. ब्र.सू् १.१.४.

२. ब्र.सू.१.१.१२

पादभेदसमर्थनम् - शब्दानां वैविध्यनिरूपणम्- पादचतुष्टयविषयाः

समग्राध्यायशेषेण समन्वयप्रतिपादनात् एकवाक्यत्वमस्ति । तथापि पादभेदः किं निबन्धनः इति चेत् । वैदिकाः शब्दाः चतुर्विधाः सन्ति । तथाहि–

१. ब्रह्मण्येव प्रसिद्धाः तत्र प्रसिद्धा इति वाच्याः ।

२. अन्यत्र प्रसिद्धाः

३. उभयत्र प्रसिद्धाः

४. अन्यत्रैव प्रसिद्धाः । इति ।

उपर्युक्ताः सर्वेपि पुनः द्विविधाः शब्दाः सन्ति । १. नामात्मकशब्दाः २. लिङ्गात्मकाः शब्दा इति ।

तत्र साक्षाद्धर्मिवाचिनः शब्दाः नामात्मकाः । धर्मद्वारा धर्मिणि वर्तमानाः शब्दाः लिङ्गात्मकाः शब्दाः ।

पूर्वोक्तषु चतुर्विधशब्देषु ब्रह्मण्येव प्रसिद्धशब्दानां समन्वयकथन-स्यआवश्यकता नास्ति । विवादाभावात् । अतः अवशिष्टेषु अन्यत्र प्रसिद्ध-नामात्कशब्दसमन्वयः प्रथमे पादे समर्थ्यते । अन्यत्रप्रसिद्धलिङ्गात्मक-शब्दसमन्वयः द्वितीये पादे क्रियते । उभयत्र प्रसिद्धनामात्मकलिङ्गात्मक-शब्दसमन्वयः तृतीये पादे समर्थ्यते । अन्यत्रैव प्रसिद्धनामात्कलिङ्गात्मकशब्दानां समन्वयः चतुर्थे पादे क्रियते इति पादचतुष्टयेषु निरूपितविषयाः ।

।। अष्टसूत्रप्रयोजनम् ।।

प्रश्नः– ननु प्रथमाध्यायस्य प्रथमपादे सप्ताधिकरणानि समन्वय-प्रपञ्चार्थानि सन्ति । अनेन सप्तानां शब्दानां एव ब्रह्मणि समन्वयः सिद्ध्यति । अतः अन्यत्र प्रसिद्धानां नामात्मकानां सर्वशब्दानां समन्वयः अस्मिन् पादे कथं भवति ? एवं सप्तशब्दानामेव समन्वयप्रतिपादने समन्वयसूत्रेणैवालं किं अधिकरणान्तरेण प्रयोजनम् ?

उत्तरम्– सूत्रकारः एकैकस्मिन् अधिकरणे समानन्यायानामनेक-शब्दराशीनां निर्णयं करोति । एवं स्थिते वाक्यविशेषग्रहणं पूर्वपक्षविशेषोपादानं तथा सिद्धान्तप्रमाणविशेषस्वीकारश्च चोदाहरणार्थत्वं भवति । प्रत्येकं प्रतिवाक्यं निर्णयं क्रियते चेत् शास्त्रस्य समाप्तिरेव न भवति । सूत्राणां अनेकाशाखनिर्णाय-कत्वरूपविश्वतोमुखत्वं लक्षणं शास्त्रकारैः अङ्गीक्रियते । यदि एकस्मिन् अधिकरणे एकमेव शब्दः समन्वीयते तदा सूत्रलक्षणं न घटेत । अतः तत्परिहाराय समानन्यायविषयाणां अनेकशब्दानां समन्वयः क्रियते इत्येव अङ्गीकर्तव्यम् ।

प्रश्नः– समानन्यायविषयत्वं नाम किम् ?

उत्तरम्– समानन्यायविषयत्वं सूत्रघटकपदप्रत्यायितन्यायसञ्चारविषयत्व-मित्यर्थः ।

प्रश्नः– यदि समानन्यायविषयाणां एकस्मिन् अधिकरणे समन्वयः तर्हि सप्ताधिकरणसद्भावात् तत्र समन्वेतव्यानां शब्दानां अवच्छेदोपाधयः वाच्याः। अवच्छेदोपाधिः नाम का ? अस्य अधिकरणस्य उपाधिः का ?

उत्तरम्– अवच्छेदकोपाधिः नाम सङ्ग्राहकासाधारणधर्माः इत्यर्थः। अवच्छेदोपाधिः नाम अधिकरणान्तरसमन्वेतव्यशब्दव्यावृत्तप्रकृतनयसमन्वेतव्याखिलशब्दवृत्तिधर्माः इत्यर्थः। आनन्दमयाधिकरणस्य अवच्छेदकोपाधिस्तु गुणिसामान्यवाचकशब्दत्वं तथा गुणसामान्यवाचिशब्दत्वम्। समन्वयस्तु इत्थं– अधिकरणान्तरं आकाशाधिकरणं तस्मिन् समन्वेतव्यशब्दाः अधिभूतवाचिशब्दाः तेभ्यः व्यावृत्तं भिन्नं, प्रकृतनयः आनन्दमयाधिकरणं अस्मिन् समन्वेतव्याखिलशब्दाः अन्नमयादिशब्दाः अन्नादिशब्दाः तेषु वर्तमानाः धर्माः अन्नमयादिषु गुणिसामान्यवाचित्वं तथा अन्नादिषु गुणसामान्यवाचित्वम्। इति लक्षणसमन्वयः सम्भवति। अत्र अधिकरणसमन्वेतव्यशब्दव्यावृत्तमिति प्रकृतसमन्वेतव्याखिलशब्दस्य विशेषणम्।

प्रश्नः– १.आनन्दमयादिशब्दानां कथं गुणिसामान्यवाचित्वं तथा अन्यत्र प्रसिद्धत्वम् ?

२.आनन्दादिशब्दानां कथं गुणसामान्यवाचित्वं तथा अन्यत्र प्रसिद्धत्वम् ?

उत्तरम्– १.आनन्दमयादिशब्दा हि गुणिसामान्यं वदन्ति । यथा शतक्रत्वादि-शब्देभ्य शचीपतिः शताश्वमेधकर्ता प्रतीयते तथा आनन्दमयादि-शब्देभ्यः गुणिविशेषस्य प्रतीतिः नास्ति । अतः गुणिसामान्यवाचिनः इत्युच्यन्ते । आनन्दमयादिशब्दाः विकारार्थकमयट्प्रत्ययेन ब्रह्मणः उपस्थितिं न जनयन्ति । ब्रह्मणः अन्यगुणिसामान्योपस्थापकत्वात् अन्यत्र प्रसिद्धशब्दाः इत्युच्यन्ते ।

२. आनन्दादयः गुणवाचिनः इति प्रसिद्धाः । ते गुणिनि ब्रह्मणि वर्तितुं नार्हन्ति । अतः अन्यत्र प्रसिद्धाः इत्युच्यन्ते ।

अत्र आनन्दादयः गुणवाचकाः इति अङ्गीकृत्य उक्तम् । भाष्यकारास्तु 'प्राप्यत्वेन मयट्प्रोक्तेः न तत्राप्यन्यदुच्यते' इति अनुव्याख्याने आनन्दादीनां नामैकदेशग्रहणन्यायेन गुणिवाचित्वमपि अङ्गीकुर्वन्ति ।

प्रश्नः– गुणवाचिनां शब्दानां ब्रह्मणि वृत्तिः अङ्गीक्रियते चेत् तर्हि तयोरैक्यं स्यात् । तथा च आनन्दज्ञानादिशब्दानां पर्यायत्वं स्यात्, आनन्द-ज्ञानादिसाङ्कर्यं गुणस्य गुणिना साङ्कर्यं स्यात् ।

उत्तरम्– गुणगुणिनोरभेदस्तु अहिकुण्डलाधिकरण एव साक्षात् सूत्रकृता वक्ष्यते । अभेदेऽपि आनन्दादीनां पर्यायत्वाभावः, गुणगुणिव्यवहारनिर्वाहः, शब्दादिसाङ्कर्याभावश्चः विशेषसमर्थनपूर्वकं, विशेषबलात् भविष्यतीति तत्रैव सप्रमाणं समर्थ्यते ।

।। सङ्गतिकथनम् ।।

समन्वयाधिकरणेन समग्राध्यायस्य प्रपञ्च्यप्रपञ्चकभावसङ्गतिरिति निरूपितम्।

प्रथमाध्यायस्य समन्वयाध्यायत्वात्, तस्मिन् आनन्दमयाधिकरणे अन्नमयादिशब्दानां ब्रह्मणि समन्वयसमर्थनात् शास्त्राध्यायसङ्गती भवतः। तथा च शास्त्रेण अध्यायेन च अस्यानन्दमयाधिकरणस्य अन्तर्भावलक्षणासङ्गतिः।

प्रथमाध्यायस्य प्रथमपादे लोकतः अन्यत्र प्रसिद्धनामात्कशब्दसमन्वयः क्रियते इति पूर्वं निरूपितम् । अत्र आनन्दमयाधिकरणे गुणिसामान्यवाच्यन्न-मयादिशब्दानां गुणसामान्यवाच्यान्नादिशब्दानां परब्रह्मणि विष्णौ समन्वयोप-पादनात् पादसङ्गतिः ।

पूर्वाधिकरणेन अस्याधिकरणस्य सङ्गतिः अधिकरणसङ्गतिः । पूर्वाधिकरणो-पात्तश्रुतिभ्यः एतदधिकरणोपात्तश्रुतेः सङ्गतिः श्रुतिसङ्गतिः ।

।। आनन्दमयाधिकरणस्य जिज्ञासाधिकरणेन सङ्गतिः।।

'ॐ [१]अथातो ब्रह्मजिज्ञासा ॐ' इति प्रथमसूत्रे विषयादिनिरूपणेन ब्रह्मजिज्ञासा कर्तव्या इति समर्थितम् । तद् ब्रह्म '[२]ब्रह्म पुच्छं प्रतिष्ठा' इत्यानन्दमयावयवं इति प्रतीयते । अवयविजिज्ञासां त्यक्त्वा केवलावयवजिज्ञासा

---

१. ब्र.सू.१.१.१

२. तै.उ.११.४

न युक्त इत्यतः इदमधिकरणमारभ्यते इति भाष्यकाराः आनन्दतीर्थभगवत्पादाचार्याः निरूपयामासुः । एवं च आद्याधिकरणेन तद्विषयवाक्येन 'तद्विजिज्ञासस्व' इत्यनेन अस्य अधिकरणस्य आक्षेपिकी सङ्गतिः । अस्याः लक्षणं तु 'पूर्वमाक्षिप्यते यत्र तत्र साक्षेपकी मता' इति । पूर्वाधिकरणसिद्धं प्रमेयं यत्र यस्मिन्नधिकरणे आक्षिप्यते तत्र तस्मिन्नधिकरणे पूर्वाधिकरणेन सा सङ्गतिः आक्षेपकी मता अभिमता अभियुक्तैः इत्यर्थः ।

।। आनन्दमयाधिकरणस्य ईक्षत्यधिकरणेन सङ्गतिः ।।

इयं सङ्गतिः अव्यवहितपूर्वाधिकरणेनैवेति नियमः नास्ति । तथापि आनन्दमयाधिकरणस्य ईक्षत्यधिकरणेन वक्तुं शक्यते । तथाहि– पूर्वाधिकरणस्थ '[१]तन्निष्ठस्य मोक्षोपदेशात्' इति सूत्रोक्तमोक्षजनकज्ञानविषयत्वस्यात्र '[२]नेतरोऽनुपपत्तेः' इति सूत्रेण परपक्षप्रतिक्षेपहेतुत्वेन उपपादानात् अव्यवहितपूर्वाधिकरणसङ्गतिः इति द्रष्टव्या ।

।। श्रुतिसङ्गतिः - आनन्दमयस्य विष्णुत्वसमर्थनावश्यकता ।।

आनन्दमयस्य विष्णुत्वसमर्थने श्रुत्यधिकरणसङ्गती इत्थं वर्तेते । 'ॐ अथातो ब्रह्मजिज्ञसा ॐ' इति प्रथमसूत्रे ब्रह्मणो जिज्ञासा कर्तव्यतया प्रतिपादिता । तच्च ब्रह्म तैत्तिरीयश्रुतावानन्दमयस्य पुच्छाख्यावयवरूपं प्रतीयते । '[३]तस्माद्वा एतस्माद्विज्ञानमयात् अन्योऽन्तर आत्मानन्दमयः । तेनैष पूर्णः । स वा एष

१. ब्र.सू.१.१.७ २. ब्र.सू.१.१.११ ३. तै.उ.२.६

पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य प्रियमेव शिरः । मोदो दक्षिणः पक्षः । प्रमोद उत्तरः पक्षः । आनन्द आत्मा । ब्रह्म पुच्छं प्रतिष्ठा ।' इति । अतः सङ्गतिसद्भावादानन्दमयस्य ब्रह्मत्वमत्र समर्थ्यते इति भावः ।

श्रुत्यर्थस्तु– तेन आनन्दमयेन **एषः** विज्ञानमयो निश्छिद्रतया **पूर्णः** । **स एष** आनन्दमयः **पुरुषविधः** पुरुषाकार एव । **तस्य** आनन्दमयस्य **पुरुषविधातां अनु** पुरुषाकारतानुसारेण **अयं** विज्ञानमयः **पुरुषविधः** पुरुषाकारः तस्मादुद्भूतः । **तस्य** आनन्दमयस्य उपकारजं सुखं **प्रियं** प्रियनामकं शिरः । तस्य आनन्दमयस्य दर्शनोत्थः दर्शनजन्यं सुखं **मोदः** मोदनामकं **दक्षिणः पक्षः** दक्षिणभुजः । आनन्दमयस्य भोगोत्थः विषयभोगजन्यं प्रकृष्टं सुखं **प्रमोदः** प्रमोदनामकं **उत्तरः पक्षः** वामभुजः । आनन्दमयस्य स्वरूपभूतः **आनन्दः आत्मा** मध्यदेहः । यद्यपि प्रियादिनामकसुखानां ब्रह्मणः भेदः सुप्रसिद्धः तथापि तत्तत्प्रवर्तकतया भगवतः अवयवानां तत्तद्व्यपदेशः इति श्रुत्यभिप्रायः ।

प्रश्नः– ब्रह्म आनन्दमयस्य अवयवः इति ब्रह्मणः आनन्दमयत्वोक्तिः श्रुतौ श्रूयते । अवयवावयविनोः भेदः लोके प्रसिद्धः । अतः किमर्थमानन्दमयस्य विष्णुत्वसमर्थनं क्रियते ?

उत्तरम्– यद्यानन्दमयो ब्रह्मणोऽन्यस्तदा ब्रह्मजिज्ञासा न सम्भवति ।

अवयविन एवानन्दमयस्य जिज्ञास्यत्वप्राप्तेः । अवयविजिज्ञासां विना अवयवमात्रजिज्ञासायोगात् । श्रुत्युक्ता ब्रह्मजिज्ञासा त्यक्तुं शक्यते । अत आनन्दमयस्य विष्णोरन्यत्वे ब्रह्मजिज्ञासा न सम्भवति । तस्मात् ब्रह्मजिज्ञासा-सिद्ध्यर्थमानन्दमयोऽभ्यासादित्यानन्दमयस्य विष्णुत्वं सूत्रकार प्रतिपादयति ।

।। आनन्दमयाधिकरणविषयनिरूपणं - आनन्दमयादिशब्दाः सिद्धान्ते कीदृशाः शब्दाः ।।

अस्मिन्नधिकरणे आनन्दमयः अन्नमयादिश्च विषयः । सिद्धान्तरीत्या अन्नमयादिशब्दपञ्चकं अन्नादिशब्दपञ्चकं योगरूढाः । सिद्धान्तकथनावसरे तेषां व्युत्पत्तिप्रदर्शनपूर्वकं यौगिकत्वं समर्थ्यते । लौकिकरूढ्यभावेपि अन्नमयादीनां अन्नादीनां च विद्वद्रूढिः अस्त्येव । 'सा योगादेव लभ्यते' इति कथयता भगवता भाष्यकारेण अनुव्याख्याने आनन्दमयाधिकरणान्ते उपपादितम् । अस्य अर्थस्तु सा विद्वद्रूढिः योगं अविहायैव लभ्यते इति । एवं च यत्र यत्र विद्वद्रूढिः तत्र तत्र योगः इति व्याप्तिः अस्ति ।

।। आनन्दमयाधिकरणसंशयनिरूपणं च ।।

तैत्तिरीयके '[१]स वा एष पुरुषोऽन्नरसमयः' इत्यादिना अन्नमयप्राणमय-मनोमयविज्ञानमयानन्दमया पठ्यन्ते । तत्र संशयः किमेतेऽन्नमयादय परमात्मैव,

१. तै.उ.४.१

उत तदन्य कश्चिदिति । अत्र सन्देहबीजस्तु सर्वत्र अन्नमयप्राणमयमनोमय-विज्ञानमयानन्दमयप्रकरणेषु ब्रह्मपदश्रवणात् तस्य च विष्णावन्यत्र प्रयोगात् ।

।। तदर्थचिन्ता ।।

अत्रान्नमयादिपञ्चकं किं जीवादिरुत विष्णुरिति चिन्ता ।

तदर्थं '[१]येऽन्नं ब्रह्म' इत्याद्यन्नमयादिविषयश्लोकस्थाः ब्रह्मशब्दा किं अमुख्यवृत्त्या जीवादिविषया उत मुख्यवृत्त्या विष्णुविषया इति ।

तदर्थं ब्रह्मशब्दस्य मुख्यवृत्त्यङ्गीकारे बाधकमस्त्युत नास्तीति ।

तदर्थं 'मयट्' प्रत्ययः, अन्योन्तर आत्मा इत्यन्यान्तरशब्दाः, '[२]ब्रह्म पुच्छं प्रतिष्ठा' इति ब्रह्मण आनन्दमयावयवत्वोक्तिः, अन्नमये '[३]तस्येदं' इति प्रत्यक्षनिर्देशश्च इत्येतत् किं विकारभेदाद्यर्थकं उत प्राचुर्यविशेषाद्यर्थकमिति ।

तदर्थं हेतुव्यपदेशभृगुवल्लीसमाख्या मन्त्रवर्णसमाख्या चेति स्वपक्ष-साधकम्, अनुपपत्तिः भेदव्यपदेशः अन्नमयादिप्राप्तेः फलत्वकथनं चेति परपक्षबाधकं च किं सावकाशं उत निरवकाशमिति ।

।। पूर्वपक्षे फलफलिभावः ।।

हेतुव्यपदेशभृगुवल्लीसमाख्या मन्त्रवर्णसमाख्या चेति स्वपक्षसाधकम्,

---

१. तै.उ.५.४
२. तै.उ.११.४
३. तै.उ.४.२

अनुपपत्तिः भेदव्यपदेशः अन्नमयादिप्राप्तेः फलत्वकथनं चेति परपक्षबाधकं च सावकाशं चेत् तदा

'मयट्' प्रत्ययः, अन्योन्तर आत्मा इत्यन्यान्तरशब्दाः, '[१]ब्रह्म पुच्छं प्रतिष्ठा' इति ब्रह्मण आनन्दमयावयवत्वोक्तिः, अन्नमये '[२]तस्येदं' इति प्रत्यक्षनिर्देशश्च इत्येतत् विकाराभेदाद्यर्थकं स्यात्

ततश्च ब्रह्मशब्दस्य मुख्यवृत्त्यङ्गीकारे बाधकं भवति,

'[३]येऽन्नं ब्रह्म' इत्याद्यन्नमयादिविषयश्लोकस्थाः ब्रह्मशब्दा अमुख्यवृत्त्या जीवादिविषया भवन्ति

तथा च अन्नमयादयःजीवादयः इति सिद्ध्यति ।

।। सिद्धान्ते फलफलिभावः ।।

हेतुव्यपदेशभृगुवल्लीसमाख्या मन्त्रवर्णसमाख्या चेति स्वपक्षसाधकम्, अनुपपत्तिः भेदव्यपदेशः अन्नमयादिप्राप्तेः फलत्वकथनं चेति परपक्षबाधकं च निरवकाशं चेत् तदा

'मयट्' प्रत्ययः, अन्योन्तर आत्मा इत्यन्यान्तरशब्दाः, '[४]ब्रह्म पुच्छं प्रतिष्ठा' इति ब्रह्मण आनन्दमयावयवत्वोक्तिः, अन्नमये '[५]तस्येदं' इति

१. तै.उ. ११.४.
२. तै.उ. ४.२
३. तै.उ. ५.४
४. तै.उ.११.४
५. तै.उ.४.२

प्रत्यक्षनिर्देशश्च इत्येतत् प्राचुर्यविशेषाद्यर्थकं स्यात्

ततश्च ब्रह्मशब्दस्य मुख्यवृत्त्यङ्गीकारे बाधकं न भवति,

'[1]येऽन्नं ब्रह्म' इत्याद्यन्नमयादिविषयश्लोकस्थाः ब्रह्मशब्दा मुख्यवृत्त्या विष्णुविषया भवन्ति

तथा च अन्नमयादयः विष्णु इति सिद्ध्यति ।

।। आनन्दमयाधिकरणपूर्वपक्षसिद्धान्तौ ।।

तत्र प्रथमं पूर्वपक्षस्तु इत्थं भवति । अन्य एवान्नमयादिशब्दार्थ इति । कुतः? अन्नमयादिशब्दा अन्नविकारवाचिनः । मयट्प्रत्ययस्य विकारार्थेऽनु-शासनात् । '[2]मयड्वैतयोः भाषायामभक्ष्याच्छादनयोः' प्रकृतिमात्रात् मयड् वा स्यात् विकारावयवयोः इति हि अस्यार्थः । यद्यपि भाषायां विकारार्थे मयट् इत्येव श्रूयते वेदे वैदिके विकारार्थे मयड्विधानं नास्ति । अतः कथं अनेन मयड्प्राप्तिः इति चेत् '[3]द्व्यचश्छन्दसि' विकारार्थे मयड् स्यात् । इत्यनेन वेदेपि विकारार्थे मयड् भवति । विकारस्य च शरीरादिकोशेषु सम्भवात् ।

अतः अन्नमयादिशब्दाः सर्वविकारात्मकत्वेन **प्रकृतौ** उपपद्यते । '[4]मम योनिर्महद् ब्रह्म' इत्यत्र चित्प्रकृतौ ब्रह्मशब्दप्रयोगः दृश्यते । तदभिमन्यमानत्वात्

१. तै.उ ५.४
२. पा.सू.१५२३
३. पा.सू.३४५३
४. भा.गी.१२.३

जडप्रकृतिरपि ब्रह्मशब्दवाच्या भवति । बहुभवनाच्च अचित्प्रकृतेः आनन्दमयत्वं युज्यते ।

अथवा सर्वविकारप्रकृत्यभिमानित्वात् **चित्प्रकृतिः रमापि** ब्रह्म वाच्या भवति । प्रमाणं तु 'मम योनिर्महद् ब्रह्म' इति । कथं चित्प्रकृतिः इति निर्णयः इति चेत् । 'सोऽकामयत । बहु स्याम्' इत्यानन्दमयस्य बहुभावः श्रुतौ उच्यते । विकाराभिमानित्वात् प्रकृतेः ब्रह्मशब्दवाच्यत्वं उपपद्यते ।

अथवा **जीवाः** वा अन्नमयादिशब्दवाच्याः भवन्ति । कथं जीवेषु एतत् सम्भवति इति चेत् जीवानां वा विकाराभिमानित्वात् । गौर श्याम इत्यादिवत् । गौरशरीराभिमानिनि श्यामशरीराभिमानिनि देवदत्ते गौरः श्यामो वा देवदत्तः इति तदभिमानिनि तच्छब्दः प्रयुज्यते । तद्वत् विकाराभिमानिनि जीवे अन्नमयादिशब्दाः प्रयुज्यते । तथा 'ब्रह्माणि जीवा सर्वेपि' इति जीवेषु ब्रह्मशब्दप्रयोगः वर्तते एव । 'बृह जातिजीवकमलासनशब्दराशिषु' इति धातुव्याख्यानस्य सद्भावात् ब्रह्मशब्दः जीववाची भवति । ननु धातुः क्रियावाची कथं क्रियवन्तं बोधयति । सत्यं धातोः क्रियोपलक्षणत्वेन बृहतेः जात्याद्यर्थकत्वं युक्तमेव ।

अधिष्ठातृणां **ब्रह्मादिदेवानां** वा वाचकाः अन्नमयादयः सम्भवति । अशनिरिन्द्र इतिवत् । अशनिप्रेरकः इन्द्रः इति वक्तव्ये तत्प्रेरके तच्छब्दः जनैः व्यवह्रियते ।

हिरण्यगर्भो वा आनन्दमयः भवितुमर्हति । आनन्दमयमधिकृत्य 'अस्ति ब्रह्मेति चेद्वेद' इति श्रुतिः वर्तते । श्रुतौ हिरण्यगर्भनिष्ठब्रह्मशब्दश्रवणात् तस्याऽऽनन्दमयत्वं युज्यते । ब्रह्मशब्दस्यान्यत्रापि वृत्तेः कथं तेन चतुर्मुख-ब्रह्मत्वनिश्चय इति चेत् हिरण्यगर्भे विद्यमानेन आनन्दमयशब्दसमानार्थकेन शतानन्दनाम्ना विरिञ्चस्य प्राप्तिः भवति ।

रुद्रस्य वाऽऽनन्दमयत्वप्राप्तिः । 'यश्चासावादित्ये' इत्यानन्दमयस्य सूर्ये स्थितत्वमुपनिषदि उक्तम् । सूर्यादयः अष्टौ हि रुद्रस्य प्रतिमाः सन्ति । तथाच विष्णुपुराणे ।

सूर्यो जलं मही वह्निर्वायुराकाशमेव च ।

दीक्षितो ब्राह्मणः सोम इत्येतास्तनवः क्रमात् ।। इति ।

इन्द्रबृहस्पत्यादीनामपि सूर्याद् उत्तमतया तन्नियामकतया तस्मिन् तैः स्थीयते । अतः तेऽपि आनन्दमयत्वशब्देन बुद्धौ उपस्थिताः भवन्ति ।

ब्रह्मशब्दस्य जीवप्रकृतिहिरण्यगर्भरुद्रेन्द्रबृहस्पतिसाधारण्यात् कथं अयमेव ब्रह्मशब्दवाच्यः इति निश्चीयते इति चेत्। अन्नरसमयः प्राणमय इत्युक्तान्न-मयादीनामन्नादिविकाराभिमानित्वेन जीवत्वमेव वक्तुं युज्यते । तत्प्राय-पठितानन्दमयत्वेऽपि जीवानां प्राप्तेः । यद्यपि ब्रह्मशब्देन विष्णोरप्यस्ति प्राप्तिस्तथापि नासावानन्दमयः । '[१]ब्रह्म पुच्छं प्रतिष्ठा' इति विष्णोरानन्द-मयावयत्वोक्तेः । तस्य चाऽऽनन्दमयत्वे तदवयवत्वविरोधात् ।

१.तै.उ.११.४

विकारत्वं परस्य ब्रह्मणः न सम्भवति । 'निर्विकारोऽक्षर शुद्धः' इत्यादिप्रमाणै ब्रह्मणः निर्विकारत्वं प्रतिपादनात् । यद्यपि विकार इव प्राचुर्येऽपि मयट्प्रत्ययोऽस्ति । तथाऽप्यन्नमयशब्दः तावद् विकारार्थोऽङ्गीकर्तुं योग्यः वर्तते । कुतः इति चेत् '१ओषधीभ्योऽन्नम्। अन्नात् पुरुषः' इत्योषधिजनितान्नविकारं पुरुषशब्दाभिधेयं शरीरं प्रकृत्य '२स वा एष पुरुषोऽन्नरसमयः' इति श्रुतौ निरूपणात् । '३तस्येदमेव शिरः' इत्यपरोक्षतया शरीरनिर्देशात् । तथा च अन्नमयादिषु विकारार्थकमयट्प्रत्यय इति आनन्दमयशब्दे प्राचुर्यार्थक इति द्वैविध्यकल्पनाप्रसङ्गात् सर्वत्र विकारार्थ एवाङ्गीकार्यः ।

यद्यपि अन्नमयादिशब्दवाच्यशरीरादिप्रेरकत्वेन तदधिष्ठातृत्वेन ब्रह्म अन्नमयशब्दवाच्यः अस्तु इति शक्यते वक्तुं तथापि तस्य '४अन्योऽन्तर आत्मा' अन्नमयादीनां ब्रह्मत्वे स्वस्यैव स्वस्मात् अन्यत्वं कदापि न घटते । अतः तत्प्रेरके तच्छब्दः इति न्यायेन अन्नमयादिशब्दवाच्यं ब्रह्मणि नोपपद्यते ।

विकाराभिमानित्वात् ब्रह्म अन्नमयादिशब्दवाच्यः इत्यपि वक्तुं न शक्यते । ब्रह्मणः निरभिमानित्वात् । अभिमानादिदोषगन्धोऽपि परमशुद्धे ब्रह्मणि न सम्भवति ।

---

१. तै.उ. ३.३.
२. तै.उ. ४.१
३. तै.उ. ३.२
४. तै.उ. ६.२

किञ्चान्नमयादय पञ्च वर्तन्ते । ब्रह्म त्वेकमेव अस्ति । अत कथं तदेतैः शब्दैः प्रतिपाद्यते ?

अपि चैते अन्नमयादयः परस्परमन्यतया शरीरशरीरिभावेनान्तरत्वेन चोच्यन्ते । परस्परं भिन्नतया उपदिष्टाः, अन्तरत्वेन ब्रह्म भवितुं नार्हति । एक एव स्वस्य स्वयमेव अन्तरः तथा स्वस्मात् स्वयमेव भिन्नः इति कुत्रापि न दृश्यते न व्यवह्रियते । तर्ह्यानन्दमयोऽस्तु ब्रह्म सर्वान्तरत्वादिति चेत् अन्नमयादिविकारप्रवाहपतितत्वात् आनन्दमयः ब्रह्म न भवति । अन्नमया-द्यान्तरत्वमात्रेण सर्वान्तरत्वानिश्चयात् ।

किञ्च ''[१]ब्रह्मविदाप्नोति परम्'' इति प्रकृतं परं ब्रह्म आनन्दमयस्य ''[२]ब्रह्म पुच्छं प्रतिष्ठा'' इत्यवयवतया प्रतीयते। अवयवः एव अवयवी इति वक्तुं न सम्भवति । विरोधात् । स्वस्य स्वायवयत्वं विरुद्धं अनुभूयते । यो यदवयवः स तस्माद् भिन्नः इत्येव व्याप्तिः जगति प्रसिद्धः अस्ति । अतोऽन्नमयादय पञ्चापि न ब्रह्म, किन्त्वन्य एवेति ।

तथा चाऽऽनन्दमयस्याब्रह्मत्वेन न तदवयवब्रह्मजिज्ञासा सम्भवतीत्याशयः ।

एवं प्राप्ते भगवान् बादरायणः सिद्धान्तयत् सूत्रं सूत्रयामास ।

।। ॐ आनन्दमयोऽभ्यासात् ॐ ।।१.१.१२।।

---

१. तै.उ. २.१

२. तै.उ. ११.४

अत्र आनन्दमयो ब्रह्मेति प्रतिज्ञा । तत्र हेतुः अभ्यासादिति । अस्यार्थः '[1]येऽन्नं ब्रह्मोपासते', '[2]ये प्राणं ब्रह्मोपासते', '[3]आनन्दं ब्रह्मणो विद्वान्', '[4]विज्ञानं ब्रह्म चेद् वेद', '[5]असन्नेव स भवति । असद् ब्रह्मेति वेद चेत् । अस्ति ब्रह्मेति चेद् वेद' इत्यन्नमयादिविषयतयोदाहृतेषु श्लोकेषु ब्रह्मशब्द-स्याभ्यासादित्यर्थः ।

प्रश्नः– एकविषयाऽसकृदुक्तिः अभ्यासः । '[6]येऽन्नं ब्रह्मोपासते' इत्यादिषु एवं नास्ति । अतः कथं अभ्यासात् इति हेतूक्तिं भगवान् आचार्यः अकार्षीत् ।

उत्तरम्– सत्यं मुख्याभ्यासः अन्नमयादिविषये नास्ति । किन्तु असकृदुक्तिरूपः अमुख्यो अभ्यासः वर्तते एव । एतच्च अन्नमयप्राणमय-मनोमयप्रकरणेषु वर्तते । विज्ञानमयानन्दमयप्रकरणयोः एकविषयासकृदुक्ति-रूपमुख्याभ्यास एव वर्तते । अनेन अन्नमयादिविषयत्वेन ब्रह्मशब्दस्य श्रुतत्वादित्युक्तं भवति ।

एवं अन्यास्वपि निर्णेतव्यवाक्येषु गुणिसामान्यगुणवाचिनामवतीषु श्रुतिषु तत्र तत्रस्थहेतुभिः परब्रह्मणि समन्वयं कुर्याद् । सर्वत्र एकेनैव हेतुना निर्णयकर्तुं न शक्यते इति सर्वानुभवसिद्धः ।

---

१. तै.उ.५.४ — ४. तै.उ.११.४
२. तै.उ. ६.५ — ५. तै.उ.१२.३
३ तै.उ. ९.११ — ६. तै.उ. ५.४

प्रश्नः– ब्रह्मशब्दस्य चित्प्रकृतिहिरण्यगर्भादिसाधारणं वर्तते । तस्मात् ब्रह्मशब्दः वाच्यः विष्णुरेव इति कथं निश्चयः ?

उत्तरम्– ब्रह्मशब्दः विष्णौ एव नियतः नियमेन मुख्यवृत्त्या प्रतिपादकः ।

प्रश्नः– विष्णोः मुख्यवृत्त्या ब्रह्मशब्दप्रतिपाद्यत्वं केन प्रमाणेन सिद्ध्यति इति चेत्।

उत्तरम्– '[१]तदेव ब्रह्म परमम्' इति, '[२]एतमेव ब्रह्मेत्याचक्षते' इति सावधारणश्रुतिभ्यां, तथा 'ब्रह्मशब्दः परे विष्णौ नान्यत्र क्वचिदिष्यते । असम्पूर्णाः परे यस्मादुपचारेण वा भवेत् ।।' '[३]ब्रह्मेति परमात्मेति भगवानिति शब्द्यते' 'वासुदेवात्मकं ब्रह्म मूलमन्त्रेण वा यतिः' इत्यादिषु ब्रह्मशब्दस्य विष्ण्वेकनिष्ठत्वं ज्ञायते ।

प्रश्नः– '[४]तदेव ब्रह्म परमम्' इति श्रुतिः विष्णुमेव प्रतिपादयतीति कथं ज्ञायते ?

उत्तरम्– '[५]अम्भस्यपारे भुवनस्य मध्ये'इति समुद्रशायिनं प्रस्तुत्य श्रुतिः 'तदेव ब्रह्म परमं कवीनाम्' इत्युच्यते । तच्च समुद्रशायित्वं विष्णोः

१. म.ना.उ.१.६

२. ऐ.आ.३.२.३.१२

३. भाग.१.२.

४. म.ना.उ.१.६

५. म.ना.उ.१.६

धर्मः इत्येव प्रसिद्धिः । इतरेषां धर्मः न । अतः ब्रह्मशब्दवाच्यः विष्णुरेव भवति ।

प्रश्नः– ननु प्रकृत्यादिष्वपि ब्रह्मशब्दप्रवृत्तौ निमित्तं सप्रमाणं प्रतिपादितम् ? कथं विष्णुरेव ब्रह्मशब्दवाच्य इति निर्णयः इति चेत् ।

उत्तरम्– ब्रह्मशब्देन हि पूर्णत्वमुच्यते । तच्च पूर्णत्वं देशतः कालतः गुणतश्च इति त्रिधा भवति । प्रकृतिः सर्वदेशेषु सर्वकालेषु व्याप्तत्वात् देशतः कालतः पूर्णा । ब्रह्मादयो सर्वकालेषु विद्यमानत्वात् कालतः पूर्णाः । त्रिविधपूर्णत्वं तु विष्णुं ऋते न कस्यापि अस्तीति तस्यैव पूर्णत्वमुख्यतः इति ब्रह्मशब्दः तस्मिन्नेव मुख्यवृत्त्या प्रवर्तते । एवं च मुख्यार्थे सम्भवति अमुख्यार्थग्रहणं नोपपद्यते इति तस्यैव वाचकः ब्रह्मशब्दः भवितुमर्हति ।

।। सूत्रे आनन्दमयपदग्रहणप्रयोजनम् ।।

प्रश्नः– ननु सूत्रे आनन्दमयशब्दस्यैव ब्रह्मणि समन्वयः उपपाद्यते । कथं भवद्भिः अन्नमयादयः ब्रह्मवाचकाः इति व्याक्रियते ?

उत्तरम्– सूत्रस्थानन्दमयशब्दः समानन्यायानामन्नमयादिशब्दानां उपलक्षकमित्यङ्गीक्रियते । एवमेव उत्तरत्रापि आकाशादिशब्दाः अपि स्वसमानन्यायशब्दान्तरोपलक्षकाः एव भवन्ति । अत्र उपलक्षणशब्देन अजहल्लक्षणा विवक्षिता । तेन आनन्दमयस्य त्यागः नात्र क्रियते । अत एव

विकारशब्दादित्याद्याक्षेपाणां तत्परिहाराणां स्वतन्त्रयुक्तीनां च उपलक्षणत्वं द्रष्टव्यम् ।

प्रश्नः– 'छत्रिणो गच्छन्ति' इत्यत्र एकसार्थवाहित्वं लक्ष्यतावच्छेदकधर्मः इति प्रसिद्धम् । आनन्दमयशब्दस्य अजहल्लक्षणा चेत् लक्ष्यतावच्छेदकधर्मः कः ?

उत्तरम्– अत्र शक्यपदं आनन्दमय इति । उपलक्षणया अन्नमयादयः अन्नादयः गृह्यन्ते । एवं च शक्योपलक्षणोभयानुगतः लक्ष्यतावच्छेदकः गुणिसामान्यवाचकगुणसामान्यवाचकान्यतरत्वम् इति ब्रूमः ।

प्रश्नः– ननु अत्र लक्षणा क्रियते । मुख्यार्थबाधे, मुख्यार्थसम्बन्धे प्रयोजने च सति लक्षणा जगति क्रियते । यथा गङ्गाजले घोषस्य सत्वासम्भवेन, गङ्गासम्बन्धित्वात्, पावनत्वशीतत्वादिबोधरूपप्रयोजने सति गङ्गायां घोषः इत्युच्यते । आनन्दमयशब्दस्य अन्नमयादिषु लक्षणाकरणे मुख्यार्थबाधादिकं किमस्ति ?

उत्तरम्– प्रयोजनम् - यदि सूत्रं 'अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयाः' स्यात् तदा सूत्रस्याल्पाक्षरत्वलक्षणं न घटते । श्रुत्या अर्थाद्वा ज्ञायमानस्यार्थस्यावचनं अल्पाक्षरत्वम् । पञ्चरूपाः हि अर्थात् ज्ञायते । अतः आचार्येण सूत्रकारेण सूत्रस्याल्पाक्षरत्वेन प्रयोजनेन लाक्षणिकप्रयोगः क्रियते ।

लक्षणानाश्रयणे बाधकं - यदि सूत्रे श्रुतं शब्दमात्रं समन्वीयते तदा सूत्रशतेन वाक्यशतसमन्वय एव सिद्ध्यति । सर्वशाखानिर्णयः न सम्भवति । सर्वशाखा-निर्णयार्थं ब्रह्मसूत्राणि प्रवृत्तानि । सर्वशाखानिर्णयार्थं सूत्रान्तराणि न सन्त्येव । अतः सर्वशाखानिर्णायकत्वान्यथानुपपत्त्या सूत्रश्रुतापरित्यागेन अन्ये समानन्यायविषयाः शब्दाः उपलक्ष्यते । एवं च सूत्रघटकप्रतिज्ञा-वाचकानन्दमयादिपदानां लक्षणां अन्यथा सूत्राणां सर्वशाखानिर्णायकत्वं अनुपपन्नम् । अतः केवलमुख्यार्थग्रहणे बाधकसद्भावात् लक्षणा आश्रयणीया भवति ।

प्रश्नः– यथा लक्षणायाः अकरणे सूत्रस्य विश्वतोमुखत्वहानि-रूपबाधकमस्ति एवं लक्षणाश्रयणे अन्नमयेतरेषामपि ग्रहणसम्भवात् सर्वेषां शब्दानामत्रैव समन्वयः भवति । तथा च उत्तराधिकरणारम्भः न स्यादित्यपि बाधकमस्ति । अतः लक्षणा न करणीया ।

उत्तरम्– समानन्यायसञ्चारविषयाणामेव अत्र उपलक्षणया गृह्यते । अतः समानन्यायविषयाधिकरणानारम्भः यदि आपाद्यते तदस्माकमिष्टमेव । न्यायान्तरसञ्चारविषयाणामधिकरणारम्भस्तु भविष्यत्येव । अतः न कापि अनुपपत्तिरस्ति ।

अन्नमयादीनां तु समानन्यायतया सम्बन्धेनोपलक्षणया गृह्यन्ते । अनेन मुख्यार्थसम्बन्धोऽपि उक्तो भवति ।

प्रश्नः– ननु समानन्यायविषयेपि अधिकरणान्तरारम्भो दृश्यते । अतः उपलक्षणकरणेपि अनुपपत्तिः समाना एव ।

उत्तरम्– पूर्वाधिकरणव्युत्पादितेपि अर्थे यदधिकरणान्तरमारभ्यते तत् पूर्वाधिकरणन्यायाच्छादकाद् अधिकाशङ्कालक्षणात् पुनरधिकरणान्तरारम्भप्रापकात् हेतोः उपपद्यते । अधिकाशङ्कया पूर्वाधिकरणन्यायविषयत्वाभावे परेण आशङ्किते अधिकाशङ्कानिराकरणेन पुनः तन्न्यायविषयत्वप्रदर्शनार्थं अधिकरणान्तरारम्भः क्रियते । अतः सूत्रस्य विश्वतोमुखत्वभङ्गान्यथानुपपत्तिः निरवकाशः इति लक्षणाश्रयणं न्यायोपेतमेव वर्तते ।

प्रश्नः– यदि लक्षणा क्रियते तर्हि सूत्रकाराः प्रथमप्राप्तत्वात् अन्नमयशब्दमेव प्रथमं उपादद्युः । आनन्दमयशब्दं उपाददन्तः सूत्रकाराः तन्मात्रविवक्षां सूचयन्ति । अतः लक्षणा नाश्रयणीया ।

उत्तरम्– अन्नमयादीनां अब्रह्मत्वे विकारार्थकः मयट्प्रत्ययः सर्व-साधारणोपपत्तिः अस्ति । आनन्दमयस्य तु अधिकमस्ति । '[1]ब्रह्मविदाप्नोति परम्' इत्युक्तस्य '[2]ब्रह्म पुच्छं प्रतिष्ठा' इत्युक्त्या अवयविनः आनन्दमयस्य ब्रह्मत्वं न सिद्ध्यति इति अधिकापि उपपत्तिरस्ति । अतः आनन्दमयपदमेव गृहीतवान् सूत्राकरः ।

---

१. तै.उ. २.१.

२. तै.उ. ११.४

आनन्दमयः ब्रह्म स्यात् तदा तदवयवस्य मुख्यब्रह्मता प्राप्तिः न भवति । तदवयवज्ञानात् परप्राप्तिः श्रुता बाध्यते । अतः लक्षणा करणीया ।

जिज्ञासासूत्रे जिज्ञास्यतयोक्तस्य ब्रह्मणः तैत्तिरीये पुच्छत्वोक्त्या मुख्यब्रह्मत्वं न सिद्ध्यतीति आनन्दमयपदं सूत्रे निबबन्ध । अन्यच्च प्रयोजनं सूचनं आचार्येण क्रियते । सर्वापेक्षितानन्दप्रदोपासनाविषयमहागुणवाचित्वेन अध्यायादौ मङ्गलार्थत्वेनापि आनन्दमयपदं निबबन्ध ।

प्रश्नः– सूत्राणां विश्वतोमुखत्वभङ्गान्यथानुपपत्त्या उपलक्षणत्वमङ्गी-करणीयमित्येतत् अस्तु । तथापि आनन्दमयशब्दस्य अन्नमयाद्युपलक्षणं इत्येतत् कुतः अङ्गीकरणीयम् ?

उत्तरम्– आनन्दमयस्य ब्रह्मत्वे हेतुत्वेन ब्रह्मशब्दाभ्यासः सूत्राकारैः निरूपितः । ब्रह्मशब्दाभ्यासः अन्नमयादिष्वपि समान एव वर्तते । एवं च यदि अन्नमयादयः ब्रह्म न स्युः तर्हि ब्रह्मत्वाभाववति अन्नमयादिषु ब्रह्मशब्दाभ्यास-रूपहेतोः वृत्ते व्यभिचारः स्यात् । अतः अन्नमयादिष्वपि ब्रह्मशब्दाभ्यासं हेतुत्वेन निरूपयता सूत्रकारेण अन्नमयादयोपि पक्षत्वेन अङ्गीकृता इति ज्ञायते ।

तथा 'ॐ [१]अस्मिन्नस्य च तद्योगं शास्ति ॐ' इति सूत्रोक्तमुक्त-

---

१. ब्र.सू.१.१.१९

गम्यत्वरूपहेतुः, तथा 'ॐ [1]मान्त्रवर्णिकमेव च गीयते ॐ' सूत्रोक्तमन्त्र-वर्णोक्तत्वाख्यहेतुः अन्नमयादिसाधारणः अत्र विवक्ष्यते ।

।। आनन्दमयस्य ब्रह्मत्वे अनुपपत्तिपरिहारः ।।

प्रश्नः– आनन्दमयस्य ब्रह्मत्वं कथं सम्भवति । 'ब्रह्म पुच्छम्' इति ब्रह्मणः आनन्दमयपुच्छत्वाभिधानं श्रुतौ दृश्यते । अवयवावयविनोः अभेदः अनुभवविषयः नास्ति । आनन्दमयस्य अवयवत्वे अवयवावयविनोः अभेदः स्यात् । अतः कथं सम्भवति ।

उत्तरम्– '[2]ब्रह्म पुच्छं' इत्यत्र ब्रह्मशब्दः अन्यपरः जिज्ञास्यब्रह्म-व्यतिरिक्तचतुर्मुखादिपरः अस्ति । विष्णुं न वदति । अतः अवयवावयव्यभेद-प्रसक्तिः नास्ति ।

प्रश्नः– तदा ब्रह्मत्वाभाववति चतुर्मुखादिषु ब्रह्मशब्दश्रवणात्, 'आनन्दमयः ब्रह्म ब्रह्मशब्दाभ्यासाद्' इत्यनुमाने व्यभिचारः स्यात् ।

उत्तरम्– निरपवादब्रह्मशब्दः हेतुरित्युच्यते । 'आनन्दमयः ब्रह्म निरपवादब्रह्मशब्दाभ्यासाद्' इत्युच्यते । तथा च ब्रह्मण्येव निरपवादब्रह्मशब्दः भवति । अन्येषु चतुर्मुखादिषु सापवादः इति न व्यभिचारः ।

प्रश्नः– 'ब्रह्म पुच्छं' इत्यत्रापि अपवादो चतुर्मुखादिपरः ब्रह्मशब्दः

---

१. ब्र.सू.१.१.१५

२. तै.उ. ११.४

नास्ति । अतः निरपवादब्रह्मशब्दः एव । ततश्च सुस्थः व्यभिचारः ।

उत्तरम्– ब्रह्मावयवत्वं हेतुत्वेन उच्यते । अतो न व्यभिचारः इति ।

प्रश्नः– तर्हि अन्योन्याश्रयदोषप्रसङ्गः । आनन्दमयस्य ब्रह्मत्वसिद्धौ ब्रह्मावयवत्वरूपापवादसिद्ध्या निरपवादब्रह्मशब्दस्य व्यभिचाराभावसिद्धिः तत्सिद्धौ च तेनानन्दमयस्य ब्रह्मत्वसिद्धिः इति अन्योन्याश्रयः ।

उत्तरम्– किमवयवस्य पूर्णत्वे अवयविनः पूर्णत्वं नोपपद्यत इत्यभिप्रायः किं वा आनन्दमयस्यावयविनः पूर्णत्वे तदवयवस्य पूर्णत्वाभावापादनम् अथवा अवयवावयविनोः भेदात् अवयवस्य परमात्मत्वे नावयविनः परमात्मत्वम् इत्यभिप्रायः इति ।

नाद्यः । अवयवस्य पूर्णत्वे अवयविनः पूर्णत्वं नोपपद्यते इति न वक्तव्यम् । यदा अवयवस्य ब्रह्मत्वं अस्ति तदा अवयविनः अनायासेन पूर्णत्वं ब्रह्मत्वं स्यादेव । अवयवापेक्षया अवयविनः महत्वस्य सर्वानुभवसिद्धत्वात् । अतः अवयवस्य ब्रह्मत्वे अवयविनः ब्रह्मत्वं न स्याद् इत्येतत् विरुद्धम् ।

न द्वितीयः । आनन्दमयस्य अवयविनः पूर्णत्वे अवयवस्य पूर्णत्वं न सम्भवति इति न युक्तम् ।

‘[१]उद्बबर्हात्मनः केशौ सितकृष्णौ महामुने ।

---

१. विष्णुपुराण.५अंश

उवाच च सुरानेतौ मत्केशौ वसुधातले ।।

अवतीर्य भुवो भारक्लेशहानिं करिष्यतः ।।'

इति पुराणवाक्ये भगवान् श्रीकृष्णः नारायणस्य अंशः इति निरूपितम् । तस्य कृष्णस्य निरुपचरिता ब्रह्मता वर्तते । तथा आनन्दमयस्य पूर्णत्वात् ब्रह्मत्वात् तदवयवस्य पुच्छस्यापि ब्रह्मत्वं पूर्णत्वं भवति ।

श्रीकृष्णस्य पूर्णत्वे केन प्रमाणे सिद्धमिति चेत् । '[१]द्यावापृथिव्योरिदमन्तरं हि व्याप्तं त्वयैकेन दिशश्च सर्वा' इति अर्जुनेन कृष्णस्य सर्वत्र व्याप्तत्वं दृष्टमस्ति । अतः अर्जुनप्रत्यक्षरूपप्रमाणसद्भावात् सिद्ध्यति । इदं अर्जुनस्य प्रमैव । न भ्रान्तिः । पुराणेतिहासादिषु एवमनेकवाक्यानां विद्यमानत्वात् ।

लोके यः अवयवः स परिच्छिन्नः दृष्टः । अतः आनन्दमयपुच्छयोः परिच्छिन्नापरिच्छिन्नयोः अभेदः इति न युज्यते इति चेत् । परमेश्वरस्य अघटितघटकतया सर्वत्राप्रतिबद्धया शक्त्या अन्यत्रादृष्टमपि अवयवावयविनोः अवयविनः पूर्णत्वे अवयवस्यापि पूर्णत्वं घटते ।

न तृतीयः । अवयवावयविनोः भेदात् अवयवस्य परमात्मत्वे नावयविनः परमात्मत्वम् वक्तुं न शक्यते इति तृतीयपक्षः न युज्यते । परमेश्वरस्य अघटितघटकतया सर्वत्राप्रतिबद्धया शक्त्या अन्यत्रादृष्टमपि अवयवावयविनोः अभेदः घटते । अत्र प्रमाणं तु भाष्योदाहृतं बृहत्संहितावचनमेव विद्यते । तथाहि–

१. भा गी. ११

शिरो नारायणः पक्षो दक्षिणः सव्य एव च । प्रद्युम्नश्चानिरुद्धश्च सन्दोहो वासुदेवकः ।।

नारायणोऽथ सन्दोहो वासुदेवः शिरोऽपि वा । पुच्छं सङ्कर्षणः प्रोक्त एव एव तु पञ्चधा ।।

अङ्गाङ्गित्वेन भगवान् क्रीडते पुरुषोत्तमः । ऐश्वर्यान्न विरोधश्च चिन्त्यस्तस्मिन् जनार्दने ।।

अतर्क्ये तु कुतस्तर्कस्त्वप्रमेये कुतः प्रमा ।। इति बृहत्संहितायाम् ।।

।। ब्रह्मशब्दस्य रुद्रे प्रयोगशङ्का- निरासश्च ।।

प्रश्नः– 'अन्नमयादयः आनन्दमयश्च विष्णुः ब्रह्मशब्दाभ्यासात्' इत्युक्तम् । तन्न सम्भवति । साध्याभाववति विष्णुत्वाभाववति रुद्रे ब्रह्मशब्दश्रवणात् व्यभिचारः सम्भवति । तथाहि– तापनीयश्रुतौ

'[1]ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ।

ऊर्ध्वरेतं विरूपाक्षं शङ्करं नीललोहितम् ।।'

इति पूर्वार्धे रुद्रं परब्रह्मशब्देन श्रुतिः स्तूयते । अतः रुद्रे अयं हेतुः अनैकान्तिकः ।

उत्तरम्– तापनीयश्रुतिवाक्यं पूर्वार्धं उत्तरार्धं च भिन्नविषयतया व्याख्यानं कर्तव्यम् । 'ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ।' इति पूर्वार्धं

१.न.ता.उ.१२

विष्ण्वाख्यपरब्रह्मपरतया योजनीयम् । तथा च पूर्वार्धं द्वितीयाविभक्त्यन्तानि । 'ऊर्ध्वरेतं विरूपाक्षं शङ्करं नीललोहितम्' इति उत्तरार्धं रुद्रपरतया योजनीयानि । तथा च उत्तरार्धं प्रथमाविभक्त्यन्तानि । एवं व्याख्यानं कर्तव्यम् । उत्तरार्धं कथं नपुंसकलिङ्गप्रयोगः इति चेत् । अमुख्यया वृत्त्या जीवे ब्रह्मशब्दसद्भावात् तदपेक्षया उत्तरार्धे नपुंसकलिङ्गप्रयोगः उपपद्यते ।

एवं च 'ऋतं सत्यं पुरुषं कृष्णपिङ्गलं परं ब्रह्म प्रति विरूपाक्षं शङ्करं नीललोहितं अपरं ब्रह्म ऊर्ध्वरेतं विष्णुव्रते स्थितमस्ति ।।' इति योजना कार्या ।

प्रश्नः– पूर्वार्धोत्तरार्धे एकविषयतया प्रतीयेते । अत्र भिन्नविषयतया व्याख्याते । कुतः इति चेत् ।

उत्तरम्– बाधकसद्भावात् भिन्नविषयतया व्याख्यातव्ये भवतः । तथाहि–

१. **पौनरुक्तिः** । यदि पूर्वार्धोत्तरार्धे एकविषयतया व्याख्यायते तदा उत्तरार्धोक्तं नीललोहितं कृष्णपिङ्गलरूपेण पूर्वार्धेन पुनरुक्तं भविष्यति । कृष्णपिङ्गलनील-लोहितशब्दयोः एकार्थत्वात् । अतः एकविषयतया प्रतीतं परित्यज्य भिन्न-विषयतया व्याख्यातुं योग्यम् ।

२. **उत्तरवाक्यस्थित-ब्रह्माधिपतिशब्दबलात्** । उत्तरवाक्ये 'ब्रह्माधिपतिः ब्रह्मणोधिपतिः' इति रुद्रस्य ब्रह्मा अधिपतिः इत्युच्यते । कथं इति चेत् । ब्रह्मा अधिपतिः यस्य सः ब्रह्माधिपतिः इति बहुव्रीहिसमासः कार्यः । तस्मात् रुद्रः परं ब्रह्म भवितुं नार्हति । अतः पूर्वार्धोत्तरार्धौ भिन्नविषयौ व्याख्येयौ ।

प्रश्नः– 'ब्रह्माधिपतिः' बहुव्रीहिसमासः कुतः क्रियते ? ब्रह्मणः अधिपतिः

इति षष्ठीतत्पुरुषसमासो वा ब्रह्म च अधिपतिश्च इति कर्मधारयसमासो वा कुतः न स्यात् ?

उत्तरम्– ब्रह्माधिपतिः इत्यत्र ब्रह्माधिपतिप्रातिपदिकं स्वरितब्रह्मशब्दान्तं वर्तते । तथाहि– ब्रह्मशब्दस्य मन्प्रत्ययान्तत्वेन '[१]ञ्नित्यादिः नित्यम्' इत्यनेन प्रकृतिरूपबृंहतेः आद्युदात्तत्वे परस्य मन्प्रत्ययस्य '[२]अनुदात्तं पदमेकवर्जम्' इत्यनेनानुदात्तत्वे '[३]उदात्तानुदात्तस्य स्वरितः' इत्यनेन मन्प्रत्ययस्य स्वरितत्वं भवति । अतः बहुव्रीहिसमासं कुर्यात् ।

अन्यसमासेषु कृतेषु '[४]समासस्य' इति सूत्रेण समासस्यान्त उदात्तो भवति । ततः '[५]अनुदात्तं पदमेकवर्जम्' इति अन्यस्वराणां 'ब्रह्माधिप' इत्येतेषां अनुदात्तस्वरः भवति । 'ह्म' इत्यत्र हमकारोत्तरवृत्तेः अकारस्य स्वरितस्वरः न भवति । परन्तु वैदिकाः ब्रह्माधिपति इत्यत्र स्वरितं पूर्वपदान्त-स्वरतया पठन्ति । तद्विरोधः भवत्येव ।

अस्य उदाहरणम्– त्वष्टा 'स्वाहेन्द्रशत्रो वर्धस्व' इति इन्द्रशत्रुपदं स्वरितपूर्वपदान्तं पपाठ । अतः इन्द्र एव वृत्रस्य शत्रुः शातयिता संहारकर्ता अभवत् । यदि तत्पुरुषः स्यात् । तदा वृत्र एव इन्द्रस्य संहारकः अभविष्यत् ।

महाव्याकरणे सूत्रस्य सद्भावात् च पूर्वपदान्तस्वरः स्वरितः चेत् बहुव्रीहिसमासः इत्युच्यते । 'पूर्वान्तस्वरिते पुंसो बहुव्रीहित्वम्' । तस्यार्थः–

---

१. पा.सू.३६८६
२. पा.सू.३६५०
३. पा.सू.३६६०
४. पा.सू.३७३४
५. पा.सू.३६५०

पुंसोः पुल्लिङ्गयोः समस्यमानयोः **पूर्वपदान्ते** स्वरे **स्वरिते** सति तत्समास-प्रातिपदिकं **बहुव्रीहित्व**मेष्यतीति ।

३. **समाख्याश्रुतिबलात्** ।

ऋतं सत्यं परंब्रह्म प्रति विष्णुं सदाशिवः ।

ऊध्वरेता ध्यायतीह शङ्करो नीललोहितः ।।

इति आर्थवणी तापनीयश्रुतेरन्या नीलग्रीवश्रुतिः स्पष्टं पूर्वार्धोत्तरार्धौ भिन्नविषयौ प्रतिपादयन्ती अस्ति ।

४. **महानारायणश्रुतिबाधकसद्भावात्**

महानारायणोपनिषदि '[१]तदेवर्तं तदु सत्यमाहुः तदेव ब्रह्म परमं कवीनाम्' इति विष्णोः ऋतत्वसत्यत्वपरब्रह्मत्वं प्रतिपादयति । यदि ऋतत्वादिकं रुद्रस्य स्यात् तदा महानारायणविरोधः भविष्यति । अतः तदविरोधाय पूर्वार्धं विष्णुपरमेव व्याख्येयम् ।

उभयोरपि ऋतत्वादिकमस्तु इति वक्तुं न युक्तम् । 'तदेव ब्रह्म परमं कवीनाम्' इति अवधारणपूर्वकं परब्रह्मत्वं विष्णोरेव श्रुतिः वदति । अतः प्रबला निरवकाशा महानारायणश्रुतिः इति वक्तुं शक्यते । प्राबल्यं च '[३]ऋतं सत्यं' इति श्रुत्या आपातप्रतीतिजभ्रान्तिबाधात्मकत्वाद् अवसीयते । तच्च एवेत्यवधारणेन एतन्निषेधावगमेन अवसीयते । अस्तु अवधारणेन इतरस्य

१. मा.न.उ. १.६

ऋतत्वादिप्रतिषेधः तथापि रुद्रादेः इतरस्य ऋतत्वादिप्रतीतिः भ्रान्तिः । सा 'ऋतं सत्यं' इत्यादि श्रुत्याभासप्रतीतिजा इति तु अप्राप्तप्रतिषेधस्यायुक्तत्वात् युक्तम् । नापि श्रुत्याभासाद् विना तत् प्रापकमस्ति ।

५. रुद्रस्य ब्रह्मत्वाभावे प्रमाणान्तरम्

'[१]एको नारायण आसीन्न ब्रह्मा न शङ्करः'

'वासुदेवोऽग्र एवासीन्न ब्रह्मा न च शङ्करः ।

नेन्द्रसूर्यौ न च गुहो न सोमो न विनायकः ।।'

इत्यादिश्रुतिवाक्येभ्यः रुद्रादीनां प्रलये अभावः तथा विष्णोः तेषां जननं च अवगम्यते । तथा च जन्मवतां तेषां गुणपूर्णत्वाख्यपरब्रह्मत्वं न युज्यते ।

रुद्रादीनां मुख्यपरब्रह्मत्वाभावेपि अमुख्यवृत्त्या ब्रह्मशब्दवाच्यत्वं अस्त्येव । अतः ते अपरब्रह्म इति उच्यते । अतः एव 'ऋतं सत्यं' इति श्रुते अर्थकथनसमये रुद्रपरोत्तरार्धस्य योजनसमये नपुंसकलिङ्गोपपत्तये 'विरूपाक्षाख्यं अपरं ब्रह्म' इति योजना क्रियते ।

प्रश्नः– एवं विष्णिवतरेषु अमुख्यवृत्त्या ब्रह्मशब्दप्रयोगे अन्नमयादिष्वपि तथा क्रियताम् । अन्नमयादिषु मुख्पब्रह्मत्वज्ञापकं किमपि नास्ति ।

उत्तरम्– मुख्यब्रह्मत्वज्ञापकमस्ति । '[२]ब्रह्मविदाप्नोति परम्' इति परब्रह्मण

१. ब्र.सू.भा.१.१.१२ २. तै.उ.२.१

एव प्रसङ्गः अस्ति । तेन उत्तरेषामपि ब्रह्मशब्दानां परब्रह्मविषयत्वं निश्चीयते ।

किञ्च अमुख्यार्थग्रहणे मुख्ये एव शक्तिग्रहणसद्भावात्, मुख्यार्थग्रहे बाधकाभावाच्च अमुख्यार्थस्वीकारो न युज्यते ।

।। ॐ विकारशब्दान्नेति चेन्न प्राचुर्यात् ॐ ।।

प्रश्नः– आनन्दमयादयः विष्णुः इति वक्तुं न युक्तम् । किन्तु प्रागुक्तप्रकृत्यादय एव आनन्दमयादयः । विकाराभिधायकमयट्शब्दप्रयोगात् । तर्हि प्रकृत्यादौ कथं ब्रह्मशब्दः इति चेत् । अमुख्यवृत्त्या तेषां ब्रह्मशब्द-प्रतिपाद्यत्वात् उपपद्यते । प्रकृत्यादीनां अन्नमयादित्वे प्रस्तावविरोधः तथा बाधकाभावश्च उक्तः इत्यपि न । विकारार्थकमयट्प्रत्ययस्यैव बाधकत्वात् ।

किञ्च विकारार्थशब्दवाच्यत्वं विकारवति व्यक्तौ विकाराभिमानिनि सम्भवति । तथाच विकारात्मकत्वात् अचित्प्रकृतेः चेतनप्रकृतिरुद्रेन्द्र-बृहस्पतिजीवानां विकाराभिमानित्वात् मयट्शब्दो युज्यते । तथा च ते एव अन्नमयादिशब्दवाच्याः अस्तु । विष्णोस्तु अविकारित्वात् विकाराभिमानित्वा-भावाच्च नानन्दमयादिशब्दवाच्यं न्याय्यम् ।

उत्तरम्– श्रुतौ प्रचुरानन्दत्वादिमत्वात् आनन्दमयादिपदेन आनन्दमयादयः कथ्यन्ते इति वदामः । ते आनन्दविकारत्वादि निमित्तेन तद्शब्दवाच्याः न ब्रूमः । 'तादात्म्यार्थे विकारार्थे प्राचुर्यार्थे मयट् त्रिधा' इति

मयट्शब्दः विकारार्थे इव प्राचुर्यार्थेऽपि मुख्यः वर्तते एव । '[1]तत्प्रकृतवचने मयट्' इति पाणिनिसूत्रस्य सद्भावात् । अत्र किञ्चित् यादवार्यैः श्रीमन्न्यायसुधाव्याख्यातृभिः निरूपितं निरूपयामि । तथाहि–

इदं सूत्रं वैयाकरणैः द्वेधा व्याख्यातम् । तदिति प्रथमासमर्थात् प्राचुर्येण प्रस्तुतमिदमित्यर्थे वर्तमानात् स्वार्थे मयट्प्रत्ययो भवतीत्येकः अर्थः । अस्यान्नमयं यवागूमयी इत्याद्युदाहरणम् । प्राचुर्येण प्रस्तुतमन्नमित्यादिः तदर्थः । यद्यपि प्रकृतशब्दः प्रस्तुतमात्रवाची । न क्लृप्तप्राचुर्यविशिष्टप्रस्तुतवाची । तथापि प्रकृत इत्येतावति वक्तव्ये वचनग्रहणात् अयं विशेषो लभ्यते । वचनग्रहणं हि यादृशस्य प्रकृतस्य मयटा वचनं प्रत्यायनं प्रसिद्धं तत्रयथा स्यादित्येवमर्थम् । लोके च मयडन्तैरन्नमयादिशब्दैः प्राचुर्येण प्रकृतस्य प्रत्यायनं प्रसिद्धमिति ।

अपरस्त्वर्थः । प्रकृतं प्रस्तुतमुच्यते अस्मिन्निति प्रकृतवचनम् । तदिति प्रथमासमर्थात् प्रकृतवचनेर्थे मयट्प्रत्ययो भवतीति । अस्यान्नमयो यज्ञ इत्याद्युदाहरणम् । प्रकृतमन्नमस्मिन् यज्ञे इत्यादिः तदर्थः । अस्मिन्नर्थे प्रकृतादर्थात् अर्थान्तरे प्रत्ययः । प्रकृतशब्देन च प्रस्तुतमात्रमुच्यते न तु प्राचुर्यविशिष्टमिति पूर्वस्मात् अर्थात् विशेषः ।

अत्र च द्वितीयव्याख्यानं न प्रकृतोपयोगि । प्राचुर्यप्रत्यायकाभावात् किन्तु प्रथमव्याख्यानमेव । तत्रापि सूत्रोपात्तप्राचुर्यं शाब्दं, आनन्द-प्रचुरधर्मिपर्यन्तत्वं त्वार्थिकमिति भावः ।

१.पा.सू. २०८९

तथा च ब्रह्मशब्दस्य अन्यत्र मुख्यत्वं नास्ति अतः सः निरवकाशः । मयट्प्रत्ययश्च सावकाशः तस्य विकारार्थः इव प्राचुर्यार्थमपि वक्तुं शक्यते । अतः निरवकाशब्रह्मशब्दात् सावकाशमयटः प्राचुर्यार्थस्य कर्तुं शक्यत्वात्, मयट्प्रत्ययबलाद् अन्नमयादीनां अपरमात्मत्वकल्पनं न युज्यते ।

प्रश्नः– ननु अन्नमयः इत्यादौ विकारार्थकः मयट्प्रत्ययः वर्तते । तन्मध्य-पतितस्य आनन्दमयशब्दस्य प्राचुर्यार्थत्वं न युज्यते । प्रायपाठविरोधात् ।

उत्तरम्– अन्नमय इत्यादिष्वपि मयट्प्रत्ययस्य प्राचुर्यार्थत्वमेव अङ्गीकुर्मः । अतः न प्रायपाठविरोधः सम्भवति ।

प्रश्नः– यथा अन्नविकारत्वं निरभिमानिनः निर्विकारस्य विष्णोः न सम्भवति । तथा अन्नप्राचुर्यमपि विष्णोः न घटते । कुतः इति चेत् अन्नप्राचुर्यं अन्नोपजीविनां पार्थिवशरीराणां भवति । विष्णुस्तु प्रसिद्धान्नं नोपजीवति । तस्मात् स अन्नमयशब्दवाच्यः न भवति ।

उत्तरम्– अत्र श्रुतौ प्रसिद्धान्नविवक्षया अन्नशब्दः न प्रयुज्यते । किन्तु '[१]अद्यते अत्ति च भूतानि । तस्मान्नं तदुच्यत इति ।' इति स्वकृतान्न-शब्दार्थनिवर्चनविवक्षया प्रयोगः कृतः ।

अन्नशब्दनिर्वचनं तु– अदिधातोः कर्मणि कर्तरि च क्तप्रत्यये अद् त

---

१. तै.उ.५.७

इति स्थिते '[१]रदाभ्यां निष्ठातो नः पूर्वस्य च दः' इति तकारदकारयोः नकारे सति अन्नमिति रूपं सिद्ध्यति ।

कुतः एवं व्याख्यातं इति चेत् प्रसिद्धस्य अन्नस्य भूतात्तृत्वं अर्थात् भूतसंहतृत्वं न सम्भवति । अतः युक्तमेवं व्याख्यानम् ।

प्रश्नः– भूतसंहर्तृत्वात् भूतातृत्वमस्तु । भूतै अद्यत्वं कथं युज्यते । कोपि ब्रह्माणं न अत्ति ?

उत्तरम्– अत्र अद्यत्वं गौण्या वृत्त्या भोग्यत्वमेव विवक्षितम् । भोग्यत्वं च हरेः सर्वभूतोपजीव्यतया युज्यते ।

प्रश्नः– यदि अन्नशब्दस्य प्रसिद्धान्नपरत्वं नास्ति तर्हि प्राणमनः-विज्ञान-आनन्दशब्देषु च कीदृशव्याख्यानं क्रियते ?

उत्तरम्– अन्नमयशब्देनोक्ते परमेश्वरे महाभोक्ता महाभोग्यः इत्यर्थः भवति । प्राणमये महाप्राणः महाव्यापारवान् इत्यर्थः विवक्ष्यते । महाबोधवान् इत्यर्थः मनोमयशब्दस्य क्रियते । विज्ञानमयशब्दस्य महाविज्ञानवान् इत्यर्थः । आनन्दमय इत्यस्य महानन्दवान् इत्यर्थः भवति । एवं अर्थकरणे श्रुत्युदाहृत-श्लोकानि प्रमाणानि भवन्ति । अत एव अन्नप्राणमनोविज्ञानशब्दानां प्रसिद्धशरीर-वाय्वन्तःकरणबुद्धयः न विवक्षणीयाः ।

प्रश्नः– मयटः प्राचुर्यार्थत्वं अस्तु । तथापि अन्नमयादिशब्दवाच्यः

१.पा.सू. ३०१६

परमात्मा न भवति । तत्प्रचुर इत्युक्ते तद्विरुद्धस्याप्यल्पस्य प्रसक्तेः । यथा ब्राह्मणप्रचुरः अयं ग्रामः इत्युक्ते ब्राह्मणप्रतियोगिशूद्राणां अल्पस्य सत्वं बोद्ध्यते । तथा आनन्दप्रचुर इत्युक्ते आनन्दप्रतियोगिदुःखाल्पत्वस्य प्रसक्तिः भवति । तच्च भगवति न सम्भवति । परमात्मनि अत्यल्पदुःखाज्ञानादीनां प्रसक्तेः अभावात् ।

उत्तरम्– प्रतियोगिप्राप्तिः प्रचुरशब्देन न भवति । तत्प्रचुरशब्दः हि तस्य तस्मिन् महत्त्वमात्रमाह । विरुद्धवस्तुसद्भावस्तु प्रमाणान्तरेण वेद्यो भवति । एवमनङ्गीकारे 'अन्नप्रचुरो मखः' इत्युक्ते अल्पदुर्भिक्षप्रसक्तिः स्यात् । 'प्रकाशप्रचुरो सविता' इत्युक्ते सवितरि अल्पान्धकारप्रसक्तिः स्यात् ।

प्रश्नः– ननु प्राचुर्यं प्रतियोग्यपेक्षया एव भवति । प्राचुर्यं प्रतियोगिभूतं अल्पत्वं समानाधिकरणविजातीयगतमेव ब्राह्मणप्रचुरो ग्राम इत्यादौ दृश्यते । तथा च प्राचुर्यवत् समानाधिकरणगतप्रतियोग्यपि शब्दात् प्रतीयते इति कल्पनीयम् । तर्हि अन्नप्रचुरो मखः कथं इति चेत् । तत्रापि शब्दात् प्रतीयते एव विरोध्यल्पत्वं परन्तु मानान्तराद् तदभावः गम्यते इति ।

उत्तरम्– सत्यम् । बहुषु एवं दृश्यते । तथापि पदार्थान्तरगताल्प-तद्धर्मापेक्षयापि उपपद्यते । प्रचुरप्रकाशः सविता इत्यत्र व्यधिकरणस्य सजातीयस्य नक्षत्रादिप्रकाशस्याल्पत्वेनापि प्राचुर्यं दृश्यते । प्रकृते च 'सैषानन्दमीमांसा भवति' इति श्रुत्या व्यधिकरणस्य सजातीयस्य जीवानन्दस्याल्पत्वमुक्त्वा

ब्रह्मानन्दस्य '[1]यतो वाचो निवर्तन्ते' इत्यादिना महत्त्वोक्तेः ब्रह्मणः आनन्द-मयशब्दवाच्यत्वं उपपद्यते ।

आनन्दप्रचुर इति यद्युच्यते ब्राह्मणप्रचुरो ग्राम इत्यादिवदनानन्दस्यापि प्राप्तेः प्रचुरानन्द इति विपरीतसमासः कृतः । प्रचुरानन्द इत्यभिधाने पूर्णानन्द इत्येव प्रतीतेः ।

प्रश्नः– अन्नमयादीनां परमात्मत्वे परमात्मा तावत् एक एव 'एकमेव' इति श्रुतिसद्भावात् । अन्नमयादयस्तु अनेकाः । तथा च परमात्मनः अनेकत्वं स्यात् ।

उत्तरम्– एकस्य निर्भेदस्यापि हरेः विशेषबलेन अनेकत्वसङ्ख्यावत्वाद् विभागतो अन्नमयाद्यनेकत्वोक्तिः उपपद्यते ।

प्रश्नः– विज्ञानमय इत्यस्य विज्ञानं प्रचुरमस्मिन् इति विज्ञानमयः, आनन्दं प्रचुरमस्मिन्निति आनन्दमयः इति अर्थकथनेन विज्ञानानन्दयोः ब्रह्मणा भेदः प्रतीयते । तथा च 'विज्ञानमानन्दं ब्रह्म' इति श्रुतिविरोधः स्यात् । अस्मिन् ब्रह्मतर्कवचनमेव प्रमाणम् । तथाहि–

'[2]भेदशब्दा विशेषं तु हरावन्यत्र भिन्नताम् ।

ब्रूयुः हरेर्जीवजडैरपि भेदं हि मुख्यतः ।।' इति ।

---

१. तै.उ.९.२

२. अनु.१.१.१२

प्रश्नः– मनश्शब्दस्य ज्ञानार्थत्वे विज्ञानशब्देन पुनरुक्त्या पृथगुक्तिः कथं घटते ?

उत्तरम्– मनश्शब्दस्तु ज्ञानमात्रवाची विज्ञानशब्दसहपाठबलात् सामान्यज्ञाने पर्यवस्यति । तथा च विज्ञानशब्दः विशेषज्ञानवाची । विज्ञानशब्दस्य कथं विशेषज्ञानार्थत्वमित्यतः

'[१]सामान्यैः ये त्वविज्ञेया विशेषा मम गोचराः ।

देवादीनां तु तज्ज्ञानं विज्ञानमिति कीर्तितम् ।।'

इति प्रमाणबलेन विज्ञानशब्दः विशेषज्ञानवाची इति सिद्ध्यति ।

प्रश्नः– अन्नमयादयः परमात्मा इति वक्तुं न युक्तम् । '[२]तस्माद्वा एतस्माद् अन्नरसमयात् अन्योन्तर आत्मा प्राणमयः' इति अन्नमयादीनां वेदे परस्परं भेदव्यपदेशात् । एवं चेत् स्वस्मिन् स्वस्य भेदः स्यात् ।

उत्तरम्– परमात्मनः रूपेषु भेदाभावेपि भेदप्रतिनिधिना भेदकार्यनिर्वाहकेण विशेषेणैव अन्यः भगवान् इति व्यवहारः वेदेषु क्रियते । अत्र भेदः अन्यव्यवहारप्रयोजकः न भवति । एवं चेत् स्वस्मिन् स्वभेदरूपविरोधः स्यात् । भगवति यदा एवं अन्यः भिन्नः इत्यादिव्यवहारः क्रियते तदा विशेषबलेनैव

१. गी.भा.६.७

२. ६.१

कर्तव्यमित्यत्र ब्रह्मतर्कवचनं प्रमाणमस्ति । तथाहि–

[1]भेदशब्दा विशेषं तु हरावन्यत्र भिन्नताम् ।

ब्रूयुः हरेर्जीवजडैरपि भेदं हि मुख्यतः ।। इति ।

किञ्च उत्तरस्मिन्ननुवाके वरुणः भृगोः एतस्मिन्ननुवाके प्रतिपादितमेव वस्तु ब्रह्मत्वेन उपदिशति । तेनापि कारणेन अन्नमयादिकं परब्रह्म इति निश्चीयते । तथा च ब्रह्मशब्दाद् उत्तरानुवाकसंवादाच्च अन्नमयादीनां पञ्चानामपि ब्रह्मत्वे सिद्धे मयट्प्रत्ययादीनां प्राचुर्यार्थत्वव्याख्यानं युक्तमेव भवति ।

प्रश्नः– अत्र ब्रह्मवल्यां अन्नमयादिशब्दा श्रूयन्ते । उत्तरानुवाके मयट्प्रत्ययरहिताः केवलमन्नादिशब्दाः पठ्यन्ते । शब्दभेदे च निमित्तभेदेन अभिधेयभेदेन च अवश्यं भवितव्यम् । अतः कथं उत्तरानुवाकसंवादेन अन्नमयादीनां ब्रह्मत्वमुच्यते ।

उत्तरम्– भीमसेनः भीमः, सत्यभामा सत्या, पुनर्नवा नवा, काचमाची माची इत्यादौ यथा व्यवहारः तथा अन्नमयः अन्नं इत्यादि व्यवहारः अस्तु । अतः अन्नमयादीनामपि ब्रह्मत्वं सिद्ध्यति ।

प्रश्नः– विषमः अयं विचारः । भीमादिशब्दा प्रत्येकं भीमादिवाचकाः एव । अतः पर्यायेण ते प्रयुज्यन्ते । अन्नं अन्नमयः इति शब्दाः प्रत्येकं वाचका न । अन्नमयस्य अन्नशब्दः वाचकश्चेत् मयट्प्रत्ययः स्वार्थिकः स्यात् ।

१.अनु.१.१.१२

मयट्प्रत्ययश्च प्राचुर्यार्थः इति भवद्भिः उपपादितमस्ति । एवमपि पर्यायत्वं अङ्गीक्रियते चेत् अन्नमयः यज्ञः इति वक्तव्ये अन्नं यज्ञः इति प्रयोगः स्यात् । तस्मात् अन्नमयादयः कोशा एव । अन्नादयस्तु ब्रह्म इत्येव अङ्गीकर्तव्यम् ।

उत्तरम्– एतमन्नमयमात्मानमुपसङ्क्राम्य इत्यादिप्राप्यत्वेन निर्देशे मयटः स्पष्टोक्तेः भृगुवल्यामपि कोशादयः नोच्यन्ते । किन्तु ब्रह्म एव उच्यते ।

यथा ज्योतिष्टोमाधिकारे 'वसन्ते वसन्ते ज्योतिषा यजेत' इति कालविशेषविधिपरे वाक्ये ज्योतिश्शब्दो ज्योतिष्टोमस्याभिधायकः इति अधिकारबलाद् एकदेशोत्कीर्तनेन समग्रशब्दलक्षणामङ्गीकृत्य निमित्ताभिधेयैक्य-मङ्गीकरणीयम् । एवमत्राप्यन्नप्राणाद्येकदेशोत्कीर्तनेनान्नमयशब्दादिलक्षणया अन्नादिशब्दानां अन्नमयादिशब्दानां चैक्यमङ्गीकृत्य तन्निमित्ताभिधेयैक्यमभ्युपेयते । एतच्च प्राप्यतयोक्तिस्थाने मयट्प्रयोगसामर्थ्यात् । अन्यविद्यया अन्यप्राप्तिः न युक्ता । अतः एवमेव युज्यते ।

एवं सूत्रद्वयेन अन्नमयादिशब्दपञ्चस्य परमात्मवाचित्वं मयटप्रत्ययश्च अन्नमयादिशब्देषु प्राचुर्यार्थवाचित्वम समर्थितम् । आनन्दमयस्य विष्णुवाचित्वं तथा आनन्दमयशब्दघटकमयट्प्रत्ययस्य प्राचुर्यार्थत्वं हेत्वन्तरेण उपपादयति– ॐ तद्धेतुव्यपदेशाच्च ॐ ।। इत्यनेन सूत्रेण ।

॥ ॐ तद्धेतुव्यपदेशाच्च ॐ ॥

आनन्दमयप्रकरणे '[१]को ह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यात्' इति विष्णोरेव महानन्दत्वे हेतुः उपपादितमस्ति । तेन ज्ञायते विष्णुरेव आनन्दमयशब्दवाच्यः । मयट्प्रत्ययस्य तु प्राचुर्यार्थ एव वक्तव्य इति ।

यदि आनन्दमयः विष्णोरन्यः स्यात् मयट् च विकारार्थः भवेत् तदा श्रुतिः विष्णोरन्यस्य आनन्दविकारवत्वे हेतुं कमपि वदेत् । विष्णोरानन्दत्वे हेतुकथनं असङ्गतमेव भवति ।

अत्र सूत्रे तदिति षष्ठ्यन्तं सप्तम्यन्तं च तन्त्रेणोपात्तमित्युक्तं भवति । तथा च सूत्रार्थः– **तस्य** विष्णोः **तस्मिन्** महानन्दत्वे **हेतुव्यपदेशात् च** विष्णुरेव आनन्दमयः इत्यर्थः ।

प्रश्नः– ननु 'को ह्येवान्यात् कः प्राण्यात्' इति श्रुतौ आकाश-स्यानन्दत्वाभावे अननं प्राणनं कस्यापि न स्यादित्येव उच्यते । विष्णोः महानन्दत्वे कश्चिदपि हेतुः नोच्यते । तत्कथं इयं श्रुतिः विष्णोर्महानन्दत्वे हेतुः भविष्यति ।

---

१. तै.उ.१६,४

उत्तरम् -'[1]आकाशः तल्लिङ्गात्' इति सूत्रे विष्णुः आकाशशब्दवाच्यः इति समर्थ्यते । तथा च आकाशशब्दवाच्यः विष्णुः यदि पूर्णानन्दः न स्यात् लोकं कः चेष्टयेत् धर्मादौ कः प्रवर्तयेत् । अन्यस्य अस्वतन्त्रत्वात् । जगत् च निश्चेष्टं स्यात् । तथा च विष्णोः पूर्णानन्दत्वमन्यथा लोकचेष्टकत्वानुपपत्तिः । इति अन्यथानुपपत्तिः विष्णोः पूर्णानन्दत्वापरपर्यायानन्दमयत्वे प्रमाणमित्युक्तं भवति ।

।। **भगवद्व्यपारास्य पूर्णानन्दपूर्वकत्वे प्रमाणम्** ।।

१. **श्रुतिप्रमाणम् ।** अनेन 'विष्णुः आनन्दमयः जगच्चेष्टकत्वात्' इत्यनुमानमुक्तं भवति । भाष्यकारः तत्र व्याप्तिं तावत् उपपादयति । छान्दोग्यश्रुतौ 'यदा वै सुखं लभते अथ करोति नासुखं लब्ध्वा करोति सुखमेव लब्ध्वा करोति' इति व्याप्तिरुक्ता । परमेश्वरव्यापारस्य आनन्दाविनाभूतत्वमुक्तम् ।

किञ्च श्रुत्युक्तः सुखशब्दः पूर्णानन्दमेव वदतीति छान्दोग्ये सप्तमाध्याये वर्तते । 'यो वै भूमा तत्सुखं नाल्पे सुखमस्ति' इति सुखशब्दस्य पूर्णानन्द एव मुख्यार्थः इति निरूपयति । यद्यपि भूमाशब्दभाववाची वर्तते । तस्य पूर्णत्वमित्यर्थः । तथापि भावभवित्रोरैक्यात् भूमा इत्यस्य पूर्ण एव प्रतिपाद्यते । अत्र प्रकरणात् सुखेन पूर्ण इत्यर्थः । तथा च 'यो वै भूमा पूर्णसुखः स एव सुखपदेनोच्यते' इति श्रुत्यर्थः सम्पद्यते ।

---

१. ब्र.सू.१.१.२२

२. **उपपत्तिरूपप्रमाणम्** ।

चतुर्विधा प्रवृत्तिः भवति । सुखोद्रेकात् दुःखोद्रेकात् सुखसाधनरागात् दुःखसाधनद्वेषात् । तथाहि– सुखोद्रेकात् नृत्तगानादिक्रियासु प्रवृत्तिः दृश्यते । दुःखोद्रेकात् रोदनादिकं कुर्वन्तः दृश्यन्ते । सुखरागात् तत्प्राप्त्यर्था भोजनादौ प्रवृत्तिः अनुभूयते । दुःखसाधनद्वेषात् तन्निवृत्त्यर्था कण्टकोद्धरणादौ प्रवृत्तिः सुप्रसिद्धा ।

तथा च सर्वकर्तुः सर्वशक्तेः भगवतः दुखोद्रेकात् सुखसाधनरागात् दुःखसाधनद्वेषात् प्रवृत्तिः इति वक्तुं न युक्तम् । अतः परिशेषात् प्रवर्तकः भवन् परमेश्वरः सुखोद्रेकादेव प्रवृत्तिं करोतीति परमेश्वरप्रवृत्तिः पूर्णानन्दाविनाभूता इति सिद्धम् । तथा च अनुमानम् 'ईश्वरः सुखी भवितुमर्हति प्रवृत्तिकारण-त्रयरहितत्वे सति प्रवृत्तिमत्वात् उन्मत्तवत्' । कार्यानुगुणत्वाच्च कारणस्य महाप्रवृत्त्या महानन्द एव सिद्ध्यति ।

भगवान् बादरायणः अन्नमयादीनां पञ्चानां युक्त्यन्तरेण परब्रह्मत्वं प्रतिपादयितुं सूत्रं रचयति ।

।। ॐ मान्त्रवर्णिकमेव च गीयते ॐ ।।

सूत्रार्थस्तु– '[१]सत्यं ज्ञानमनन्तं ब्रह्म' इति मन्त्रवर्णप्रतिपादितमेव वस्तु उत्तरेण ग्रन्थेन गीयते । अतः अन्नमयादयः पञ्च परब्रह्मैव ।

१. तै.उ.२.३

मन्त्रवर्णे ब्रह्मपदमेव श्रूयते । तेन कथं मन्त्रवर्णस्य परब्रह्मविषयत्वनिर्णयः । ब्रह्मशब्दस्य अमुख्यवृत्त्या अन्यपरमपि सम्भवति । इति शङ्कापरिहारपूर्वकं समग्रं सूत्रसविस्तारं व्याख्याति भाष्यकारः ।

परशब्दश्रवणात् '[१]ब्रह्मविदाप्नोति परम्' इति अनुवाकस्य प्रथमवाक्ये सूचितं परब्रह्मैव भवति । तज्ज्ञानस्य मोक्षहेतुत्वोक्तेश्च परब्रह्मैव प्रतिपाद्यते इति निर्णीयते । तदेव मन्त्रवर्णेन 'सत्यं ज्ञानमनन्तं ब्रह्म' इति असाधारण-धर्मोपेततया प्रतिपादितम् । अतो मान्त्रवर्णिकं परब्रह्मैव भवति ।

'ब्रह्मविदाप्नोति परम्' इति श्रुत्या उक्ते सति शङ्कात्रयमुदेति ।

१. किं लक्षणकं तद् ब्रह्म ? कुतः इति चेत् लक्षणेन विना वस्तु समस्तव्यावृत्ततया ज्ञातुं न शक्यते ।

२. अतः केन प्रकारेण ब्रह्म ज्ञेयम् ? किं प्रतीयमानाकारस्यारोपितत्वमुपेत्य तदेवास्मीति उत अन्यथा । ब्रह्म पूर्णमिति शास्त्रेण प्रतीतमस्ति । तादृशस्य ब्रह्मणः साक्षात्कारः अस्माभिः कर्तुं न शक्यते ।

३. तथा ज्ञानसाध्या तत्प्राप्तिः नाम का ? ब्रह्म सर्वगतत्वेन नित्यप्राप्तं खलु ।

एतत्शङ्कात्रयपरिहाराय मन्त्रवर्णमुदाहरति श्रुतिः 'तदेषाभ्युक्ता' इति । अस्यार्थस्तु– **तद्** एतदाशङ्कात्रयं प्रति तत्समाधानतया **एषा** ऋग् **उक्ता** उच्यते ।

---

१. तै.उ.२.१

१. तत्र 'किं लक्षणकं ब्रह्म' इत्यस्य उत्तरम् 'सत्यं ज्ञानमनन्तं ब्रह्म' इति । सत्यं ज्ञानत्वं अनन्तत्वं प्रत्येकं ब्रह्मणः लक्षणम् । लक्षणविषये प्राप्तां अतिव्याप्तिशङ्कां भाष्यकारः परिहरिष्यति ।

२. 'केन प्रकारेण ब्रह्म ज्ञेयम्' इति द्वितीयप्रश्नस्य परिहारः 'यो वेद निहितं गुहायाम्' परिपूर्णपरिमाणमपि ब्रह्म शक्तिवशाद् भक्तानुकम्पया अल्पपरिमाणं प्रकटयत् सर्वजीवतदुपकारिकार्यकारणप्रेरकत्वेन हृदयगुहावस्थितं ज्ञेयम् ।

३. 'ज्ञानसाध्या तत्प्राप्तिः नाम का' इति अन्तिमस्य प्रश्नस्य उत्तरं 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति' उपनिषदा दत्तम् । अयं अभिप्रायः । केवलसंयोगमात्रं न ब्रह्मप्राप्तिः । ब्रह्मणा ऐक्यमपि न ब्रह्मप्राप्तिः । किन्तु तद्व्यक्तिस्थाने श्वेतद्वीपादौ ततः अत्यन्तभिन्नतया सत्यकामत्वादि-तत्सारूप्याभिव्यक्तिरूपा ब्रह्मप्राप्तिः श्रुत्या अभिप्रेता वर्तते ।

प्रश्नः– अस्तु प्रथमवाक्यसूचितविषयस्य परब्रह्मत्वम् । तदुत्थ-शङ्कापरिहाररूपः मन्त्रवर्णः तत्प्रतिपादकः तथापि प्रकृते किं प्रयोजनम् ?

उत्तरम्– ब्रह्मणः लक्षणवाक्ये यद् ब्रह्मणः **सत्यत्व**रूपलक्षणमुक्तं तदेव '[१]तस्माद्वा एतस्मादात्मन आत्मन आकाशः सम्भूतः' इति सृष्टिप्रकरणेन

१. तै.उ.३.१

'[1]स वा एष पुरुषोन्नरसमयः' '[2]तस्माद्वा एतस्माद् अन्नरसमयाद्' इति अन्नमयप्राणमयप्रकरणाभ्यां विस्तारेण प्रतिपाद्यते ।

प्रश्नः– कथं एतत्सर्वं सत्यशब्देन लभ्यते ?

उत्तरम्– यस्मात् जगतः सद्भावं यापयाति ब्रह्म तस्मात् सत्यमित्युच्यते । इति व्युत्पत्त्या सृष्टिरुच्यते । तथाहि– '[3]सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते' इति वचनात् सद्भावः जन्म इत्युच्यते । तथा च सद्भावं जन्म यापयेत् प्रापयेत् स्वव्यतिरिक्तसमस्तजगतः यस्मात् तस्मात् ब्रह्म सत्यं इति कथ्यते इति सकलजगज्जन्मकारणत्वं सत्यशब्दार्थ इति हृदि कृत्वं 'आत्मनः आकाशः' इत्यादिश्रुत्या अनुवाके सृष्टिः प्रतिपादिता ।

सत्यशब्दस्य जगत्स्रष्टृत्वार्थकत्वेपि, अवयवार्थकथनाभावात् सृष्टिप्रकरणं कथं सत्यशब्दव्याख्यानमिति चेत् नावयवकथनमेव व्याख्यानम् । किन्तु उक्तार्थस्थापनादिकमपि । प्रकृते सत्यत्वं ब्रह्मणः लक्षणमित्युक्ते पञ्चानां भूतानामेव जगज्जन्मादिकारणत्वात् भगवति असम्भवीदं लक्षणमिति शङ्कायां जातायां जगत्कारणानां महाभूतानामपि ब्रह्मैव कारणं, तदन्तर्गतं तत्सत्तादिप्रदं अतः ब्रह्मैव जगज्जन्मादिकारणमिति पूर्वोक्तं सृष्टिप्रकरणेन स्थापयति । अतः सृष्टिप्रकरणं तद्व्याख्यानरूपमित्युक्तम् ।

प्रश्नः– अन्नमयप्रकरणं सत्यशब्दार्थः कथम्?

१. तै.उ.४.१ २. तै.उ.६१ ३. भा.गी.१७.२६

उत्तरम्– 'अस्ति देवदत्तः' इत्युक्ते जीवतीति प्रतीयते । अतः अस्तित्वं सत्वं जीवनमित्यर्थः भवति । तथा च सत्यमित्युक्ते प्राणधारणलक्षणजीवनप्रदः इत्यर्थः उक्तं भवति । तथा च भूतानामुपजीव्यत्वापरपर्यायभूताद्यत्वं सत्यशब्दार्थः इत्युक्तं भवति ।

तथा 'षदलृ विशरणगत्यवसादनेषु' इति धातुव्याख्यानात् विशीर्णता शैथिल्यं सत्यशब्दार्थः । शैथिल्यं नाम यस्यामवस्थायां प्राप्तायां सर्वथा जीवनसम्भावनैव नास्ति सा शैथिल्यम् । तादृशं सत्वं यापयतीति सत्यमित्यर्थः उक्तं भवति । तथा च भूतानां संहर्तृत्वापरपर्यायं भूतातृत्वं सत्यशब्दार्थः इति प्रतिपादितं भवति ।

प्रश्नः– प्राणमयप्रकरणं कथं सत्यशब्दार्थः ?

उत्तरम्– '[१]प्राणं देवा अनुप्राणन्ति । मनुष्याः पशवश्च ये । प्राणो हि भूतानामायुः' इति श्रुतिः प्राणमयं प्रतिपादयति । तस्यार्थस्तु **देवाः मनुष्याः पशवश्च** देवादयः **प्राणं** परमात्मानं **अनु** तत्प्रेरणया **प्राणन्ति** चेष्टन्ते । स **प्राणः** परमात्मा **भूतानां** सर्वेषां **आयुः** जीवनहेतुः अतः असौ प्राण उच्यते । एतद् प्राणमयार्थः सत्यशब्देन उच्यते । तथाहि– 'षदलृ विशरणगत्यवसादनेषु' इति धातुव्याख्यानात् गतिः जीवनं च धात्वर्थः अस्ति । तथा सत् गतिः चेष्टां जीवनं जीवनहेतुं च यापयति इति सत्यमिति कथ्यते इत्युक्तं भवति ।

---

१. तै.उ.६.२

तथा च अन्नमयप्राणमयप्रकरणे सत्यशब्दार्थप्रपञ्चरूपत्वात् तद्व्याख्याने इत्युक्तं भवति ।

प्रश्नः– मनोमयविज्ञानयप्रकरणे कथं ज्ञानशब्दार्थं व्याख्यातः ?

उत्तरम्– 'मनु अवबोधने' इति धातुव्याख्यानमस्ति । तथा च मनः इति ज्ञानमिति च पर्यायं भवति । विज्ञानमयप्रकरणं ज्ञानशब्दार्थ इति स्पष्टं वर्तते । '[१]विज्ञानं यज्ञं तनुते कर्माणि तनुतेपि च । विज्ञानं देवाः सर्वे । ब्रह्म ज्येष्ठमुपासते । विज्ञानं ब्रह्म चेद्वेद तस्माच्चेन्न प्रमाद्यति । शरीरे पाप्मनो हित्वा । सर्वान् कामान् समश्नुत इति ।' अस्यार्थस्तु– विज्ञानं विज्ञानमयः वासुदेवः यज्ञं यज्ञसमुदायं कर्माणि यजमानऋत्विगादिषु सर्वत्र स्थित्वा यज्ञान् तदङ्गकर्मणि च तनुते ।

'ज्ञानं ब्रह्म' इति लक्षणे अभिहिते सकलचेतनसाधारणमेतल्लक्षणं अतः अतिव्याप्तिरित्युक्ते अत्र प्रकरणयोः केवलं ज्ञानवत्वमात्रं न विवक्षितं अपि सकलपदार्थसामान्यविशेषाकारविषयज्ञानं भगवतः लक्षणत्वेन विवक्षितम् । अत न कापि अनुपपत्तिरिति प्रपञ्चनं कृतम् ।

प्रश्नः– आनन्दमयप्रकरणेन आनन्त्यं कथं व्याख्यातं भवति ?

उत्तरम्– अनन्तपदनिर्वचनरूपव्याख्यानपरं आनन्दमयप्रकरणमिति न वदामः । किन्तु अनन्तं ब्रह्मणि असम्भावितमित्युक्ते आनन्दमयोक्त्या

१. तै.उ.११.२

अनन्तत्वं उपपाद्यते । तथाच अनुमानं 'परमेश्वरः अनन्तः पूर्णानन्दत्वात्' । अत्र अन्वयव्याप्तिस्तु नोपलभ्यते । अतः 'यदि अनन्तः न स्यात् तर्हि पूर्णानन्दः न स्यात्' इत्युक्त्या अन्तवति पूर्णानन्द न भवति इति सर्वेषां अनुभवसिद्धत्वात् व्यतिरेकव्याप्तिरस्त्येव । ब्रह्मणि पूर्णानन्दत्वं तु '[1]को ह्येवान्यात् कः प्राण्यात्' इति श्रुत्या सिद्धं वर्तते । तच्च उपपादितम् ।

अतः मन्त्रवर्णाद् उत्तरया श्रुत्या च विष्णुरेवान्नमयादिशब्दवाच्यः इति प्रतिपादितं भवति ।

ॐ नेतरोनुपपतेः ॐ

सूत्रकाराः एतावत्पर्यन्तं स्वपक्षसाधनं विधाय इतः परं परपक्षप्रतिक्षेपं कुर्वन्ति ।

इतः जीवः शरीरादिकोशाः वा प्रकृतिर्वा चतुर्मुखादिर्वा रुद्रो वा इन्द्रबृहस्पतिर्वा अन्नमयादिप्रकरणैः न प्रतिपाद्याः । कुतः इति चेत् अनुपपत्तेः '[2]सर्वं वै तेन्नमाप्नुवन्ति येन्नं ब्रह्मोपासते' '[3]सर्वमेव ते आयुर्यन्ति । ये प्राणं ब्रह्मोपासते' इत्यादिना अन्नमयादिज्ञानात् मोक्षरूपफलमुच्यते । जीवादिज्ञानेन मोक्षः न लभ्यते । अतः जीवादिवाचित्वे मोक्षरूपफलप्राप्तिः न स्यात् ।

---

१. तै.उ. १६.४

२. तै.उ. ५.४

३. तै.उ. ७.३

'तमेवं विद्वानमृत इह भवति । नान्यः पन्था अयनाय विद्यते' इति श्रुतौ विष्णुज्ञानादेव मोक्षरूपफलप्राप्तिः श्रूयते । अन्यज्ञानस्य मोक्षहेतुत्वं निषिध्यते च । अतः अनुपपत्तिरस्त्येव ।

प्रश्नः– तमेवं इति श्रुत्या विष्णुः प्रतिपाद्यः इति कथं निर्णयः ?

उत्तरम्– 'सहस्रशीर्षा पुरुषः' इति प्रकृतपुरुषं तमिति परामर्शयति । अतः तमिति श्रवणात् य इति सहस्रशीर्षा पुरुषः तं एवं विद्वान् अमृत भवति । अन्यः परमपुरुषज्ञानात् अन्यः पन्था अयनाय मोक्षास्य न विद्यते ।

प्रश्नः– ननु अत्र पुरुषज्ञानात् मोक्षः उच्यते । तत् कथं विष्णु-ज्ञानादित्युच्यते ?

उत्तरम्– पुरुषः पर आत्माजो ब्रह्म नारायणः प्रभुः ।

महानानन्द उद्धिष्णुर्भग ओम इतीर्यते ।।

स्वयं नारायणो देवो नान्यस्यैतानि कस्यचित् ।

तस्मादोमित्युदाहृत्य यज्ञदानादि कुर्वते ।।

सूक्तेन पौरुषेणैनं यजन्त्यध्यात्मकोविदाः ।

इति पैङ्गिश्रुतिसद्भावात् पुरुषशब्देन नारायण एव उच्यते ।

किञ्च पैङ्गिश्रुतिः स्वयं युक्तिमाह । नारायणस्य पुरुषशब्दवाच्यत्वादेव ये नारायणं यजन्ति ते पुरुषसूक्तेन तं यजन्ति ।

तस्मात् नारायणस्य पुरुषशब्दवाच्यत्वात्, तद्ज्ञानादेव मोक्षाभिधानाद्, अन्यज्ञानेन मोक्षस्य अलभ्यत्वात्, अन्नमयादिज्ञानेन मोक्षप्रतीतेश्च अन्नमयादयः नारायणः इति सिद्ध्यति ।

प्रश्नः– परमात्मपरिग्रहेपि अनुपपत्तिरस्त्येव । '[१]ओषधीभ्योन्नम् । अन्नात् पुरुषः' इति ओषधिकार्यान्नविकारं शरीरं पुरुषपदेनोवाच । तमेव 'स वा एष पुरुषः अन्नरसमयः' पुरुष इति परामृश्य अन्नरसमयः इति आह । अतः अन्नमयः ईश्वर इति वक्तुं न शक्यते । तस्य अन्नकार्यत्वाभावात् । तस्मात् ब्रह्मणः व्यतिरिक्तं कोश इत्येव वक्तव्यम् । तत्प्रवाहे पतितत्वाच्च प्राणमयादयश्चापि परमात्मा न भवन्ति ।

उत्तरम्– '[२]ब्रह्मविदाप्नोति परम्' '[३]सत्यं ज्ञानमनन्तं ब्रह्म' इति ब्रह्मशब्दोदिते विष्णौ '[४]तस्माद्वा एतस्मादात्मनः' इत्यात्मशब्दं प्रयुज्य तस्मात् आत्मनः सकाशात् आकाशसृष्टिं प्रोवाच । अनेन यद् सत्यज्ञानानन्तत्वगुणोपेतं ब्रह्म तद् आत्मा इत्यपि उक्तं भवति । आत्मनः विष्णोः सकाशात् चतुर्विधा-काशादिसृष्टिं श्रुतिः प्रतिपादयति ।

तथाहि– आत्मनः विष्णोः सकाशाद् भूतं भूताभिमानी तद्देहः अन्तर्नियामक इति चतुर्णां सृष्टिः भवति । तथा हि- विष्णोः सकाशात्

---

१. तै.उ. ४.७ ३. तै.उ. २.१

२. तै.उ. २.१ ४. तै.उ. ४.१

आकाशख्यं भूतं अजायत । तद्भूतं तदभिमानिनः गणपतेः देहः अभूत् । भूताभिमानी देहसम्बन्धेन जातः । तस्मिन् नियामकतया भगवान् विष्णुरपि एकेन रूपेण प्रादुर्भूतः स्थितः अभूत् । अतः भगवतः, भूतस्य, भूताभिमानिनः आकाश इत्येव नाम । भगवति तु मुख्यवृत्या आकाश नाम आ समन्तात् काशनात् प्रकाशनात् इति व्युत्पत्या भवति ।

एवं चतुर्विधआकाशाद् चतुर्विधवायूत्पत्तौ अपि भूतं, तदभिमानी, अभिमाने देहः, जाताः । ब्रह्म तन्नियामकतया तस्मिन् एकेन रूपेण प्रादुरभूत् । भगवान् बलज्ञानरूपत्वात् वायुशब्देन मुख्यवृत्या प्रतिपाद्यते ।

एवं चतुर्विधवायोः चतुर्विधाग्नेः जनने भूतं, तदभिमानी, अभिमाने देहः, जाताः । ब्रह्म तन्नियामकतया तस्मिन् एकेन रूपेण प्रादुरभूत् । स्वतः प्रवर्तयितुं अशक्यं अस्वतन्त्रं जगत् प्रवर्तयतीति अग्निनामकः भगवान् अग्निशब्देन मुख्यवृत्या प्रतिपाद्यते ।

चतुर्विधतेजसः चतुर्विधापः प्रादुर्भावेपि भूतं, तदभिमानी, अभिमाने देहः, जाताः । ब्रह्म तन्नियामकतया तस्मिन् एकेन रूपेण प्रादुरभूत् । सम्यक् जगत्पालनात् अपशब्देन मुख्यवृत्या वाच्यः भगवान् । तस्य पुंरूपवत् स्त्रीरूपस्यापि सद्भावात् स्त्रीलिङ्गशब्दप्रयोगः, तथा बहुरूपसद्भावात् बहुवचन-प्रयोगश्च युज्यते ।

चतुर्विधाब्धः चतुर्विधपृथिव्याः जननेपि चतुर्विध ब्रह्म तन्नियामकतया तस्मिन् एकेन रूपेण प्रादुरभूत् । प्रथितत्वात् अत्यन्तविस्तृतत्वात् भगवान् मुख्यवृत्या पृथिवीशब्दप्रतिपाद्यः ।

चतुर्विधपृथिव्याः सकाशात् चतुर्विधौषधिजनने भौतिकं तदभिमानी, अभिमानिनः देहः जाताः । भगवान् नियामकतया तस्मिन् प्रादुरभूत् । जठराग्निना दग्धानां आश्रयत्वात् भगवान् मुख्यवृत्या ओषधिनामकः ।

चतुर्विधौषध्याः सकाशात् चतुर्विधान्नजनने भौतिकं तदभिमानी, अभिमानिनः देहः जाताः । भगवान् नियामकतया तस्मिन् प्रादुरभूत् । सर्वभूतोपजीव्यत्वात् सर्वजगत्संहर्तृत्वाच्च मुख्यवृत्या भगवान् अन्नशब्दवाच्यः ।

चतुर्विधान्नात् सकाशात् त्रिविधपुरुषस्य उत्पत्तिः भवति । भौतिकं देहं, तदभिमानिजीवः देहसम्बन्धेन जातः, तदन्तर्यामितया भगवान् प्रादुर्भूतः । अत्र देहातिरिक्तं भौतिकं किमपि नास्ति अतः त्रिविधा सृष्टिः भवति । भगवान् पुरि देहे शयनात् नियामकतया अवस्थाननिमित्तात् परममुख्यवृत्या पुरुषशब्दवाच्यः सन् सर्वेषां देहे तिष्ठति ।

अत्रोक्तेषु सर्वासु चतुर्विधसृष्टिसु हरेः जननं नाम तत्तद्पदार्थेषु तत्प्रवर्तकतया, तेषु क्रियाप्रवर्तकतया प्रादुर्भावः । अभिमानिदेवस्य स्वाभिमन्यमाने वस्तुनि 'ममेदम्' इति बुद्धिः । तदेव अभिमानोत्पत्तिः ।

अभिमानिशरीरस्य तु पूर्वस्मात् भूतेभ्यः भौतिकेभ्यः वा साक्षात् उद्भवः एव विवक्षितः ।

तथा च '[१]ओषधीभ्यो अन्नम् । अन्नात् पुरुषः' इति पुरुषं परामृश्य '[२]स वा एष पुरुषो अन्नरसमयः' इति पुरुषस्य अन्नरसमयत्वे न कोपि विरोधः सम्भवति । तस्मात् एतस्मात् इति आत्मपदोदितस्यैव परामर्शकरणात् । अन्नरसमय परमात्मा न इति वक्तुं न शक्यते । कुतः इति चेत् । श्रुत्यर्थस्तु– **तस्मात्** परप्राप्तिकामेन ज्ञातव्यतयोक्तात् **एतस्मात्** पुनः सत्यज्ञानानन्तत्वेन लक्षितात् **आत्मन** इति प्रकृतानुसन्धानसम्भवात् । सन्निहितं परित्यज्य दूरस्थं कुतः परमर्श्यते इति चेत् आत्मादिपुरुषान्तसर्वशब्दैः परमात्मनः प्रकृतत्वात् न दोषः । प्रादुर्भावस्यैव ईश्वरजन्मत्वेन व्याख्यानात् न कापि अनुपपत्तिः । कुतः परमेश्वरस्य प्रादुर्भाव एव जन्म इति कथ्यते । लोकानुसारेण कुत न उच्यते इति '[१]कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः' इति सूत्रे प्रादुर्भाव एव परमेश्वर जन्म इति उपपादयिष्यमाणत्वात् । तत्र 'य आकाशे तिष्ठन्' इत्यादिप्रमाणसद्भावात् हरिः न केवलं मूलकारणवाचकात्मशब्दवाच्यः अपि तु कार्यत्वे सति कारणमवान्तरकारणं तद्वाचकाकाशादिशब्दवाच्यश्च इति उपपादयिष्यते ।

प्रश्नः– यदि परमात्मनः प्रादुर्भाव एव श्रुत्या प्रतिपादितः तर्हि भूतादिसृष्टिरप्रामाणिकी स्यात् ।

१.तै.उ. ४.७ २.तै.उ. ४.१

उत्तरम्– न सम्भवति । आकाशादिपदानां भूतादिपरत्वमपि अङ्गीकुर्मः । एवं चेत् श्रुतेः अनेकार्थतापत्तिः स्यात् इति चेत् । श्रुतेः अनेकार्थतां '[1]समाकर्षात्' इति सूत्रे उपपादयिष्यामः ।

प्रश्नः– यदि सम्भवशब्दस्य प्रादुर्भाव इति अर्थः उच्यते । तर्हि भूतादीनामपि प्रादुर्भाव इत्यर्थः स्यात् । तथा सर्वेषामपि स्थितानां व्यक्ति इत्यायातम् । तथा च सत्कार्यवादप्रसक्तिः । द्वैतिनस्तु सदसत्कार्यवादिनः । अतः अपसिद्धान्तः स्यात् ।

उत्तरम्– सामान्यतः श्रुतं सम्भवशब्दः । तस्य यथायोग्यं व्याक्रियते ।

प्रश्नः– ननु एवं आकाशादिपुरुषान्तशब्दैः प्रकृतस्य परामर्श इत्यङ्गीकारे भूतादिचतुष्टयस्यापि आकाशादिशब्देन प्रकृतत्वात् 'स वा एष' इत्यस्य सर्वपरामर्शरूपत्वापत्या अन्नरसमयस्य प्रकृतसर्वात्मकत्वं स्यात् ?

उत्तरम्– प्रकृतानामपि भूतादीनां त्यागेन हरेरेव परामर्शः इत्यङ्गीक्रियते ।

प्रश्नः– एवं क्रियते चेत् अन्याय्यम् । अर्धजरतीयतापत्तिः इति चेत् ।

उत्तरम्– न । आकाशादिशब्दैः परममुख्यवृत्त्या हरेरेव वाच्यत्वेन तस्यैव उत्कटतया बुद्धिसन्निधानात् ।

ईश्वरस्यैव अन्नमयादिपञ्चरूपताज्ञापनाय प्रकरणान्तरारम्भार्थत्वात् ईश्वर-परामर्शः सार्थकमेव । परमात्मनः लक्षणविवरणार्थत्वेन उपयोगस्योक्तत्वाच्च ।

१.ब्र.सू ३.२.१५

तस्मात् अन्नमयादिशब्दैः परमात्मपरिग्रहे न कापि अनुपपत्तिः । अतः एव तत्प्रवाहपठितानां प्राणमयादीनामपि परमात्मा एव गृहीतव्यः । तेषामब्रह्मत्वं न कल्पनीयमिति सिद्धम् ।

।। अन्नरसमयशब्दस्वारस्यनिरूपणम् ।।

प्रश्नः– ननु पूर्वोक्तमुपपादनं बहुसंविधानसाध्यम् । अतः 'स वा एष पुरुषोऽन्नरसमयः' इति शरीरमात्रपरामर्शः क्रियते इति किं न स्यात् ?

उत्तरम्– यदि जीवमात्रपरामर्शकः स्यात् तदा 'एष पुरुषः' इत्यावता अलम् । 'स' इत्यस्य वैयर्थ्यम् स्यात् । यदि शरीरमात्रपरामर्शः 'स वा एष पुरुषोऽन्नमय' इत्येव अस्तु । रसशब्दस्य व्यर्थं भवति । श्रुतौ 'अन्नात् पुरुषः' इत्येव प्रकृतत्वात् । रसशब्दस्य प्रयोजनाभावात् ।

शरीरपरामर्शे 'तस्येदमेव शिरः अयं दक्षिणः पक्षः अयमुत्तरः पक्षः अयमात्मा इदं पुच्छं प्रतिष्ठा' इति सर्वं व्यथमेव स्यात् । शरीरशिरःप्रभृतीनां प्रत्यक्षसिद्धत्वेनोपदेशानपेक्षत्वात् ।

द्वैतिनां पक्षे तु अन्नमय इत्येवोक्ते प्राकृतान्नमयत्वं प्रतीयेत । तन्निवृत्त्यर्थं अन्नरसमय इत्युच्यते इति सार्थक्यम् ।

अस्मत्पक्षे रसशब्दो सारवीची । 'रसः सारो वरश्चेति शब्दाः पर्यायवाचकाः' इति भाष्योक्तप्रमाणबलेन तस्यार्थस्य सिद्धत्वात् । अन्नरसमयः

अन्नसारमयः इत्युक्तं भवति । तात्पर्यं तु सारान्नमयः इत्यर्थः । तेन अन्नशब्दार्थेषु मुख्यार्थः अत्तृत्वादिलक्षणस्तत्प्रचुरः इत्युक्तं भवति ।

प्रश्नः– ननु भवत्पक्षेपि अनुपपत्तिः अस्त्येव । ईश्वरप्रतिपाद्यते इत्युक्ते तस्य शिरःप्रभृत्यवयवाभावात् 'तस्येदमेव शिरः अयं दक्षिणः पक्षः अयमुत्तरः पक्षः अयमात्मा इदं पुच्छं प्रतिष्ठा' इत्यादिकं व्यर्थमेव ।

उत्तरम्– अनुपपत्तिः नास्ति । '[1]प्रकाशवच्चावैयर्थ्यम्' इति सूत्रे रूपवत्वात् सौन्दर्यादिवत्वस्य शरीरित्वस्य समर्थनात् ।

प्रश्नः– तथापि अनुपपत्तिः भवत्येव । ईश्वरशिर आदीनां अप्रत्यक्षत्वेन पुन '[1]तस्येदमेव शिरः' इत्यादिनिर्देशो नोपपद्यते ।

उत्तरम्– जीवशिरआदयस्तु प्रत्यक्षसिद्धाः वर्तते । तेषु परमेश्वर-शिरःप्रभृतीनां स्थितेः लक्षणया इदमिति निर्देशः युज्यते । यथा अप्रत्यक्षेपि जानुनि प्रत्यक्षवस्त्रप्रावृते 'इदं जानु' इति निर्देशः तथा सम्भवति । प्रत्यक्षशरीरपरिग्रहे वैयर्थ्यमेव । रूढलक्षणात्वात् न प्रयोजनोक्तिरपेक्ष्यते ।

किञ्च '[2]सर्वमेव त आयुर्यन्ति' प्राणमयज्ञानात् मोक्ष श्रूयते । सर्वमायुः नाम कदापि मोक्षाभावः एव । मोक्षे सर्वमायुः भवति । शरीरपरिग्रहे तज्ज्ञानात् मोक्षप्रसक्तिः नास्त्येव । 'तमेवं विद्वान्' इत्यादिश्रुतिविरोधापातात् । अतः प्राणमयः ब्रह्म एव भवितुमर्हति ।

---

१. तै.उ. ४.२ २. तै.उ. ७.४

प्रश्नः– ननु '[१]विकारशब्दान्नेति चेन्न प्राचुर्यात्' इत्यत्र सूत्रकारेणान्नमयादीनां ब्रह्मत्वे एकानुपपत्तिः परिहृता । उपलक्षणया सर्वानुपपत्तिपरिहारो सूचितः । अतः भाष्यकारेणापि तत्रापि अनुपपत्तिपरिहारः व्याख्यातः । अतः अत्र ये अनुपपत्तिपरिहाराः कृत तत्रैव वक्तव्याः । '[२]तद्धेतुव्यपदेशाच्च' इत्यनन्तरं पुन अस्मिन् सूत्रे व्याख्याने अनुपपत्तिपरिहारे कारणं किम् ? कारणाभावेपि व्याख्याने उत्सूत्रितत्वं स्यात् ।

उत्तरम्– अन्नमयादीनां पञ्चानां अब्रह्मत्वोपपादकोपपत्त्याभासाः तत्र दूषिताः । अन्नमयमात्रविषयानुपपत्तिपरिहारस्त्वत्रेत्यनेन ज्ञापयति ।

किञ्च केचन '[३]नेतरोनुपपत्तेः' इति सूत्रं अन्नमयः न ब्रह्म परामर्शाद्यनुपपत्तेः इति व्याकुर्वते । तदपि निराकर्तुमत्र व्यवधानेन क्रियते इति अदोषः एव ।

प्रश्नः– जीव एवान्नमयादिशब्दार्थः । स ह्यन्नविकारशरीरावच्छिन्नत्वात् अन्नमयः भवति । प्राणमनोबुद्ध्यानन्दोपाध्यवच्छिन्नत्वात् प्राणमयशब्दवाच्यश्च जीव एव । प्राणादिविकारः घटाकाशः घटविकार इव घटते । तथा च 'स वा पुरुषः' इति परामर्शः तदुपाधिविषयतया श्लिष्टतरो भवति । रसशब्दश्च स्थविष्ठभागत्यागेन सूक्ष्ममात्रविवक्षया भविष्यति । तथा सति अन्नमयप्रकरणे 'इदं'

---

१. ब्र.सू.१.१.१३

२. ब्र.सू. १.१.१४

३. ब्र.सू. १.१.१६

इति निर्देशश्च मुख्यार्थः सम्भवति । प्राणमयादिषु सर्वत्र शिरःप्रभृत्यवयवानां वक्तव्यत्वेन तत्प्राये सिद्धस्यापि कथनोपपत्तेः । जीवस्यैव प्राणमयादित्वे शरीरित्वं अवयवित्वं प्रियादियोगः ब्रह्मपुच्छत्वं च इत्येतत्सर्वं समञ्जसं भवति ।

प्रश्नः– एवं प्राणमयादीनां अब्रह्मत्वे तर्हि कोशा एव अङ्गीक्रियताम्, 'अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमया मे शुद्ध्यन्ताम्' इति श्रुत्यन्तरानुगुण्यं च भवति इति चेत्।

उत्तरम्– कोशेषु ब्रह्मशब्दाद्यनुपपत्तेः जीवः एव वाच्यः इति वक्तव्यम् । अन्यत्वमन्तरत्वं शरीरत्वं चोपाध्यपेक्षया जीवेप्युपपद्यन्ते ।

प्रश्नः– जीवपक्षेप्यनुपपत्तिरस्त्येव । ब्रह्मशब्दः निराबाधः । परमात्मानं विना कोशेषु नोपपद्यते । '[१]अद्यते अत्ति' इत्यत्रोक्तं सर्वाद्यत्वं सर्वातृत्वं '[२]प्राणं देवाः' इति सर्वदेवादिचेष्टकत्वं '[३]यतो वाच' इति वाङ्मनसागोचरत्वं '[४]विज्ञानं देवा' इति सर्वदेवोपास्यत्वं ज्येष्ठत्वं '[५]सोकामयत' इति सङ्कल्पपूर्वकं सर्वस्रष्टृत्वं सर्वान्तरत्वं इत्यादिकं अल्पतरज्ञानशक्त्यादिमति जीवे न सम्भवन्ति । तद्धेतुव्यपदेशश्च असङ्गतं भवति । मान्त्रवर्णिकव्याख्यानं बाध्यते । जीवज्ञानात् मोक्षानुपपत्तिश्च बाधकानि सन्ति ।

---

१. तै.उ. ५.७
२. तै.उ. ६.२
३. तै.उ. ९.२
४. तै.उ. ११.२
५. तै.उ. १४.१

उत्तरम्– अत्र उपनिषदभिप्रायस्तु भवदुक्तात् अन्यदेव वर्तते । उपनिषदि जीवब्रह्मणोरेकत्वं विवक्षितम् । तत्र यानि शुद्धविरोधीनि वाक्यानि सन्ति तानि उपहितसंसारिस्वरूपापेक्षया प्रवृत्तानि । ब्रह्मशब्दानि तत्स्वभआवसिद्ध-परमात्मस्वरूपापेक्षाणि । ऐक्यविवक्षा तु वाक्यशाबल्यान्यथानुपपत्या गम्यते । अत्र गमकं किमिति चेत् विशुद्धविरोधिनां वाक्यानां परमात्मनि सर्वथानुपपत्तेः अभेदे सत्यपि महाकाशधर्म एवावच्छिन्नाकाशे व्यवह्रियते 'यावान् वायमा-काशस्तावानेषोन्तर्हृदय आकाशः' इति । न तु परिच्छिन्नधर्मः वितस्तिमात्रत्वम् । ब्रह्म पुच्छमित्यस्यापि अस्य जीवस्य ब्रह्म पुच्छं आयतनमधिष्ठानं निजं स्वरूपमित्यर्थोपपत्तेः । तस्मात् 'नेतरः' इत्यनुपपन्नमिति ।

एतदाशङ्कां परिहर्तुं सूत्रकारः उत्तरं सूत्रं सूत्रयामास ।

ॐ भेदव्यपदेशात् ॐ

अस्यां उपनिषदि जीवपरमात्मनोः यदि अभेदः विवक्षितः स्यात् तर्हि एवं श्रुतिं व्याख्याताम् । अत्र भेदः एव विवक्षितः अस्ति ।

१. **नियम्य-नियामकतया भेदः** ।

'[१]स यश्चायं पुरुषे यश्चासावादित्ये स एकः' इति पुरुषादित्यशब्दोप-लक्षितापकृष्टोत्कृष्टसकलजीवानां नियम्यतया अधिकरणत्वे परमात्मनः

१. तै.उ. २१.१

नियाकतया भेदस्य अत्रोपदेशात् । तथा 'भीषास्मात्' इत्यत्रापि नियम्य-नियामकतया भेदव्यपेदेशात् ।

२. **लब्धृलब्धव्यतया भेदः ।**

'[१]रसं ह्येवायं लब्ध्वानन्दी भवति' इति लब्धृलब्धव्यतया भेदः एव उच्यते ।

३. **उपासकोपास्यतया भेदः ।**

'[२]यदा ह्येवैषः' इत्युपासकोपास्यतया भेदः व्यपदिश्यते ।

४. **प्राप्तृप्राप्यतया भेदः ।**

'[३]उपसङ्क्रामति' इति प्राप्तृप्राप्यतया भेदः विशिष्य उच्यते ।

केवलब्रह्मतया एव वाक्यानां समञ्जसीकृतत्वात् वाक्यशाबल्या-न्यथानुपपत्या जीवपरत्वं वक्तुं न शक्यते । अन्यथानुपपत्तेः अन्यथापि उपपन्नत्वात् । अतः अन्नमयादिशब्दवाच्यः ब्रह्मैव भवति ।

परमात्मनः जीवेन भेदः अस्ति इति कथमुच्यते । अनुमानतः तदभेदस्य वक्तुं शक्यते एव । तथा च अन्नमयात्वादिकं जीवस्य भविष्यत्येव । भेदव्य-पदेशविरोध न सम्भवत्येव । अनुमानविरोधेन व्यपदेशस्यैवान्यपरत्वोपपत्तेः इत्याशङ्कां परिहर्तुं सूत्रमाह–

१. तै.उ.१६.३

२. तै.उ १७.१

३. तै.उ.२१.८

ॐ कामाच्च नानुमानापेक्षा ॐ

केवलानुमानेन जीवब्रह्माभेदसाधयितुं न शक्यते । अनुमानस्य कामचारित्वात् पुरुषेच्छानुसारिप्रवृत्तिमत्वात् ।

परेण हि– विमतानि शरीराणि मद्भोगायतनानि शरीरत्वात् मच्छरीरवत् । तथा विमतानि इन्द्रियाणि ममैव करणानि इन्द्रियत्वात् सम्प्रतिपन्नेन्द्रियवत् इत्यादीनि विवक्षितानि । एतानि अनुमानानि प्रत्यक्षागमविरुद्धत्वात् जीवब्रह्माभेदं न साधयन्ति ।

अत्र जीवानामुपहितस्वरूपाणां साक्षादभेदः न सम्भवति । प्रत्यक्षागमविरोधात् । अतः निरुपाधिकेन रूपेणाभेदे एव अनुमानं पर्यवस्यति । पूर्वोक्तानुमानेषु प्रतिक्षेत्रं क्षेत्रज्ञानामभेदं साधयन्ति । न तु जीवानां परमात्माभेदम् । तस्याविवक्षितत्वात् । अत एव 'विमताः आत्मानः परमात्मनः तत्वतो न भिद्यन्ते आत्मत्वात् परमात्मवत्' इत्यादिकं नोदाहृतम् ।

अनुमानस्य कामचारित्वं कथमिति चेत् । तानुदाहरति ।

१. आत्मा जडः ज्ञानानाश्रयः वस्तुत्वात् घटवत् ।

२. आकाशः घनः निबिडावयवः प्रमेयच्वात् पाषाणवत् ।

३. जडं घटादिकं चेतनं प्रमेयत्वात् आत्मवत् ।

४. ब्राह्मणेन सुरा पेया द्रवद्रव्यत्वात् क्षीरवत् ।

।। भेदसमर्थनस्य पौनरुक्तिपरिहारः ।।

प्रश्नः– ननु '[१]अथातो ब्रह्मजिज्ञासा' इत्यत्र जीवेशभेदः समर्थितः । तथा जन्मादिसूत्रेपि जीवब्रह्मभेदः समर्थितः । अत्राधिकरणे पुनः तत्साधने पौनरुक्तिः स्यात् ।

उत्तरम्– जिज्ञासावाक्ये अभेदशङ्कायां तद्गतभेदशब्देनैव भेदसमर्थनम् । तथा जिज्ञास्यस्य ब्रह्मणो जीवत्वे शङ्किते तत्पूर्ववाक्योक्तलक्षणेन भेदसाधन-मित्यादिकं प्रतिपादितम् । एवमेव उत्तराधिकरणे '[२]भेदव्यपदेशाच्चान्यः' इत्यादावपि पुनरुक्ततादोषपरिहारः क्रियते ।

प्रश्नः– तर्हि अभेदः प्रधानतया कुत्र निराक्रियते इति चेत्

उत्तरम्– '[३]पृथगुपदेशात्' इत्यत्र तु प्रधानतया जीवब्रह्माभेदः प्रधानतया समर्थ्यते ।

भाष्यदिशा–

आनन्दमयेन ब्रह्मण जीवानां ब्रह्मादीनां भेदः इत्यस्तु तथापि सः भेदः सांसारिकः व्यावहारिकः न पारमार्थिकः इत्याशङ्कां परिहर्तुं भगवान् सूत्रकारः सूत्रामारचयति ।

---

१. ब्र.सू.१.१.१

२. ब्र,सू,१,१,२१

३. ब्र.सू.२.२.२८

ॐ अस्मिन्नस्य तद्योगं शास्ति ॐ

'[1]सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता' '[2]अनिलयनेभयं प्रतिष्ठां विन्दते' '[3]एतमानन्दमयमुपसङ्क्रामति' इति श्रुतयः **अस्मिन्** प्रकरणे **अस्य** जीवस्य **तद्योगं तेन** आनन्दमयेन सह मुक्तावपि **योगं** सम्बन्धमेव **शास्ति** । चशब्दः पूर्वोक्तयुक्तिसमुच्चयार्थकः ।

अतः अन्नमयादयः विष्णुरेव

अनुव्याख्यानरीत्या–

शरीरादिकोशाः एवान्नमयादिशब्दवाच्या इति पक्षः 'नेतरोनुपपत्तेः' इत्यत्र साधारणदोषेण दूषितमस्त्येव । विशेषदोषेण दूषयितुं इदं सूत्रप्रवृत्तम् ।

ॐ अस्मिन्नस्य तद्योगं शास्ति ॐ

अस्य ब्रह्मविदः ज्ञानिनः फलत्वेन **तद्योगं** अन्नमयादिभिः योगं तत्प्राप्तिं **अस्मिन्** स्थानद्वये अनुवाकद्वयेपि '[4]एतमन्नमयमात्मानं उपसङ्क्रामति' '[5]एतमन्नमयमात्मानमुपसङ्क्रम्य' इति **शास्ति** शंसति । शरीरादिकोशप्राप्तिः ब्रह्मविद्याफलमिति वक्तुं नोचितम् । कुत इति चेत् शरीरादयः शोकहेतवः ।

१. तै.उ.२.५
२. तै.उ.१७.१
३. तै.उ. ४.८
४. तै.उ.२१.८
५. तै.उ. १०.७

ब्रह्मज्ञानिनं प्रति 'तरति शोकमात्मवित्' इति शोकतरणमुच्यते । अतः युक्तमेव भाष्यकारव्याख्यानम् ।

प्रश्नः– श्रुतिस्थ'उपसङ्क्रमण'शब्दस्य यदि प्राप्तिरित्यर्थः स्यात् । एवं न वदामः । किन्तु अयं अतिक्रमार्थः ।

उत्तरम्– १.उपोपसर्गपूर्वकस्य क्रमेः प्राप्ति इत्येवार्थः । न तु अतिक्रमः इत्यर्थः । अतः उपोपसर्ग एव बाधकः ।

२. श्रुतिस्थोपपदपरित्यागेन अश्रुतातिपदप्रक्षेपे श्रुतपरित्यागाश्रुत-कल्पनादोषः स्यात् ।

यदि उपसर्गस्य अनेकार्थत्वात् उपोपसर्गस्यैव अतिशब्दार्थः इति व्याख्यायते इति चेत् नियामकेन विना प्रसिद्धार्थपरित्यागाप्रसिद्धार्थस्वीकारः अतिलज्जाहेतुः ।

अस्तु वा उपसङ्क्रमशब्दस्य अतिक्रमणार्थता तथापि ब्रह्मविदा शरीरत्यागे सति अन्नमयस्य शरीरत्वात् अतिक्रमणं कृतमेव भवति । तथा प्राणमयस्यापि परित्यागो भवत्येव । मरणस्य शरीरत्यागरूपत्वात् । पुनः 'अस्माल्लोकात् प्रेत्य । अन्नमयमात्मानमुपसङ्क्रामति' इत्युक्तिः पुनरुक्तं अयुक्तं च भवति ।

उपसङ्क्रमणशब्दस्य प्राप्त्यर्थत्वे तु 'ब्रह्मविदाप्नोति परम्' इति उपक्रमानुगुणं च भवति ।

ननु तर्हि महानारायणोपनिषदि 'अन्नमयप्राणमयमनोमयविज्ञान-

मयानन्दमया मे शुद्ध्यन्ताम्' इति शुद्धिप्रार्थना श्रूयते । तत् कथं अन्नमयादयः परमात्मा इत्युच्यते इति चेत् तत्र कोशपरा एव श्रुतिः इत्यङ्गीकुर्मः । तैत्तिरीयश्रुतौ तु प्रमाणसद्भावात् सूत्रानुगुण्याच्च ब्रह्मपरा इति प्रतिपादयामः ।

किञ्च कोशे अन्नमय इति शब्दप्रयोगः वर्तते । एते परमात्मरूपविशेषाः 'अन्नरसमयः' इत्युपक्रमात् 'रसो वै सः' इति वाक्यशेषाच्च 'अन्नरसमयादय' इति अन्नमयादिभ्य कोशेभ्यः शब्दान्तरन्यायेनापि अन्ये भविष्यन्तीति सर्वमनवद्यम् ।

शब्दान्तरन्यायस्तु– शब्दान्तरे कर्मभेदः कृतानुबन्धत्वात् ।

'[1]अथैष ज्योतिरथैष विश्वज्योतिरथैष सर्वज्योतिरेतेन सहस्रदक्षिणेन यजेत' इति । तत्र संशयः । किं प्रकृतमेव ज्योतिष्टोमं ज्योतिरादिशब्दैरनूद्य सहस्रदक्षिणाख्यो गुणो विधीयते उत कार्यान्तराण्येतन्नामान्येवं दक्षिणानि विधीयन्ते इति ।

पूर्वपक्षस्तु– प्रकृतमेव ज्योतिष्टोममनूद्य तत्र गुणो विधीयते इति । ज्योतिष्टोमप्रकरणात् । अन्यथा प्रकृतहानाप्रकृतप्रक्रिये स्याताम् । एतच्छब्दस्य पूर्वप्रकृतवाचित्वाच्चेति ।

सिद्धान्तस्तु– गुणाविशिष्टं कर्मान्तरमिति । न च तत्र प्रमाणाभावः । निर्बाधभिन्नसञ्ज्ञाया एव मानत्वात् । न च प्रकरणविरोधः । अथ शब्देन

१. शा.दी.२.२.१

प्रकरणविच्छेदात् । न चैतच्छब्दायोगः । तस्य सन्निहितमात्रपरत्वात् । सन्निधानस्य चातीत इवागामिन्यपि सम्भवात् । आगामिसन्निहितश्च ज्योतिश्शब्दः । स च ज्योतिश्शब्दोतीतमपरामृशन् अपूर्वसञ्ज्ञारूपत्वात् नूतनं किञ्चित् कर्माभिधत्ते । अतोत्र सञ्ज्ञया कर्म भिद्यते । एवं विश्वज्योतिः-शब्दादावपीति ।।

अस्मिन् अधिकरणे अष्टौ सूत्राणि सन्ति । तत्र–

'ॐ आनन्दमयोभ्यासात् ॐ' इति प्रथमे सूत्रे अन्नमयादिपञ्चकस्य विष्णुत्वे साध्ये ब्रह्मशब्दरूपहेतूक्तिः ।

'ॐ विकारशब्दान्नेति चेन्न प्राचुर्यात् ॐ' इति द्वितीयसूत्रे विकारार्थ-कमयट्प्रत्ययान्तान्नमयादिशब्दवाच्यत्वं कथं निर्विकारस्य विष्णोः इत्याशङ्क्य मयटः प्राचुर्यार्थत्वोक्त्या तन्निरासः ।

'ॐ तद्धेतुव्यपदेशाच्च ॐ' इति तृतीये आनन्दमयस्य विष्णुत्वे लोकचेष्टकत्वरूपहेतुव्यपदेशलक्षणहेतूक्तिः ।

'ॐ मान्त्रवर्णिकमेव च गीयते ॐ' इति चतुर्थसूत्रे अन्नमयादिपञ्चकस्य विष्णुत्वे अवयवत्वविरोधादिबाधकपरिहाराय मन्त्रवर्णसमाख्यारूपहेतूक्तिः ।

'ॐ नेतरोनुपपत्तेः ॐ' इति पञ्चमसूत्रे प्रतिज्ञापूर्वकं मान्त्रवर्णिक-सूत्रसिद्धान्नमयादिपञ्चकनिष्ठमोक्षजनकज्ञानविषयत्वरूपहेतूक्तिः ।

'ॐ भेदव्यपदेशात् ॐ' इति षष्ठे तेषामेव आनन्दमयत्वनिरासे तेषां ततो भेदरूपहेतूक्तिः ।

'ॐ कामाच्च नानुमानापेक्षा ॐ' इति सप्तमे सूत्रे भेदव्यपदेशविरोधकाभेद-साधकानुमानस्याभासत्वोक्तिः ।

'ॐ अस्मिन्नस्य च तद्योगं शास्ति ॐ' इति अष्टमे अनुव्याख्यानोक्तरीत्या अनुपपत्या दूषितस्यापि शरीरादिकोशा एव अन्नमयशब्दवाच्या इति पक्षस्य विशेषदूषणाभिधानेन निराकरणम् ।

भाष्यदिशा तु भेदव्यपदेशस्यानुमानविरोधाभावेपि तस्य सांसारिकभेद-परत्वेन पारमार्थिकाभेदविरोधित्वाभावात् विरिञ्चादीनामानन्दमयत्वनिरासे कथं स हेतुरित्याशङ्कापरिहारार्थं तद्भेदस्य पारमार्थिकत्वसिद्ध्यर्थं मोक्षेपि तदुक्तिः ।

इति आनन्दमयाधिकरणं सम्पूर्णम्

*****

।। अद्वैतमतानुसारेण आनन्दमयाधिकरणविचारः ।।

।। आनन्दमयाधिकरणस्य अनारम्भणीयत्वशङ्का-तत्समाधानं च ।।

सूत्रकारः भगवान् वेदव्यासः '[१]अथातो ब्रह्मजिज्ञासा' इति सूत्रेण ब्रह्मविचारः कर्तव्यः इति न्यायेन उपपाद्य ब्रह्मजिज्ञासाप्रतिज्ञां अकरोत् । '[२]जन्माद्यस्य यतः' इति सूत्रे ब्रह्मणः जगत्सृष्टिस्थितिलयकर्तृत्वं न्यायेन उपपादयामास । '[३]शास्त्रयोनित्वात्' इति सूत्रेण ब्रह्मणः जगत्सृष्ट्यादिकर्तृत्व-प्रतिपादनाय वेदकर्तृत्वसमर्थनं कृतं तेन ब्रह्मणः सर्वज्ञत्वं प्रतिपादितं तथा जन्माधिकरणोक्तब्रह्मलक्षणस्य असम्भवशङ्कां परिहृत्य, लक्षणस्य सम्भवत्वं प्रतिपाद्य, तस्य अनुमानगम्यत्वं शङ्कां परिहृत्य शास्त्रैकसमधिगम्यत्वं प्रतिपादितम् । '[४]तत्तु समन्वात्' इत्यधिकरणे उपक्रमादिभिः विचार्यमाणे ब्रह्मपराः वेदान्ताः इति न्यायेन समर्थनं तथैव शास्त्रं ज्ञानं न विधीयते किन्तु सिद्धवस्तुप्रतिपादनं करोति इति प्रतिपादनं कृतम् । तस्मात् तत्वमस्यादयः ब्रह्मप्रतिपादकाः इति प्रतिपादितं भवति । एवं शास्त्रं सर्वज्ञं सर्वशक्तिं जगदुत्पत्यादि-कारणं प्रतिपादयतीति अधिकरणत्रयेण निरूपितम् । [५]ईक्षत्यधिकरणे साङ्ख्याभिमतप्रधानस्य जगत्कारणत्वं न्यायेन निराकरणं कृतम् ।

१.ब्र.सू.१.१.१
२.ब्र.सू.१.१.२
३.ब्र.सू.१.१.३
४.ब्र.सू.१.१.४
५. ब्र.सू.१.१.५-११

‘[1]गतिसामान्यात्’ इति सूत्रे सर्वे वेदान्ताः ब्रह्म जगत्सृष्ट्यादिकर्तृत्वेनैव बोधयन्ति न तु तद्विपरीतेन इति प्रतिपादितम् । तस्मात् मुमुक्षुं प्रति यन्निरूपणीयं तत् सर्वं न्यायेन प्रतिपादनं कृतम् । निरूपणीये किमपि न अवशिष्टमस्ति । अतः उत्तरसूत्राणि किमर्थं कृतानि ?

समाधानं तु – वेदान्तशास्त्रेषु विचार्यमाणेषु सत्सु द्विरूपं ब्रह्म अवगम्यते । अत्र एकं नामरूपविकारोपाधिविशिष्टं ब्रह्म । अपरं च निरस्तसमस्तोपाधिरूपं ब्रह्म ।

ननु वेदान्तशास्त्रेषु द्विरूपं ब्रह्म कुतः निरूपितम् ? तत्त्वतो विद्यमानं निरस्तसमस्तोपाधिरूपं ब्रह्म एकमेव । तथापि तादृशं ब्रह्म अज्ञान् प्रति निरूपयितुं न शक्यते । अतः उपाधिविशिष्टं ब्रह्म निरूप्य, तद्द्वारा निरुपाधिकं ब्रह्म निरूप्यते । निरस्तसमस्तोपाधिब्रह्मप्रतिपादकानि वाक्यानि कानि ? उपाधिविशिष्टब्रह्मरूपप्रतिपादकानि वाक्यानि कानि इति चेत्

१. [2]यत्र द्वैतमिव भवति तदितर इतरं पश्यति । यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत् ।

भाष्यरत्नप्रभायां तथा न्यायनिर्णये एतासां अर्थाः निरूपिताः । **यत्र** यस्यां खल्वज्ञानावस्थायां **द्वैतमिव** कल्पितं **भवति** । **तत्** तदा **इतरः** सन् **इतरं पश्यति** । अत्र दृश्योपाधिकं वस्तु भाति । अस्मिन् वाक्ये दृष्ट्यादिगोचरमुपाधिमद् वस्तु उपनिषत् प्रतिपादयति इत्यर्थः ।

---

१. ब्र.सू.१.१.१०

२.बृ.उ.४.५.१५

यत्र ज्ञानकाले **अस्य** विदुषः **सर्वं** जगत् **आत्मैव** आत्ममात्रं, **अभूत्** आत्मातिरेकेण असदेवासीत् । **तत्** तदा तु विद्यावस्थायां **केन** करणेन चक्षुरादिना **कं** विषयं घटादिकं कः कर्ता **पश्येत्** । इत्याक्षेपात् अस्मिन् वाक्ये अव्यवहार्यं निरूपाधिकं तत्त्वं भाति ।

२. [१]यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यत् विजानाति स भूमा । अथ यत्रान्यत् पश्यति अन्यत् शृणोति अन्यत् विजानाति तदल्पं यो वै भूमा तदमृतम् । अथ यदल्पं तत्मर्त्यम् ।

यत्र भूम्नि स्थितो विद्वान् **अन्यत्** द्वितीयं द्रष्टव्यं किमपि चक्षुषा **न पश्यति अन्यत्** श्रोतव्यं श्रोत्रेण **न शृणोति** अन्यत् मन्तव्यं ज्ञातव्यं वा मनसा बुद्ध्या वा न मनुते **न विजानाति** न वेत्ति । **सः** अद्वितीयः दृष्ट्याद्यगोचरः **भूमा** निरतिशयमहत्त्वसम्पन्नः परमात्मा निर्गुणः । अनया श्रुत्या निरुपाधिकं ब्रह्म प्रतिपाद्यते ।

अथ निर्गुणोक्त्यनन्तरं सगुणमुच्यते । **यत्र** सगुणे स्थितो अविद्वान् **अन्यत्** द्वितीयं द्रष्टव्यादि घटादिकं चक्षुरादिना **पश्यति अन्यत् शृणोति अन्यत् विजानाति** वेत्ति **तदल्पं** परिच्छिन्नम् । तत् उपहितरूपं जीवमित्यर्थः । यस्तु **भूमा तदमृतं** नित्यम् ।

१.छा.उ.७.२४.१

३. [1]सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन् यदास्ते ।

सोपाधिके अन्तर्यामिविषये एतच्छ्रुत्युदाहारं भाष्यकारेण कृतम् । **धीरः** परमात्मैव **सर्वाणि रूपाणि विचित्य** सृष्ट्वा **नामानि** च **कृत्वा** बुद्ध्यादौ प्रविश्य जीवसञ्ज्ञो **अभिवदन्** व्यवहरन् यो **वर्तते** स सगुणः । तं निर्गुणत्वेन विद्वानप्यमृतो भवति ।

४. [2]निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम् । अमृतस्य परं सेतुं दग्धेन्धनमिवानलम् ।।

भाष्यकारः निरुपाधिकब्रह्मविषये श्वेताश्वतरोपनिषद्वाक्यं उदाहरति । निर्गताः कला अंशा यस्मात् तत् **निष्कलम्** । अतो निरंशत्वात् **निष्क्रियम्** । अतः **शान्तं** अपरिणामि । **निरवद्यं** रागादिदोषशून्यम् । अञ्जनं मूलतमःसम्बन्धो धर्मादिकं वा तच्छून्यं **निरञ्जनम्** । किञ्च **अमृतस्य** मोक्षस्य स्वयमेव वाक्योत्थवृत्तिस्थत्वेन **परं** उत्कृष्टं **सेतुं** लौकिकसेतुवत् प्रापकम् । यथा दग्धेन्धनः अनलः शाम्यति तमिवाविद्यां तज्जं च दग्ध्वा प्रशान्तं निर्गुणमात्मानं विद्यात् ।

५. [3]नेति नेति

भाष्यकारः निरुपाधिकब्रह्मविषयं बृहदारण्यकवाक्यं निरूपयति ।

---

१. तै.आर.३.१२.७

२. श्वे.उ.६.१९

३. बृ.उ.२.३.६

अत्र इतिभ्यां विश्वं दृश्यमादाय नञ्भ्यां तन्निषेधति । अत्र श्रुतौ वीप्सा च व्याप्त्यर्थकः श्रुत्यां अभिप्रेतः अस्ति । तेन यद् यद् दृश्यं विश्वं तत् तत् नास्ति इत्यर्थः इति बृहदारण्यभाष्ये विवरणं कृतम् ।

६. [१]अस्थूलमनणु

इदं वाक्यं द्रव्यगुणादिसर्वद्वैतनिषेधात् निरुपाधिकब्रह्मप्रतिपादकं भवति । स्थूलादिसगुणात् अन्यत् ।

७. न्यूनमन्यत् स्थानं सम्पूर्णमन्यत् ।

भाष्यकारः ब्रह्मणः निरुपाधिकसोपाधिकाख्यरूपद्वयविषये श्रुतिं आह । द्वैत**स्थानं न्यून**मल्पं सगुणरूपं निर्गुणा**दन्यत्** । तथा **सम्पूर्णं** निर्गुणं उपास्यं सगुणत्वं कल्पितमित्यविरोधः ।

इदं वाक्यं कस्यां उपनिषदि वेदभागे वा वर्तते इति इदानीं नोपलब्धम् । भाष्यरत्नप्रभायां अस्याः श्रुतेः अवतरणिकायां 'रूपद्वये श्रुतिमाह' इति उक्तम् । अतः शङ्कराचार्यकाले उपलब्धा काचन श्रुतिरियं इति ऊह्यते ।

एवं रूपाणि अनेकानि निर्गुणसगुणब्रह्मप्रतिपादकानि वाक्यानि श्रुतिषु विद्यन्ते ।

तत्र अज्ञानावस्थायां ब्रह्मणः उपास्योपासकादिसर्वव्याहारः भवति । तत्र उपास्यस्य उपासनाविधायकानि वाक्यानि अनेकविधानि सन्ति । केषाञ्चित्

१.बृ.उ.३.८.८

ब्रह्मणः उपासनानां '[1]नाम ब्रह्म' इत्यादीनां कामचारादिः अभ्युदयः फलं भवति । अभ्युदयो नाम विद्युल्लोकपर्यन्तस्थितलोकानां प्राप्तिद्वारा तत्तल्लोके अनुभूयमानं सुखं । तच्च उपासनया भवति । केषाञ्चित् उपासनानां दहराद्युपासनानां क्रममुक्तिः प्रयोजनं भवति । केषाञ्चित् उद्गीथाद्युपास्तीनां कर्मसमृद्धिः फलं भवति । कर्मसमृद्धिर्नाम उद्गीथादिषु ब्रह्मदृष्टिः अप्रतिबन्धेन कर्मफलस्य प्राप्त्युपयोगित्वम् । तच्च उद्गीथाद्युपासनया भवति ।

अत्र प्रश्नः– एतानि उपासनानि विधेयत्वात् कर्मकाण्डे निरूपयितुं योग्यानि कुतः ज्ञानकाण्डे निरूपितानि ?

उत्तरं– सत्यं, तथापि ध्यानरूपाणां उपासनानां मनोजन्यत्वात्, ध्यानस्य च ज्ञानान्तरङ्गसाधनत्वात् अत्र ज्ञानकाण्डे विहितानि सन्ति ।

अत्रायं प्रश्नः– सर्वासु उपासनासु उपास्यं परब्रह्म एकमेव अस्ति । तर्हि उपास्यस्य एकत्वात् उपासनाभेदः किं निमित्तः ? फलभेदः कथं भवति ? इति चेत्

उत्तरं– यद्यपि उपास्यं परब्रह्म एकमेव अस्ति । तथापि गुणानां भेदः अस्ति । तेन तदुपहितस्य परब्रह्मणोऽपि भेदः भवति । तत्तदुपाधिविशिष्टं तत्तदुपासने व्यस्थापितं शास्त्रे वर्तते । अतः औपाधिकभेदसद्भावात् उपासनाभेदः भवति । तस्मात् फलेपि भेदः सम्भवति ।

१.छा.उ.७

अस्मिन् विषये प्रमाणानि विद्यन्ते । तथाहि–

१. [१]तं यथा यथोपासते तदेव भवति ।

२. [२]यथाक्रतुरस्मिन् लोके पुरुषो भवति तथेतः प्रेत्य भवति ।

पुरुषः अस्मिन् लोके यथाक्रतुः । क्रतुशब्दस्य ध्यानमर्थः । अस्मिन् लोके यादृशध्यानवान् भवति इति तात्पर्यार्थः । इतः अस्मात् लोकात् प्रेत्य तथा तादृशोपास्यरूपो भवति ।

३. [३]स्मृतिश्च– यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम् ।
तं तमेवैति कौन्तेय सदा तद्भावभावितः ।। इति ।

अत्र पुनः प्रश्नः– अस्तु उपहितभेदः शास्त्रे निरूपितः । तथापि उपासनाविधिः प्रयोजनवान् न भवति । कुतः इति चेत् ? परब्रह्म एकमेव कूटस्थनित्यः, निरतिशयः, सर्वभूतेषु गूढः अस्ति । तथा च एकः एव जीवेश्वरात्मकः अस्ति । ईश्वरस्य सर्वोपाध्यवस्थानेन उपासकस्यापि स्वत ऐश्वर्यादिकमस्ति । एवं सति उपासकः अपकृष्टः, उपास्यं उत्कृष्टं इति उपास्योपासकयोः तारतम्यं सूचयन्त्यः उपासनाश्रुतयः कथं प्रमाणं भवति ?

उत्तरं– सत्यं, ब्रह्मणः एकमेव रूपं ऐश्वर्यं ज्ञानं आनन्दश्च अस्ति ।

१.छा.उ.३.१४.१

२.छा.उ.३.१४.१

३.भ.गी.८.६

तथापि ब्रह्म अनाद्यविद्यातमसा समावृतमस्ति । अविद्यातमसः प्रकर्षनिकर्ष-तारतम्यमस्ति । तेन कारणेन प्राणिषु क्वचिदसदिव स्थावरादिषु, क्वचिदत्यन्ता-पकृष्टमिव (तिर्यगादिषु), क्वचिदपकृष्टमिव (मनुष्येषु), क्वचित् सत्, क्वचित् प्रकर्षवत् (गन्धर्वादिषु), क्वचिदत्यन्तप्रकर्षवत् (देवादिषु) इव भासते । यथा उत्तमप्रकाशः सविता समस्तं विश्वं प्रकाशेनापूरयन्नपि वर्षाकाले निकृष्टप्रकाश इव, शरदि प्रकृष्टप्रकाश इव दृश्यते तथा ब्रह्म अपि भासते ।

तथा च एतदभिप्रायः अद्वैतिनां– स्वतः सिद्धैश्वर्योऽप्युपासक उपाधिनि-कर्षादनभिव्यक्तैश्वर्यस्तं प्रत्याविर्भूतैश्वर्यं विशुद्धोपाधिमद्ब्रह्मोपास्यं भवति ।

उपास्योपासकतारतम्यप्रतिपादकानि इत्थं हि वाक्यानि सन्ति–

१. [१]तस्य य आत्मानमाविस्तरां वेद ।

तस्यात्मनः आत्मानं स्वरूपमाविस्तरां प्रकटतरं यो वेद उपास्ते सः अश्नुते तदिति तरप्प्रत्ययादित्यर्थः ।

तस्योक्तोपाधिकस्य प्रकृतस्यात्मनो यो ध्याता स्वरूपमाविस्तरामतिशयेन प्रकटमुपास्तिवशाद् बुध्यते सोऽश्नुते ह्याविर्भूयेत्यैतरेयके श्रुतम् ।

२. स्मृतिः– [२]यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा ।

तत्तदेवावगच्छ त्वं मम तेजोंशसम्भवम् ।।

१.ऐ.आर.२.३.२,१

२.भ.गी.१०.४१

अर्थः– ....

गीतायां 'यत्र यत्र विभूत्याद्यतिशयः स स ईश्वर इत्युपास्यतया चोद्यते' इति प्रतिपादितमस्ति ।

३. न केवलं श्रुतिस्मृत्योः ब्रह्मणः द्वैरूप्यं प्रतिपादितमस्ति अपि तु अस्मिन् शारीरिकमीमांसायामपि अन्तस्तद्धर्मोधिकरणेऽपि प्रतिपादितं दृश्यते ।

आदित्यमण्डले हिरण्मयः पुरुषः सर्वपाप्मोदयलिङ्गात् पर एव इति वक्ष्यति । अत्र सूर्यादेरपि न जीवत्वेनोपास्यता किन्तु ईश्वरत्वेन इति सिद्धान्तितम् ।

उत्तरसूत्रसन्दर्भस्य कारणानि–

१. यस्मिन् उपनिषद्वाक्ये आम्नातगुणरूपोपाधिः विवक्षितः तद्वाक्यं उपासनपरमिति निर्णयार्थम् ।

२. यत्र उपाधिः न विवक्षितः तद्वाक्यं ज्ञेयब्रह्मपरमिति निर्णयं कर्तुं ।

क्वचित् पुनरुक्तोप्युपाधिरविवक्षितः यथात्रैवान्नमयादयः आनन्दमयान्ताः पञ्च कोशाः । तदत्र कस्मिन्नुपाधिर्विवक्षितः कस्मिन्नेति नाद्यापि विवेचितम् ।

अविशेषेण वेदान्तानां निर्विशेषे ब्रह्मणि समन्वयः साधितः तस्य क्वचित् हिरण्मयवाक्यादावपवादः, क्वचित् आनन्दमयवाक्यादावपवादाभासप्राप्तौ तदपवादश्च प्रतिपाद्य इत्यध्यायशेष आरभ्यते ।

अपवादसङ्गत्या सविशेषवाक्यानां तदपवादसङ्गत्या निर्विशेषवाक्यानां च केषाञ्चित् विचारार्थं उत्तरसूत्रसन्दर्भः ।

यद्यपि हिरण्यमयादिवाक्यानां महातात्पर्येण निर्विशेषे पर्यवसानमस्ति तथापि उपाधिविवक्षा नास्तीत्यस्मिन्नंशे अपवाद इति भावः ।

३. '[१]गतिसामान्यात्' इत्यचेतनकारणनिराकरणमुक्तं तदपि व्याख्यातातिरिक्तानि वाक्यान्तराणि ब्रह्मप्रतिपादकानि इति व्याख्यानेन ब्रह्मविपरीतकारणनिषेधेन प्रपञ्च्यते ।

भामति–

तथा गतिसामान्यमपि सिद्धवदुक्तं, नत्वद्यापि साधितमिति तदर्थमुत्तर-ग्रन्थसन्दर्भारम्भः इत्यर्थः ।

अद्वैतमतानुसारेण अधिकरणरचना–सङ्गतिनिरूपणम्

भाष्यकारः प्रथमं एकदेशिमतानुसारेण (वृत्तिकारमतानुसारेण) अधिकरण-रचनां करोति । अत्र भामतीकारश्लोकः विद्यते ।

गौणप्रवाहपातेऽपि युज्यते मुख्यमीक्षणम् ।
मुख्यत्वे तूभयोस्तुल्ये प्रायदृष्टिर्विशेषिका ।।

अस्यार्थः कल्पतरुकारेण विवृतमस्ति । अनादिगौणेक्षणप्रवाहपातेऽपि जगत्कारणे मुख्यमीक्षणमिति युज्यते । मुख्यसम्भवे गौणस्यानवकाशत्वात् । अतः तत्र विशयानुदये प्रायपाठो अकिञ्चित्करः । अत्र तु मयटो विकारप्राचुर्ययोः

१.ब्र.सू.१.१.१०

मुख्यत्वे सति विकारार्थग्रहणे प्रायदृष्टिः विशेषिका । तदेव अत्र मया विवरणं करिष्यते ।

पूर्वस्मिन् ईक्षत्यधिकरणे पूर्वपक्षावसरे इत्थं वर्तते । '[१]तत् तेज ऐक्षत' '[२]ता आपः ऐक्षन्त' इति श्रुतिवाक्यद्वये तेजअपां ईक्षणकर्तृत्वमुच्यते । अचेतने मुख्यं ईक्षणकर्तृत्वं न सम्भवति । अतः श्रुतिद्वये अमुख्येक्षणकर्तृत्वमुच्यते इति व्याख्यानं कर्तव्यम् । एवं श्रुतिद्वयस्थाने पठितः 'सदेव सौम्येदमग्र आसीत् । तदैक्षत' इत्यत्रापि सच्छब्दवाच्यस्य ईक्षणकर्तृत्वं गौणमेव अङ्गीकार्यम् । अन्यथा प्रायपाठविरोधो भविष्यति ।

तस्य समाधानावसरे '[३]गौणश्चेन्नात्मशब्दात्' इति सूत्रे सिद्धान्तप्रतिपादनप्रकारस्तु इत्थं वर्तते । '[४]जीवेन आत्मना' इति उत्तरत्र श्रुतौ आत्मशब्दश्रुतिरस्ति । श्रुतिस्तु प्रायपाठात् प्रबला । कुतः इति चेत् ? प्रायपाठो नाम आम्नानसादेशरूपः स्थानविशेषः । श्रुतिस्थानयोः मध्ये श्रुतिः प्रबला इति मीमांसकैः निर्णयं कृतम् । तथाहि सूत्रं '[५]श्रुतिलिङ्गप्रकरणवाक्यस्थानसमाख्यानां समवाये पारदौर्बल्यं अर्थविप्रकर्षात्' इति । अतः आत्मशब्दश्रुत्यनुसारेण ईक्षणकर्तृत्वमुख्यमेव अङ्गीकर्तव्यम् । मुख्यार्थकथनसम्भवे अमुख्यार्थङ्गीकरणं न कार्यम् ।

---

१. छा.उ.६.२
२. छा.उ.६.२
३. ब्र.सू.१.१.६
४. छा.उ.६.३
५. शा.दी.३.३.१४

एवं पूर्वस्मिन् ईक्षत्यधिकरणे प्रायपाठस्य दुर्बलत्वात् अर्थनिश्चायकत्वं न सम्भवति । प्रायपाठस्य श्रुत्या बाधोऽपि भवति । अत्र आनन्दमयाधिकरणे विपरीतं भवति । प्रायपाठः एव अर्थनिश्चायकः भवति । कुतः इति चेत् ? अनेकार्थसन्देहे प्रायपाठस्य निर्णायकता तु भविष्यति इति वादिभिः स्वीकृतमस्ति । मयटः प्राचुर्य इति विकार इति मुख्यार्थद्वयमस्ति । आनन्दमयः इत्यत्र मयट्प्रत्ययः विद्यते । मयटप्रत्ययस्य कः अर्थः स्वीकर्तव्यः ? प्राचुर्यार्थो वा विकारार्थो वा ? उभयमपि मुख्यार्थमेव इति जिज्ञासा जायते । अतः उत्तरमुच्यते । अन्नमयप्राणमयमनोमयविज्ञानमयेषु मयटः विकारार्थत्वं अङ्गीकृतमस्ति । अन्नमयादिशब्दवाच्यानां देहादीनां अन्नादिविकारत्वात् । अतः तत्प्रायपाठ-पठितत्वात् तेषां स्थाने पठितत्वात् आनन्दमय इत्यत्रापि विकारार्थ एव स्वीकर्तव्यः इति वक्तुं युक्तं भवति ।

एवं च ईक्षत्यधिकरणे प्रायपाठस्य श्रुत्या बाधेऽपि आनन्दमयाधिकरणे प्रायपाठस्य प्राबल्यमुपपाद्य पूर्वोपक्षोत्थानमस्ति । अतः तेन अधिकरणेन अस्य अधिकरणस्य प्रत्युदाहरणलक्षणसङ्गतिः अस्तीत्युक्तं भवति । प्रत्युदाहरण-लक्षणसङ्गतिलक्षणं तु 'पूर्वन्यायात्ययो यत्र प्रत्युदाहरणा तु सा' इति तन्त्रचूडामण्युक्तं लक्षणं तात्पर्यचन्द्रिकाप्रकाशे उदाहृतम् । तथा

'पूर्वाधिकरणोद्दृष्टयुक्त्यप्रसरयुक्तितः ।
विधान्तराविष्करणे प्रत्युदाहरणं भवेत् ।।'

मयटप्रत्ययः विकारार्थः तथा प्राचुर्यार्थः । अतः मयटः उभयार्थप्रतिपादकत्वं सन्देहकारणम् । तेन आनन्दमयशब्दवाच्यं 'सत्यं ज्ञानमनन्तं ब्रह्म' इति श्रुतिप्रतिपादितं प्रकृतं परं ब्रह्म उत अन्नमयादिवत् आनन्दमयः परब्रह्मणः अर्थान्तरम् इति सन्देहः भवति । आनन्दमयशब्दवाच्यः परब्रह्मणः अर्थान्तः इति पूर्वपक्षः प्रवर्तते । परं ब्रह्म आनन्दमयशब्दवाच्यं इति सिद्धान्तः भवति । सिद्धान्तस्य प्रयोजनं च आनन्दमयस्य उपासनं आनन्दमयस्य प्रमितिर्वा भवति ।

एकदेशमतानुसारेण पूर्वपक्षः

१. तैत्तिरीयोपनिषदि अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयाः निरूपिताः सन्ति । परब्रह्मणः अर्थान्तरं अमुख्यः आत्मा आनन्दमयशब्दवाच्यः इति पूर्वपक्षः भवति । कुतः इति चेत् ? विकारार्थान्नमयादिपदप्राय-पाठादानन्दमयपदमपि विकार्थमेवेति वक्तव्यम् । अन्नमयप्राणमयमनोमय-विज्ञानमयशब्देषु विकारार्थकमयशब्दः विद्यते । अतः तत्स्थाने पठितः आनन्दमय इत्यत्र मयट्प्रत्ययोपि विकारार्थः इति वक्तव्यम् ।

अत्र भास्कराचार्यस्य प्रश्नः– अन्नमय इत्यत्र मयट्प्रत्ययस्य विकारार्थकथनं युक्तम् । कुतः इति चेत् शरीरः अन्नमयशब्दवाच्यः । स च अन्नविकारः अन्नोपादानकः इति अनुभवसिद्धं वर्तते । प्राणमयमनोमय-विज्ञानमयशब्देषु विकारार्थकः मयट्प्रत्ययः इति वक्तुं न युक्तम् ? प्राणादीनां

प्राणादिविकारत्वं वक्तुं न शक्यते । एवमुक्ते स्वस्यैव स्वविकारित्वप्राप्त्या आत्माश्रयदोषः भवति । लोके घटः स्वविकारः इत्युक्ते आत्माश्रय इति प्रसिद्धमस्त्येव । अतः प्राणमयादिषु स्वार्थे मयट्प्रत्ययः वर्तते इत्येव वक्तव्यम् । तथा च कथं प्रायपाठविरोधः भवति ?

अस्य उत्तरमुच्यते– तथाहि– विकारः द्विप्रकारः भवति । कश्चित् शुक्तरूप्यादिः स्वरूपेणाध्यस्तः । अपरस्तु प्रतिबिम्बघटाकाशादिः उपाधिनिमित्तात् विभक्तः । तत्र अन्नरसविकारः देहः अन्नमयः इत्युच्यते । यथा घटरूपोपाधि-निमित्तेन घटाकाशः आकाशविकारः इत्युच्यते तथा प्राणोपाधिरात्मा प्राणविकारः प्राणमयशब्दवाच्यः । मनोमयः तदुपाधिरात्मा तद्विकारः । विज्ञानमयो विज्ञानोपाधिरात्मा विज्ञानविकारः । तथा च प्राणमयादिषु अपि विकारार्थ एव मयट्प्रत्ययः न स्वार्थिकः भवितुं अर्हति । तथा च प्रायपाठे विकारार्थकः मयट्प्रत्ययः विद्यते । एतेषां स्थाने पठितत्वात् आनन्दमयः इत्यत्रापि मयटः विकारार्थकत्वमेव अङ्गीकर्तव्यम् ।

तथा च अन्नं प्रसिद्धं अस्ति । प्राणमनोबुद्धयः हिरण्यगर्भरूपाः । बिम्बचैतन्यमीश्वरः आनन्दः । तेषां पञ्चानां विकारा आध्यात्मिका देहप्राणमनो-बुद्धिजीवा अन्नमयादयः पञ्चकोशा इति श्रुतेः परमार्थः ।

२. अत्र पुनः हेत्वन्तरेण आनन्दमयस्य परब्रह्मत्वमाशङ्क्य निराक्रियते ।

अत्र भामतीकारसङ्ग्रहश्लोकः–

चतुष्कोशान्तरत्वे तु न सर्वान्तरतोच्यते ।
प्रियादिभागी शारीरो जीवो न ब्रह्म युज्यते ।।

आनन्दमयः सर्वान्तःस्थितः अतः स परं ब्रह्म इत्युच्यते । यतः अन्नमयान्तः प्राणमयः वर्तते । तस्यान्तः मनोमयः, तस्मिन् विज्ञानमयः वर्तते । तस्यान्तः आनन्दमयः वर्तते । आनन्दमयस्य अन्तः कोऽपि अस्तीति न उक्तः । अतः सर्वान्तःस्थितः आनन्दमय एव भवति । ततः सर्वान्तःस्थितत्वात् आनन्दमयः परं ब्रह्म एव भवति । जीवः न भवति ।

उत्तरं निरूपयति– तैत्तिरीयश्रुतिः आनन्दमयस्य सर्वान्तरतां न वदति । किन्तु अन्नमयप्राणमयमनोमयविज्ञानमयरूपकोशचतुष्टयान्तरतां एव आह । ननु आनन्दमयात् अन्तरः कोऽपि न उक्तः । अतः स एव सर्वान्तरः इति उच्यते इति चेत् न । 'यदपेक्षं यस्यान्तरत्वं श्रुतं तत् तस्मादेवान्तरं भवति' इति हि नियमः । एवं च आनन्दमयस्य विज्ञानमयापेक्षं आन्तरं श्रुतं अतः आनन्दमयः विज्ञानमयात् आन्तरं एव भवति न तु सर्वान्तरः भवति । लोके दृष्टान्तोऽपि दृश्यते । देवदत्तः बलवान् इत्युक्ते स्वसमानजातीयमनुष्यान्तर-यज्ञदत्ताद्यपेक्षया एव बलवान् इत्यर्थः भवति । न तु सिंहगजाद्यपेक्षया बलवानिति अर्थः भवति । एवमेव स्वसमानजातीयकोशाद्यपेक्षया एव आन्तरत्वं आनन्दमयस्य विवक्षितं श्रुत्या इति वक्तव्यम् । न तु सर्वपदार्थानां अन्तःस्थितत्वं वक्तुं युक्तं भवति ।

अनेन प्रबन्धेन 'आनन्दमयः ब्रह्म भवितुमर्हति सर्वान्तरत्वात्' इति अनुमाने उक्ते सर्वान्तरत्वरूपहेतुः असिद्धः । आनन्दमये कोशान्तरत्वस्यैव विद्यमानत्वात् इति तस्य दोषः उक्तो भवति ।

इदानीं आनन्दमयस्य जीवत्वं साधयति ।

१. आनन्दमयस्य प्रियादिसंस्पर्शः श्रुतौ उच्यते । '[१]तस्य प्रियमेव शिरः । मोदो दक्षिणः पक्षः । प्रमोद उत्तरः पक्षः । आनन्द आत्मा । ब्रह्म पुच्छं प्रतिष्ठा' इति श्रूयते । ब्रह्म तु निष्कलम् । अतः तस्य प्रियाद्यवयवसम्बन्धः न सम्भवति ।

श्रुत्यर्थस्तु– अपेक्षितविषयजन्यसुखं प्रियम् । तल्लाभजन्यं मोदः । तद्भोगजन्यं प्रमोदः । सुषुप्त्यादौ भासमानाज्ञानोपहितं सुखसामान्यं आनन्दः । निरुपाधिकं सुखं ब्रह्म ।

अनेन 'आनन्दमयः जीवः भवितुमर्हति प्रियादिसंस्पर्शवत्वात् - सम्मतवत्' इत्यनुमानं आह ।

२. आनन्दमयस्य शारीरत्वं च वेदे उच्यते । 'तस्यैष एव शारीर आत्मा । यः पूर्वस्य' इति । अस्यार्थः- तस्य पूर्वस्य विज्ञानमयस्य एष एव शारीर आत्मा य एष आनन्दमय इति । तेन आनन्दमयः न परं ब्रह्म भवति । अपि तु जीवः एव भवति ।

---

१. तै.उ.११.४

अत्र प्रश्नः भवति– आनन्दमयस्य सशरीरत्वं अस्तु । सशरीरत्वात् प्रियादिसंस्पर्शोऽपि अनिवार्यमस्तु । तथापि मयटः कुतः विकारार्थः अङ्गीक्रियते । प्राचुर्यार्थः कुतः नाङ्गीक्रियते? तथात्वेपि ब्रह्मत्वं न सम्भवति । किन्तुः संसारी एव आनन्दमयः भवति इति चेत् कुतः आनन्दमयः ब्रह्म न सम्भवति ? कुतः जीवः आनन्दमयः भवति इति चेत्।

अत्र उत्तरयति– प्राचुर्यं हि तद्विपरीतस्याल्पस्य सम्भवे भवति । ब्राह्मण-प्रचुरो ग्रामः इत्युक्ते ब्राह्मणविरुद्धस्य अल्पशूद्रस्य सत्वं प्रतिपाद्यते इति अनुभवसिद्धं वर्तते । तद्वत् अत्रापि आनन्दमयः इत्युक्ते आनन्दप्रचुर इत्यर्थ उक्तः भवति । तदा आनन्दमये आनन्दविरुद्धदुःखलवसम्बन्धोपि उक्तं भवति । न तु दुःखस्य अत्यन्ताभावः । दुःखलवसम्बन्धस्तु परब्रह्मणि न सम्भवति । तस्य आनन्दैकरसत्वात् । अतः प्राचुर्यार्थत्वे आनन्दमयः जीव इति अवश्यमङ्गीकर्तव्यं भवति ।

यतः आनन्दमयशब्दवाच्यः जीव एव । तस्मात् उपहितमेवात्र उपास्यत्वेन विवक्षितं न तु ब्रह्मरूपं ज्ञेयत्वेन अत्र विवक्षितमिति पूर्वः पक्षः । अस्य उत्तरमाह सूत्रकारः–

।। [१]आनन्दमयोऽभ्यासात् ।।

परब्रह्म एव आनन्दमयशब्दवाच्यः भवितुमर्हति । कुतः इति चेत्। अभ्यासात् । आनन्दशब्दाभ्यासात् इत्यर्थः ।

१. ब्र.सू.१.१.१२

तथाहि– '[१]रसो वै सः' इति आनन्दवल्यां आनन्दमयस्य रसत्वमुक्त्वा उच्यते 'रसँ ह्येवायं लब्ध्वा आनन्दी भवति' इति 'को ह्येवान्यात् कः प्राण्यात् । यदेव आकाश आनन्दो न स्यात् । एष ह्येवानन्दयाति', 'सैषानन्दस्य मीमाँसा भवति' 'एतमानन्दमयमात्मानमुपसंक्रामति' 'आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन' इति । '[२]आनन्दो ब्रह्मेति व्यजानात्' इति । श्रुत्यन्तरे च '[३]विज्ञानमानन्दं ब्रह्म' इति ब्रह्मण्येवानन्दशब्दो दृष्टः। अतः ब्रह्मणि आनन्द-शब्दाभ्यासात् ब्रह्म एव आनन्दमयः । अभ्यासो नाम एकप्रकारासकृदुक्तिः ।

रसो वै सः । अस्यार्थः– रसनीयत्वात् काम्यमानत्वात् रसः सुखरूपः ।

'रसँ ह्येवायं लब्ध्वा आनन्दी भवति'

'[४]को ह्येवान्यात् कः प्राण्यात् । यदेव आकाश आनन्दो न स्यात् । एष ह्येवानन्दयाति',

'[५]सैषानन्दस्य मीमाँसा भवति'

'एतमानन्दमयमात्मानमुपसंक्रामति'

'आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन' इति ।

'आनन्दो ब्रह्मेति व्यजानात्' इति ।

---

१. तै.उ.२.७
२. तै.उ.३.६
३. बृ.उ.३.९.२८
४. तै.उ.२.७
५. तै.उ.३.६

'[1]विज्ञानमानन्दं ब्रह्म' ।

अत्र प्रश्नः– अत्र आनन्दशब्दाभ्यासः एव विद्यते । आनन्दमयाभ्यासस्तु नास्ति । कथं तर्हि अभ्यासात् इति ब्रह्मणः आनन्दमयवाच्यत्वे हेतूक्तिः सम्भवति ?

उत्तरं– आनन्दमयं प्रस्तुत्य 'रसो वै सः' इति तस्य रसत्वमुक्त्वा 'रसँ ह्येवायं' इत्यादिवाक्यं प्रवृत्तं वेदे अस्ति । आनन्दमयावयवस्य तावत् ब्रह्मणः पुच्छस्याङ्गतया न तस्य प्राधान्यमस्ति । अपि तु अङ्गिनः आनन्दमयस्यैव ब्रह्मणः प्राधान्यं विद्यते । तथा च तदधिकरणे पठितं अभ्यस्यमानमानन्दपदं तद्बुद्धिमाधत्ते इति तस्यैव आनन्दमयस्य अभ्यास इति युक्तं आनन्दमयस्य अभ्यासः इत्युक्तिः ।

अत्र दृष्टान्तः– ज्योतिष्टोमाधिकारे 'वसन्ते वसन्ते ज्योतिषा' इति ज्योतिष्पदमिव ज्योतिष्टोमाभ्यासः कालविशेषविधिपरः ।

वसन्ते वसन्ते ज्योतिषा यजेत इत्यत्र ज्योतिष्टोमानुवादेन कालरूप-गुणविधिर्वा कर्मान्तरविधिर्वा इति संशये कर्मान्तरविधिपक्षे द्रव्यदेवतात्मक-रूपकल्पनया गौरवापत्त्या कालविशेषलक्षणगुणविधिः इति सिद्धान्तः कृतः ।

अत्र प्रश्नः– आनन्दमयस्य ब्रह्मत्वविषये सर्वान्तरत्वरूपहेतुः उक्तः । तस्य असिद्धिः आपादितः । तथा सर्वान्तरत्वाभावे 'यदपेक्षं यस्यान्तरत्वं श्रुतं

१.बृ.उ.३.९.२८

तत् तस्मादेवान्तरं भवति' इति नियमानुसारेण अन्नमयादीनामेव आन्तरत्व-मुपपादितम् । देवदत्तदृष्टान्तेन उपपादितं च अस्ति ।

उत्तरं– सिंहादयः देवदत्तात् बलाधिकाः इति प्रमाणान्तरेण सिद्धाः वर्तन्ते । परन्तु आनन्दमयात् आन्तरं कोऽपि न प्रमाणान्तरेण सिद्धः अस्ति । अतः एतद्दृष्टान्तानुसारेण आनन्दमयस्य सर्वान्तरत्वं निषेद्धुं न युक्तम् ।

'यदपेक्षं ...' इति नियमस्तु असति बाधके, प्रमाणान्तरप्रमिते वक्तव्यं भवति । यथा देवदत्तादिषु बलाधिकाः प्रमाणान्तरसिद्धाः । अतः अयं नियमः नात्र समन्वयः भवति । तस्मात् सर्वान्तरत्वहेतोः यद् असिद्धत्वमुक्तं तद् न घटते ।

अतः सर्वान्तरत्वहेतुना आनन्द मयस्य ब्रह्मत्वं साधयितुं योग्यमेव भवति ।

किञ्च '[१]एतमानन्दमयमात्मानमुपसंक्रामति' इत्यत्र साक्षात् आनन्द-मयात्मशब्दाभ्यास एव वर्तते । तेनापि कारणेन आनन्दमयशब्दवाच्यं परं ब्रह्मैव भवति ।

बाधकपरिहारः

इदानीं पूर्वपक्ष्युक्तबाधकानि परिहरति ।

१. बाधकं– आनन्दमय इत्यत्र मयटः प्राचुर्यार्थत्वे प्रायपाठविरोधः उक्तः ।

---

१. तै.उ.२१.८

परिहारः– स न संभवति । आनन्दमयः सर्वान्तरः इत्येव सिद्धान्तः । मुख्यं आत्मानं उपेदेष्टुं विवक्षु शास्त्रं लोकबुद्ध्यनुसारेण उपदिशति । यथा अरुन्धतीनक्षत्रं उपदिदिक्षुः प्रथमं स्थूलं नक्षत्रं दर्शयित्वा अरुन्धतीं उपदिशति, ततः अन्यां तारकां अरुन्धतीं वदति, ततः अन्तिमोपदेशे अतिसूक्ष्मं अरुन्धतीमेव उपदिशति । अरुन्धतीदर्शनप्रायपठितमपि मुख्यारुन्धतीदर्शनं यथा अमुख्यं न भवति । किन्तु मुख्यमेव भवति । तथा शास्त्रं प्रथमं सर्वैः दृश्यमानं अन्नमयं देहं ब्रह्मत्वेन उपदिशति । ततः तदन्तस्थं मूषानिषिक्तताम्रप्रतिमावत् प्राणमयं, ततः अन्तरं मनोमयं, ततः मनोमयान्तरं विज्ञानमयं ब्रह्मत्वेन उपदिशति । अन्तिमतया विज्ञानमयान्तस्थं आनन्दमयं ब्रह्मत्वेन उपदिश्य ब्रह्म बोधयति । अतः विकार्थमयट्प्रत्ययान्तशब्दानां अन्नमयादीनां मध्ये पठितमपि आनन्दमयशब्दः मुख्यमेव ब्रह्म प्रतिपादयति । अमुख्यं ब्रह्म न प्रतिपादयति ।

२. बाधकं– प्रियशिरस्त्वादिकल्पनात् आनन्दमयः न ब्रह्म इति आपादितम् । तथा मयटः प्राचुर्यार्थत्वं यदि अङ्गीक्रियते तदा आनन्दमयस्य दुःखलवसंस्पर्शः स्यात् । अतः मयट् विकारार्थ अङ्गीकार्यः ।

परिहारः– अतीतानन्तरोपाधिजनिता सा न स्वाभाविकी । अतो न दोषः । प्रियादियोगवद् दुःखलवयोगोपिप्यतीतानन्तरविज्ञानमयकोशोपाधिक उपपद्यत इति नासौ मुक्यात्मत्वबाधक इत्यर्थः ।

३. बाधकं– आनन्दमयस्य शारीरत्वं उक्तमस्ति । ब्रह्म तु अशरीरम् । अतः ब्रह्म नानन्दमयः ।

परिहारः– आनन्दमयः संसारिपुरुषः यथा शरीरे भवत्वात् शारीर इत्युच्यते तथा न शरीरेण सह जातः । तथात्वे मुख्यशारीरशब्दवाच्यं भवेत् । अपि तु अन्नमयादिशरीरपरम्परया प्रदर्श्यमानत्वात् शारीर इत्युच्यते ।

।। [1]विकारशब्दान्नेति चेत् न प्राचुर्यात् ।।

आनन्दमयशब्दवाच्यं ब्रह्म न भवति । आनन्दशब्दाभ्यासरूपहेतुना आनन्दमयस्य ब्रह्मत्वं साधितमस्ति । अतः कुतः प्रश्नः इति चेत् विकारशब्दस्य विद्यमानत्वादिति उत्तरं भवति । अयं विचारः '[2]ञितश्च तत्प्रत्ययात्' सूत्रस्य महाभाष्ये विवृतमस्ति । तथाहि– ''यथा 'विकारे च प्रकृतिशब्दः' इत्यत्र शालिविकारं भुङ्क्ते मुद्गविकारेण इत्यस्मिन्नर्थे शालीन् भुङ्क्ते मुद्गैः इति विकारार्थे प्रकृतिशब्दः प्रयुज्यते'' इति । तद्वत् इहापि विकारशब्दोऽपि प्रकृत्यर्थे प्रयुज्यते इत्युच्यते । तर्हि अत्र विकारवाचकः शब्दः कः इति चेत् मयट्प्रत्यय एव विकारार्थं वदति । मयट्प्रत्ययस्य विकारार्थत्वे किं प्रमाणम् ? इति प्रश्ने '[3]मयड्वैतयोः भाषायामभक्ष्याच्छादनयोः' प्रकृतिमात्रात् - सर्वस्याः प्रकृतेः, मयड् वा स्याद् विकारावयवयोः । यथा अश्ममयम्, आश्मनम् इति सूत्रमेव प्रमाणमस्ति । तस्मात् आनन्दमयस्य मुख्यात्मत्वं न सम्भवति । इति पूर्वपक्षः भवति । अयमेव पूर्वपक्षः 'विकारशब्दात् नेति' इति सूत्रांशेन उक्तः ।

---

१. ब्र.सू.१.१.१३ २.पा.सू.४.३.१५५ ३.पा.सू.४.३.१४३

सूत्रकारः 'न प्राचुर्यात्' इति सूत्रांशेन सिद्धान्तं विवृणोति । प्राचुर्यार्थेऽपि मयट्प्रत्ययः वर्तते । '[१]तत्प्रकृतवचने मयट्' इति सूत्रे प्राचुर्येर्थेऽपि मयट्प्रत्ययः विहितः दृश्यते । वृत्तिः– प्राचुर्येण प्रस्तुतं प्रकृतम् । तस्य वचनं प्रतिपादनम् । भावेऽधिकरणे वा ल्युट् । आद्ये प्रकृतमन्नमन्नमयम् । अपूपमयम् । यवागूमयी । द्वितीये अन्नमयो यज्ञः । अपूपमयं पर्व ।

अत्र सूत्रे तदिति प्रथमासमर्थात् प्राचुर्याविशिष्टप्रस्तुतवचनाभिधाने गम्यमाने मयट्प्रत्ययो भवतीति प्रचुरतायुक्तेऽपि वस्तुनि विकारवत् मयट्स्मरणात् न विकारार्थता नियता ।

यथा अन्नप्रचुरो यज्ञः इत्यन्नप्रचुरः उच्यते एवं आनन्दप्रचुरं ब्रह्म आनन्दमय इत्युच्यते ।

ब्रह्मणः कथं आनन्दप्रचुरत्वं इति चेत् । तैत्तिरीये ब्रह्मवल्यां '[२]स एको मानुष आनन्दः' इत्यारभ्य आनन्दनिरूपणं कृतम् । तत्र उत्तरस्मिन् स्थाने 'ते ये शतं मानुष आनन्दाः । स एको मनुष्यगन्धर्वाणामानन्दः' इति शतगुण आनन्द इत्युक्त्वा क्रमेण देवगन्धर्वाणां, आजानजदेवानां, इन्द्रस्य, बृहस्पतेः, प्रजापतेः ब्रह्मणः आनन्दान् निरूपयामास । अन्ते ब्रह्मानन्दस्य निरतिशयत्वं अवधारितं उपनिषदि वर्तते । तस्मात् प्राचुर्यार्थे मयट्प्रत्ययो वर्तते ।

---

१. पा.सू..५.४.२१

२. तै.उ. १७.५

।। [1]तद्धेतुव्यपदेशाच्च ।।

सूत्रकारः अन्येन हेतुना प्राचुर्यार्थो मयट्प्रत्ययः इति साधयति । श्रुतिः ब्रह्मणः 'एष ह्येवानन्दयाति' इति आनन्दहेतुत्वं निरूपयति । तस्मात् प्राचुर्यार्थः एव मयट्प्रत्ययः भवति । यो हि अन्यान् आनन्दयति स प्रचुरानन्द इति प्रसिद्धं वर्तते । यथा लोके यः अन्येषां धनिकत्वं आपादयति सः प्रचुरधनः इति गम्यते तद्वत् अन्यानन्दापादकत्वात् ब्रह्म आनन्दमय इति वक्तुं शक्यते । अतः आनन्दमय इत्यत्र मयट्प्रत्ययः प्राचुर्यार्थः सम्भवति । अत स एव आत्मा ।

।। [2]मान्त्रवर्णिकमेव च गीयते ।।

हेत्वन्तरेण आत्मनः एव आनन्दमयत्वं साधयति ।

भाष्यकारैः अस्य सूत्रस्य व्याख्यानमेवं कृतम् । तथाहि–

१. '[3]सत्यं ज्ञानमनन्तं ब्रह्म' इति मन्त्रप्रस्तुतं ब्रह्म आनन्दमयवाक्ये निर्दिश्यते । अतः आनन्दमयः ब्रह्म । कुतः एवं वक्तव्यमिति चेत् प्रकृतत्वात् - अस्य ब्रह्मप्रकरणत्वात् इत्यर्थः ।

२. तथा 'सत्यं ज्ञानं अनन्तं ब्रह्म' '[4]अन्योन्तर आत्मा आनन्दमयः'

---

१. ब्र.सू.१.१.१४ ३. तै.उ. २.३

२. ब्र.सू.१.१.१५ ४. तै.उ.१२.२

इति वाक्यद्वयमध्ये असम्बद्धपदव्यवधानाभावाच्च आनन्दमयः ब्रह्म । एवं कारणद्वयं निरूपितमस्ति । इति ।

भाष्यकृदुक्तस्य निरूपणम्।

प्रश्नः– '[१]ब्रह्मविदाप्नोति परम् । तदेषाभ्युक्ता । सत्यं ज्ञानमनन्तं ब्रह्म । यो वेद निहितं गुहायां परमे व्योमन् । सोऽश्नुते सर्वान् कामान् ब्रह्मणा विपश्चितेति ।' इति ग्रन्थभागः मन्त्रम् इत्युच्यते । तदुत्तरग्रन्थः ब्राह्मणः इति व्यवह्रियते । अनयोः मन्त्रब्राह्मणयोः परस्परविषये प्रत्यभिज्ञानं नास्ति । यतः मन्त्रोक्तं सत्यत्वादिगुणोपलक्षितं ब्रह्म वा गुहानिहितत्वादिगुणोपलक्षितं ब्रह्म वा उत्तरत्र ब्राह्मणे न अनूद्यते । तथा च न प्रत्यभिज्ञा सम्भवति । अतः कथं अनयोः व्याख्यानव्याख्येयभावः इति ।

उत्तरम्– सत्यं अत्र व्याख्यानव्याख्येयभावः स्पष्टः न प्रतीयते । तथापि सूक्ष्मदृष्ट्या सा ज्ञेया भवति ।

कथं सूक्ष्मदृष्ट्या ज्ञायते इति चेत् तत्सर्वं विवृतं वेदान्तकल्पतरुटिप्पणी-परिमले दृश्यते । तथाहि–

'ब्रह्मविदाप्नोति परम्' इति आनन्दवल्यां प्रतिपाद्यस्य सर्वस्य अर्थस्य सङ्ग्राहकं सूत्रमिव वाक्यं पठ्यते । तत्र प्रश्नत्रयं जायते । तथाहि–

---

१. तै.उ.२.१

१. अत्र वाक्योक्तं ब्रह्म किं तद् ?

२. कथं तज्ज्ञानं भवति ?

३. तद्वेदनात् प्राप्यं उत्कृष्टं फलं किम् ?

एतत्प्रश्नत्रयं परिहर्तुं '[१]तदेषाभ्युक्ता' इति ब्राह्मणोक्तार्थप्रतिपादकत्वेनावतारणपुरस्सरं तदनुव्याख्यानरूपं '[२]सत्यं ज्ञानं अनन्तं ब्रह्म' इति मन्त्र आम्नातः श्रूयते । एवमुक्तेऽपि प्रश्नत्रयं जायते । तथाहि–

१. ब्रह्मणः देशतः कालतः गुणतः परिच्छेदराहित्यरूपं आनन्त्यं कथं ?

२. कस्यां गुहायां निहितं अपरिच्छिन्नं ब्रह्म वेद्यम् ?

३. तद्वेदनेन ब्रह्मादिस्थावरान्तसकलप्राणिस्थिताः सकलकामाः तेषां प्राप्तिरूपं उत्कृष्टफलं कथं लभ्यते ?

अत्र एतत्प्रश्नत्रयपरिहारार्थं तद्वारा पूर्वोक्तप्रश्नपरिहारार्थं च उत्तरग्रन्थसन्दर्भः आरभ्यते । तथाहि–

तत्र ब्रह्मणः आनन्त्योपपादनार्थं 'सत्यं ज्ञानमनन्तं' इतिमन्त्रव्याख्यानरूपः अनुवाकशेषः वर्तते । तत्रानन्त्यनिरूपणार्थं 'तस्माद्वा एतस्माद्' इत्यादिकारणवाक्यं प्रवृत्तं अस्ति । श्रुतौ तदेतच्छब्दौ व्यवहिताव्यहितब्राह्मणतद्व्याख्यानमन्त्रप्रकृतब्रह्मपरामर्शिनौ स्तः ।

---

१. तै.उ. २.१

२. तै.उ. २.३

द्वितीयप्रश्नोत्तररूपतया गुहानिहितत्वविवरणार्थं चतुष्कोशान्तरत्वनिरूपणं भवति । एवं च यद् ब्राह्मणोपक्षिप्तं 'सत्यं ज्ञानमनन्तं ब्रह्म' इति मन्त्रवाक्येन विवृतं '[१]तस्माद्वा एतस्मात् आत्मनः आकाशः सम्भूतः' इति कारणवाक्यगतेन तदेतत्पदसमानाधिकरणेन आत्मपदेन परामृष्टं ब्रह्म - तदेव गुहानिहितत्व-विवरणार्थानन्दमयवाक्यगतेन आन्तरत्वेनात्मशब्देन च प्रत्यभिज्ञायत इति सूक्ष्मदृष्ट्या तत्प्रत्यभिज्ञानमात्रेणावगन्तव्यः मन्त्रब्राह्मणयोः व्याख्यान-व्याख्येयभावः स्पष्टो न भवति ।

कोशवाक्यानां आनन्दमयवाक्यस्य च व्याख्यानव्याख्येयभावः स्पष्टः । कुतः इति चेत् अन्योन्तर आत्मा इत्येतावत् प्रत्यभिज्ञानस्य विद्यमानत्वात् युज्यते ।

अनेनैव अभिप्रायेण मान्त्रवर्णिकसूत्रं कोशवाक्यविषयत्वेन नीतम् इति तात्पर्यम् ।

।। एतत्सूत्रव्याख्याने भामतीवैशिष्ट्यम् ।।

सूत्रस्य लक्षणं हि उक्तम् 'अल्पाक्षरं असंदिग्धं सारवद्विश्वतो मुखम् । अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ।।' इति । लक्षणे विश्वतो मुखपदेन अनेकार्थत्वविवक्षितम् । सूत्रलक्षणघटितत्वात् सूत्रस्य अनेकार्थत्वं भूषणमेव

१. तै.उ. ३.१

भवति । तद् अत्र द्रष्टुं शक्यते । एतत्सर्वं कल्पतरुव्याख्यानपरिमले विस्तरतया दृश्यते । अस्य सूत्रस्य भाष्यकारः शङ्कराचार्यः एकमर्थमविवक्षित्वा व्याचक्षते । टीकाकारः भामतीकारः वाचस्पतिमिश्रस्तु अन्यमर्थं विवक्षित्वा व्याख्यानं करोति । अतः पूर्वं विवरणं भाष्यकाराभिप्रायेण अस्ति । इदानीं करिष्यमाण-विवरणं टीकाभिप्रायमनुसृत्य भवति ।

१. ब्राह्मणं हि मन्त्रव्याख्यानरूपम् अतः उपायः । तदुपेयः मन्त्रः । इति भाष्यरत्नप्रभायां व्याख्यानं कृतमस्ति ।

२. मन्त्रो नाम प्रयोगोपायः । अन्नमयादिकोशचतुष्कवाक्यं आनन्दमय-ब्रह्मज्ञानोपायस्य देहादिव्यतिरेकस्य समर्पकत्वात् गौण्या वृत्त्या मन्त्र उच्यते । ब्राह्मणं हि उपेयप्रयोगविधायि इति प्रसिद्धं वर्तते । यथा आनन्दमयवाक्यं उपेयप्रयोगविधायिब्राह्मणवद् उपेयब्रह्मप्रत्यायकत्वात् ब्राह्मणं विवक्षितम् । अतः मन्त्रब्राह्मणयोः उपायोपेयभावः अस्ति । तयोः सम्प्रतिपत्तिसद्भावात् ब्रह्मैव आनन्दमयपदार्थः इति वक्तव्यम् । 'ब्रह्मविदाप्नोति परं' इत्युपक्रम्य 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यस्मिन् मन्त्रे यत् ब्रह्म प्रकृतं, सत्यज्ञानानन्तविशेषणैः निर्धारितं, यस्माद् आकाशादिक्रमेण स्थावरजङ्गमानि भूतानि अजायन्त, यच्च भूतानि सृष्ट्वा तानि अनुप्रविश्य गुहायां अवस्थितं, सर्वान्तरं, यस्य विज्ञानाय हि पुनः पुनः 'अन्योऽन्तर आत्मा' इति प्रक्रम्य आन्तरत्वं श्रूयते । तस्यैव ब्रह्मणः ब्राह्मणे च '[१]अन्योऽन्तर आत्मानन्दमयः' इति प्रत्यभिज्ञानं

१. तै.उ.१७.२

वर्तते । अतः परं ब्रह्मैव आनन्दमयः । सूत्रार्थस्तु मान्त्रवर्णिकमेव परं ब्रह्म ब्राह्मणेऽप्यानन्दमय इति गीयत इति विवक्षितः ।

प्रश्नः– ननु '[१]अन्योन्तर आत्मा' इति प्रत्यभिज्ञानेन विज्ञानमयस्य आनन्दमयैक्यं सिद्ध्यति । परन्तु आनन्दमयस्य ब्रह्मत्वं न सिद्ध्यति । कुतः इति चेत् विज्ञानमयादयोऽपि न ब्रह्मत्वेन अङ्गीकृताः सन्ति । अतः तदभिन्नस्य कथं ब्रह्मत्वं सम्भवति ? यदि च विज्ञानमयादीनां ब्रह्मत्वं अङ्गीकृतं स्यात् तदापि आनन्दमयस्य ब्रह्मत्वं न सिद्ध्यति । आनन्दमयस्य 'अन्योऽन्तरः' इति विज्ञानमयात् भिन्नत्वेन निर्देशस्य कृतत्वात् । अतः आनन्दमयः कथं ब्रह्म भवति ।

उत्तरम्– '[२]विज्ञानं देवा सर्वे' 'ब्रह्म ज्येष्टमुपासते' 'विज्ञानं ब्रह्म चेत् वेद' '[३]आनन्दं ब्रह्मणो विद्वान्' '[४]ये प्राणं ब्रह्मोपासते' '[५]येऽन्नं ब्रह्मोपासते' इति विज्ञानमयादिपर्यायशब्दैः अवगताभिः श्रुतिभिः ब्रह्मैव स्थूलारुन्धतीन्यायेन अन्नमयादिकोशरूपतया प्रथमं उपदिश्य उत्तरोत्तरपर्यायगतैः अन्यशब्दैः तत्तदुपाधिभ्यः प्रविविच्य निर्दिष्टम् ।

---

१. तै.उ. १७.२

२. तै.उ. ११.२

३. तै.उ. ९.११

४. तै.उ. ६.५

५. तै.उ. ५.४

प्रश्नः– यदि अन्नमयादिपर्याया 'येऽन्नं ब्रह्मोपासते' इत्यादि ब्रह्मश्रुति-सद्भावात् ब्रह्मप्रतिपादका भवन्ति । तर्हि विज्ञानमये एव ब्रह्मोपदेशस्य पर्यावसानं स्यात् । कुतः इति चेत् 'विज्ञानं देवा सर्वे' 'ब्रह्म ज्येष्ठमुपासते' 'विज्ञानं ब्रह्म चेद् वेद' इति मन्त्रे सर्वकामावाप्तिफलकीर्तनेन प्रत्यभिज्ञोपबृंहितेन ब्रह्मश्रुतिभ्यां च विज्ञानमयस्य ब्रह्मत्वप्रतिपादने तात्पर्यातिशयः प्रतीयते । अतः आनन्दमयस्य ब्रह्मत्वप्रतिपादनं कथं सङ्गच्छते ?

समाधानम्– '[1]अन्योन्तर आत्मा आनन्दमयः' इति आनन्दमयस्य विज्ञानमयान्तरतयोपदेशः वर्तते । अतः विज्ञानमये ब्रह्मोपदेशस्य पर्यवसानं न सम्भवति । तेन आनन्दमयज्ञानेनैव सर्वकामावाप्तिरूपफलं भवतीति निश्चीयते ।

अतः मन्त्रब्राह्मणयोः प्रत्यभिज्ञानात् आनन्दमयः परं ब्रह्म इति साधितं भवति ।

किञ्च मन्त्रब्राह्मणयोः एकार्थत्वं अवश्यं वक्तव्यं भवति । अन्यथा प्रकृतहानः अप्रकृतस्वीकारः स्यात् । यथा अन्नमयादिभ्यः अन्यः अन्तर आत्मा अभिधीयते तथा आनन्दमयात् अन्यः अन्तरः आत्मा न अभिधीयते । अतः स एव परं ब्रह्म । एतन्निष्ठा एव '[2]सैषा भार्गवी वारुणी विद्या' इति च वदति ।

---

१. तै.उ.१७.२

२. तै.उ. ४.२

अस्य सूत्रस्य व्याख्याने भाष्यकार-भामतिकारयोः अभिप्राये अविरोधनिरूपणम् ।।

भाष्यकारपक्षे मन्त्रपदं न प्रकरणपरम् । यतो भाष्ये 'ब्रह्मविदाप्नोति' इति परमोपक्रमोपन्यासः तस्यान्यपरत्वे प्रकरणान्य एवानन्दमयः स्यादिति शङ्कावारणार्थः । कारणवाक्याद्यर्थोपन्यासो मन्त्रस्यासम्बन्धपदनिचयव्यवधान-शङ्कावारणार्थः ।

यदानन्त्यं प्रतिज्ञाय श्रुतिस्तत्सिद्धये जगौ । तत्कार्यत्वं प्रपञ्चस्य तद्ब्रह्मेत्यवधारय ।। इति तैत्तिरीयवार्तिकोक्तरीत्या मान्त्रवर्णिकब्रह्मानुवृत्त-सूचनार्थश्च । अन्यथा हि प्रकृताहानेत्यादिग्रन्थः प्रतिपिपादयिषितमान्त्रवर्णिक-ब्रह्मविषयत्वाभावो बाधकोद्घाटनार्थः । एवं कृत्स्नस्य भाष्यवाक्यस्य सौत्रमन्त्र-पदमुख्यार्थानुरोध्यर्थपरत्वं टीकाटिप्पणीकारैः दर्शितमेव अस्ति ।

टीकाग्रन्थे तु सौत्रं मन्त्रपदं मुख्यार्थे भाष्योक्ततदर्थे वा केनचिदस्वारस्येन न प्रवृत्तम् । किन्तु मन्त्रवर्णस्येव कोशवाक्यजातस्य पर्यालोचनायामप्यानन्द-मयस्य ब्रह्मत्वे निश्चेतुं शक्यम् । अतः सापि युक्तिरथेन सूत्रेण मन्त्रशब्दस्य गौणीं वृत्तिमाश्रित्य विवक्षितेति सूचयितुमर्थान्तरमाश्रितम् । सूत्रस्य अनेकार्थत्वं अलङ्कार एव इति उपपादितमस्ति । तदुपपादनार्थं भामतीकारः 'आह सूत्रकारः' इत्याह ।

अनुपदं उत्तरसूत्रावतारिकारागतं सूत्रपदमेवमाशयं व्याचक्षाणानामाचार्या-

णामेतत्सूत्रावतारिकागतस्यापि सूत्रपदस्यायमेवाशय इत्यभिप्रायोस्त्येव किन्तु भाष्यानुक्तत्वात् टीकोक्तार्थो न श्रद्धेय इति मन्दशङ्कानिराकर्णार्तटीकोक्त एवार्थ उपपन्नतर इति तत्प्रौढिः प्रदर्शिता ।

।। [१]नेतरोनुपपत्तेः ।।

अस्य सूत्रस्य विषयः– अनुपपत्तिसद्भावात् ईश्वरादन्यः संसारी आनन्दमयः न सम्भवति । का सा अनुपपत्ति इति चेत्

१. '[२]सोऽकामयत । बहु स्यां प्रजायेयेति । स तपोऽतप्यत । स तपस्तप्त्वा । इदं सर्वमसृजत । यदिदं किञ्च ।' इति ब्रह्मानन्दवल्यां श्रूयते । अस्यां श्रुतौ शरीराद्युत्पत्तेः प्राक् अभिध्यानमुच्यते 'स तपोऽतप्यत' इति । इदं जीवे न सम्भवति । सति शरीरे ज्ञाने सति इष्टसाधनताज्ञाने सति वस्तुप्राप्त्युपायजिज्ञासायां कथं इष्टं वस्तु सम्पादयामीति आलोचनं भवति । शरीरस्यैवाभावे इष्टसाधनता-ज्ञानादिकं न सम्भवति । अत्र तु शरीरोत्पत्तेः प्राक् आलोचनात्मकतपः श्रूयते । अतः नात्र जीवः विवक्षितः इत्युच्यते ।

२. '[३]बहु स्यां प्रजायेयेति' इति सृज्यमानानां विकाराणां स्रष्टुः आनन्दमयाद् अभेदः उच्यते । जीवेन विकाराणां अभेदः अनुभवसिद्धः न भवति । अतः आनन्दमयः जीवः न भवितुमर्हति ।

---

१. ब्र.सू.१.१.१६

२. तै.उ. १४.१

३. तै.उ. १४.२

३. '[१]स इदं असृजत । यदिदं किञ्च' इति सर्वविकाराणां सृष्टिः श्रुतौ उच्यते । जीवेन सकलविकारसृष्टिः कर्तुं न शक्यते इति सर्वानुभवसिद्धं वर्तते । अतोऽपि आनन्दमयः जीवः इति वक्तुं न शक्यते ।

अत्र प्रश्नः जायते । यदि सर्वस्रष्टृत्वाद्यनेकहेतूपदेशः सूत्रेण क्रियते चेत् तदा वाक्यभेदः भवति । तच्च न युक्तं इति । अस्योत्तरं तु सत्यं वाक्यभेदः जायते इति । तथापि वाक्यभेदेन अनेकार्थवर्णनं सूत्रस्य अलङ्कार एव । यतः सूत्रस्य विश्वतो मुखत्वं लक्षणघटितमेव अत एव अनेकार्थवर्णने वाक्यभेदः न दोषावहः सम्भवति ।

सूत्रार्थस्तु– **इतरः** जीवः आनन्दमयः **न** कुतः इति चेत् **अनुपपत्तेः** तस्यानुपपत्तेरिति ।

।। [२]भेदव्यपदेशाच्च ।।

अन्यं च कारणं अस्ति । तेन आनन्दमयः जीव न भवति । आनन्दमयाधिकारे आनन्दमयनिरूपणप्रसङ्गे '[३]रसो वै सः । रसँ ह्येवायं लब्ध्वानन्दी भवति' इति जीवानन्दमयौ भेदेन व्यपदिशाति । श्रुत्यर्थस्तु– **रसः** सारः **वै** हि अयं आनन्दमय आत्मा । **अयं** जीवः **रसं** आनन्दमयं **लब्ध्वा आनन्दी भवति** । अस्यां श्रुतौ जीवात्मनः लब्धृत्वमुच्यते । तथा

---

१. तै.उ. १४.६

२. ब्र.सू.१.१.१७

३. तै.उ. १६.३

आनन्दमयस्य लभ्यता उच्यते । एवं लब्धृलब्धव्यरूपविरुद्धस्वभावयोः अभेदः नोपपद्यते । लब्धा एव लब्धव्यः इति वक्तुं न शक्यते । तस्माद् आनन्दमयस्य जीवात्मनः भेदे परब्रह्मत्वं सिद्धं भवति ।

यदि परब्रह्मत्वे जीवभेदः प्रयोजकः इति उच्यते तर्हि जीवाद् भिन्नः घटोऽपि भवति । अतः आनन्दमयः घटवद् अचेतनः स्यात् इति चेत् उच्यते आनन्दमये श्रुतौ आत्माशब्दप्रयोगः विद्यते । 'अन्योऽन्तर आत्मा आनन्दमयः' इति । तथा च यदि चेतनत्वे सति जीवत्वं न स्यात् तर्हि परिशेषाद् परब्रह्म एव भवति ।

अत्र प्रश्नः– यदि लब्धा जीव न लब्धव्यः, तर्हि 'आत्मान्वेष्टव्यः' '[१]आत्मलाभान्न परं विद्यते' इति श्रुतिस्मृत्योः जीवेन स्वात्मा लब्धव्य इत्युच्यते । तत्कथं उपपद्यते ? परमात्मनो वस्तुतो अभिन्नेन जीवात्मना परमात्मा कथं लभ्यते ?

उत्तरम्– परमार्थतो अभेदेऽपि अविद्यारोपितं भेदमुपाश्रित्य लब्धृलब्धव्यभावः शास्त्रे प्रतिपाद्यते । आत्मनः अप्रच्युतात्मभावस्यैव सतः तत्त्वानवबोधनिमित्तः मिथ्यैव अनात्मसु देहादिषु आत्मत्वनिश्चयो लोकप्रसिद्धः भ्रमः वर्तते । तेन आत्मानन्विष्टः अन्वेष्टव्यः अलब्धो लब्धव्यः अश्रुतः श्रोतव्यः अमतो मन्तव्यः अविज्ञातो विज्ञातव्य इत्यादि भेदव्यपदेश उपपद्यते ।

१.प.क.सू.१.२८

अयमत्राभिप्रायः– आत्मनः स्वाज्ञानजभ्रमेण देहाद्यभिन्नस्य भेदभ्रान्त्या परमात्मनो ज्ञेयत्वं लब्धव्यत्वं श्रोतव्यत्वं, मन्तव्यत्वं, विज्ञातव्याद्युक्तिः शास्त्रेषू श्रूयते । तथा च आत्मा अन्वेष्टव्य देहादिविविक्ततया ज्ञेयः, विवेकज्ञानेन लब्धव्यः साक्षात्कर्तव्यः, तदर्थं श्रोतव्यः, तदर्थं मन्तव्यः, तदर्थं निदिध्यासितव्यः इति । अत्र अन्वेषणं नाम विचारारम्भमात्रं, तत्फलाप्तिः लाभः, श्रवणं शक्ति-तात्पर्यज्ञानं इति भेदः अतः प्रत्येकं निर्देशः कृतः । यदि आनन्दमयः जीवः स्यात् तर्हि भेदव्यपदेशः न स्यात् ।

अत्रावान्तरप्रश्नः १– यदि एक एव आत्मा औपाधिकभेदात् लब्धृलब्धव्यभावापन्नः इति प्रतिपाद्यते तर्हि जीवस्यापि स्वरूपं लब्धव्यं स्वयं लब्धा स्यात् । एकस्यापि जीवस्य स्थूलसूक्ष्माद्युपाधिभेदाद् भेदवक्तुं शक्यते इति चेत् ।

उत्तरम्– स्वतन्त्रोपाधिभेदे चेतनभेदः सम्भवति । परब्रह्मणस्तु जीवो अविद्यायां विभक्तः, स तु अविद्यावच्छिन्न एव स्थूलसूक्ष्मोपाधिभ्यामवच्छिद्यत इति न स्वस्मादौपाधिकोपि भवति इति सिद्धान्तः ।

तथा च आनन्दमयः यदि जीवः स्यात् तर्हि जीवस्याविद्ययापि स्वतो भेदः न दर्शितः इति लब्धृलब्धव्यभाव नोपपद्यते । जीवब्रह्मणो भेदाभेदौ न स्तः इत्येतत् निराक्रियते इति भाष्यकाराणां अभिप्रायः ।

प्रश्नः२– कल्पितभेदेन लब्धृलब्धव्यभावः कुतः उच्यते ? श्रुत्यादिबलात् वास्तवभेदमेव अङ्गीक्रियतां का हानिः ?

उत्तरम्– '[१]नान्योऽतोऽस्ति द्रष्टा' इति श्रुतौ परमार्थतः सर्वज्ञात् परमेश्वरादन्यो द्रष्टा श्रोता वा प्रतिषिध्यते । अतः कल्पितभेदः एव वक्तव्यः । परमेश्वरस्तु अविद्याकल्पितात् शारीरात् कर्तुः भोक्तुः विज्ञानात्माख्याद् अन्यः । कल्पितस्य अधिष्ठानानेन अभेद वर्तते । अधिष्ठानस्य तु कल्पितेन भेद एव वर्तते न तु अभेदः । कुतः इति चेत् कल्पितस्याधिष्ठानात् ऋते सत्त्वादिकं नास्ति । अधिष्ठानस्य तु कल्पितं विना सत्त्वादिकं जगति अनुभवेन सिद्धं वर्तते । यथा रजतं हि आरोपितं अधिष्ठानात् शुक्तितो न भिद्यते । न हि तद्भेदेन अभेदेन वा शक्यं निवर्क्तुम् । शुक्तिस्तु परमार्थसती निर्वचनीया अनिर्वचनीयाद् रजताद् भिद्यते एव ।

प्रश्नः ३– ईश्वराद् द्रष्टा जीवोऽन्यो नास्ति चेत् जीवाभेदात् ईश्वरस्यापि मिथ्यात्वं स्यात् ।

उत्तरम्– अविद्याप्रतिबिम्बत्वेन कल्पितात् जीवात् चिन्मात्र ईश्वरः पृथगस्ति । अतः न तस्य मिथ्यात्वं घटते ।

कल्पितस्य अधिष्ठानाभेदेऽपि अधिष्ठानस्य कल्पितात् भेद अस्त्येव । अत्र भाष्यकारः दृष्टान्तमाह ।

१.बृ.उ.३.७.२३

१. यथा मायाविनः चर्मखड्गधरात् सूत्रेणाकाशमधिरोहतः, स एव मायावी परमार्थरूपो भूमिष्ठो अन्यः । अत्र दृष्टान्ते सूत्रारूढो हि स्वरूपेणापि मिथ्या, जीवस्तु न स्वरूपेण मिथ्या अपि तस्मिन् कल्पितं भेदमात्रं मिथ्या । अतः अत्र कल्पितत्वमात्रे दृष्टान्तः दीयते ।

२. यथा घटाकाशाद् उपाधिपरिच्छिन्नाद् अनुपाधिपरिच्छिन्न आकाशः अन्यः तथा ।

अयमत्र विशेषः– कल्पितभेदं आश्रित्य 'नेतरोनुपपत्तेः' 'भेदव्यपदेशाच्च' इति सूत्रद्वये विज्ञानात्मपरमात्मभेदः समर्थितः । अत्र वास्तवभेदः न विवक्षितः अस्ति । कुतः इति चेत् सूत्रे 'भेदः सत्यः' इति सत्यपदं नास्ति, '[१]तदनन्यत्वमारम्भणशब्दादिभ्यः' इत्यादि सूत्रेण एतादृशः एव प्रतिपाद्यते । श्रुत्यनुसारेण च कल्पितभेदः एव वक्तव्यः ।

।। [२]कामाच्च नानुमानापेक्षा ।।

आत्मनः आनन्दमयशब्दवाच्यत्वं समर्थयितुं साङ्ख्यमतं निराकरोति । प्रधानं त्रिगुणात्मकं इति साङ्ख्यशास्त्रे प्रतिपादितमस्ति । तच्च वेदान्तिभिरप्यङ्गीकृतमेव विद्यते । तथा च आनन्दात्मकसत्त्वप्रचुरं हि प्रधानमित्यपि प्रसिद्धमस्ति । अतः प्रधानमेव आनन्दमयशब्दवाच्यं भवतु इति तथा अनुमानसिद्धं जगत्कारणं प्रधानमेतदेव आनन्दमय एव भवतु इति साङ्ख्यप्रश्नः

१. ब्र.सू. २.१.१४

२. ब्र.सू.१.१.१८

अत्र समाधीयते । आनन्दमयाधिकारे '[1]सोऽकामयत । बहुस्यां प्रजायेयेति ।' इति आनन्दमयस्य कामयितृत्वं श्रूयते । कामयितृत्वं नाम कामरूपेच्छाकर्तृत्वम् । तच्च जडे प्रधाने न सम्भवति । ज्ञानेच्छादीनां चेतनधर्मत्वात् । अतः प्रधानं न आनन्दमयशब्दवाच्यम् । अत्र पुनः चोदना भवति । प्रधाने औपचारिकं कामयितृत्वं वक्तुं शक्यते । अतः 'सोऽकामयत' इत्यादि इच्छाप्रतिपादकानि प्रधानपराणि भवन्ति । अतः प्रधानमेव आनन्दमयशब्दमिति । अत्र उत्तरमुच्यते । इच्छावत्वं मुख्यमेव वक्तुं योग्यम् । न औपाचारिकं वक्तव्यम् । मुख्या-मुख्यार्थयोः मध्ये मुख्यार्थमेव बाधकाभावे वक्तव्यमिति नियमसद्भावात् ।

ननु प्रधानस्य कारणत्वं ईक्षत्यधिकरणे निराकृतमस्ति । पुनः कुतः अत्र निराक्रियते ? सत्यं पूर्वं ईक्षत्यधिकरणे निराकृतमस्ति । तथापि पूर्वसूत्रोदाहृतकामयितृत्वश्रुतिमाश्रित्य कामयितृत्वस्य प्रधाने प्रसक्तौ पुनः निराकरणं कृतमस्ति । किञ्च अनेन गतिसामान्यात् इति सूत्रमपि विवृतं भवति । अतः प्रयोजनसद्भावात् युक्तमेव पुनः अत्र निराकरणम् ।

।। [2]अस्मिन्नस्य च तद्योगं शास्ति ।।

अनेन सूत्रेण जीवः प्रधानं च आनन्दमयः न भवति इत्यत्र कारणं निरूपयति । आनन्दमयविषयकज्ञानवतः पुरुषस्य श्रुतिः साधकस्य आनन्दमयः योगं शास्ति निरूपयति । अत्र योगो नाम तदात्मना योगः तद्भावापत्तिरूपमुक्तिः

---

१. तै.उ. १४.१ २.ब्र.सू. १.१.१९

इत्यर्थः । तादृशं फलं शास्ति निरूपयति । एतादृशं फलं जीवस्य स्वज्ञाने न सम्भवति । तथा प्रधानस्य ज्ञानेन तस्य प्रधानत्वापत्तिरूपः मोक्षः न सम्भवति । कश्चित् विवेकवान् पुरुषः स्वात्मानः जडत्वमपेक्ष्य दीर्घकालं वैराग्येन विषयभोगत्यागेन साधनं न हि करोति । अतः आनन्दमयः जीवः प्रधानं च न सम्भवति । एतच्च श्रुतिप्रतिपादितं वर्तते ।

तथाहि– '[1]यदा ह्येवैष एतस्मिन्नदृश्ये अनात्म्ये अनिरुक्ते अनिलयने अभयं प्रतिष्ठां विन्दते । अथ सोऽभयं गतो भवति । यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते । अथ तस्य भयं भवति' इति ।

अस्याः तात्पर्यार्थः भाष्ये निरूपितमस्ति । **यदा एषः** साधकः पुरुषः **एतस्मिन् अदृश्ये** स्थूलप्रपञ्चशून्ये **अनात्म्ये** आत्मसम्बन्धं आत्म्यं लिङ्गशरीरं तद्रहिते, **अनिरुक्ते** निरुक्तं शब्दशक्त्यं तद्भिन्ने, **अनिलयने** निःशेषलयस्थानं निलयनं माया तच्छून्ये ब्रह्मणि **अभयं** यथा स्यात् तथा यदैव **प्रतिष्ठां** मनसः प्रकृष्टां वृत्तिमेष विद्वांल्लभते । अथ तदैव**अभयं** ब्रह्म प्राप्नोति । **यदा एतस्मिन्** आनन्दमये अल्पमपि **अन्तरं** अतादात्म्यरूपं **कुरुते** पश्यति तदा संसारभयात् न निवर्तते । यदा त्वेतस्मिन् आनन्दमये निरन्तरं तादात्म्येन प्रतितिष्ठति तदा संसारभयात् निवर्तते इति । तस्मात् आनन्दमयः परमात्मा एव भवति ।

अस्याः श्रुतेः न्यायनिर्णये एवं व्याख्यानमस्ति । यस्यामैक्यज्ञानावस्थायां

१. तै.उ.१७.१

विद्वान् एतस्मिन् ब्रह्मणि पञ्चीकृतभूतपञ्चकेन तत्कार्येण च समष्टिस्थूलदेहेन विराजा दृश्यशब्दितेनैक्यतादात्म्यशून्ये स्वसम्बन्धितया अध्यस्तेन्द्रियजातेन अपञ्चीकृतभूतकार्येण तादात्म्यादिहीने निकृष्योच्यन्त इति निरुक्तानि भूतसूक्ष्माणि तैश्चाभेदवर्जिते निःशेषलयस्थानं निलयनंमिति मूलप्रकृतेरुक्तेः तत्तादात्म्यादिरहिते प्रकर्षेण स्थितिं पुनरावृत्तरहितं लभते ।

सूत्रार्थस्तु– **अस्मिन्** विषयसप्तमीयम् । आनन्दमयविषयकप्रबोधवतः **अस्य** जीवस्य **तद्योगं** तस्मिन् योगं, तदात्मना योगः, तद्योगः तद्भावापत्ति-रूपमुक्तिः इत्यर्थः । यस्मात् **शास्ति** तस्मात् न प्रधानमिति योजना ।

आनन्दमये परस्मिन्नात्मनि स्पष्टब्रह्मलिङ्गानां तैत्तिरीयकश्रुतीनां समन्वयादस्ति सङ्गतिचतुष्टयमिति स्वमतसङ्ग्रहार्थं वृत्तिकारमतं एकदेशिमतं इदानीं प्रथमं दूषयति ।

१. सिद्धान्तिप्रश्नः– '[१]स वा एष पुरुषोन्नरसमयः' 'तस्माद्वा एतस्मादन्नर-समयात् अन्योन्तर आत्मा प्राणमयः' तस्मात् 'अन्योन्तर आत्मा मनोमयः' तस्मात् 'अन्योन्तर आत्मा विज्ञानमयः' इति श्रुतिरस्ति । अत्र अन्नमयप्राणमयमनोमयविज्ञानमयेषु मयट्प्रत्ययः विकारार्थकः इत्युक्त्वा आनन्दमयः इत्यत्र मयट्प्रत्ययस्य प्राचुर्यार्थः इति कथनं असमञ्जसम् । तेन अर्धजरतीयन्यायः आपतति । अर्धजरतीयन्यायस्तु इत्थं वर्तते । यत्र सर्वत्यागे

१.तै.उ.४.१

ग्रहणे वा प्रसक्ते निर्युक्तिकमेकांशोपादानं अंशान्तरत्यागश्च क्रियते तत्र अयं न्यायः प्रसरति । यथा जरती वृद्धास्त्री तस्याः पतिः तदर्धं मुखमात्रं गृह्णाति अवयवान्तरं त्यजति इति । एवं अत्रापि विकारार्थके मयटि बुद्धिस्थे सति अकस्मात् कारणं विना एकप्रकरणस्थस्य मयटः पूर्वं अन्नमयादिषु विकारार्थकत्वं अन्ते आनन्दमये प्राचुर्यार्थकत्वं कुतः उच्यते । तथा अन्नमयप्रकरणस्य कोशविषयत्वं आनन्दमयप्रकरणस्य ब्रह्मविषयत्वं अर्धजरतीयन्यायं केन दृष्टान्तेनाश्रीयते इति वक्तव्यं भवति ।

वृत्तिकारसमाधिः– '[१]सत्यं ज्ञानं अनन्तं ब्रह्म' इति मन्त्रवर्णे ब्रह्मणः लक्षणमुक्तम् । तदेव ब्रह्म आनन्दमयप्रकरणे निर्दिश्यते । अतः आनन्दमयप्रकरणं ब्रह्मविषयः, आनन्दमयश्च ब्रह्म इत्युच्यते । ब्रह्मणः विकारत्वासम्भवात् प्राचुर्यार्थं वक्तव्यं भवति ?। एवं च कारणं विना न कल्प्यते । अतः मन्त्रवर्णरूप-प्रमाणसद्भावात् एकप्रकरणमध्यपतितमयट्प्रत्ययस्य विकारार्थप्राचुर्यार्थरूप-विभिन्नार्थकथनेऽपि अर्धजरतीयन्यायतुल्यत्वं न भवति ।

२. सिद्धान्तिप्रश्नः– मन्त्रवर्णप्रकरणमात्रेण आनन्दमयस्य ब्रह्मत्वं वक्तुं न युक्तम् । तथात्वे एतत्प्रकरणपठितत्वात् अन्नमयादीनामपि ब्रह्मत्वं स्यात् । अतः निरवकाशं अन्यत् किमपि वक्तव्यम् । अतः सुस्थः अर्धजरतीय-न्यायादिपूर्वोक्तदोषाः ।

---

१. तै.उ.२.३

वृत्तिकारसमाधिः– अन्नमयादीनां अब्रह्मत्वमेव युक्तम् । यतः 'अन्योऽन्तर आत्मा प्राणमयः' इत्यादिवाक्येषु अन्नमयादीनां अन्तरः प्राणमयादयः श्रूयते । तथा 'अन्यः आत्मा' इति तस्य अन्नमयादिभ्यः भेदः अपि पठ्यते । आनन्दमयस्य अन्तरः अन्यः आत्मा कश्चित् न श्रूयते । तेन आनन्दमयस्य ब्रह्मत्वं सिद्ध्यति । एवं अनङ्गीकारे प्रकृतहानाप्रकृतप्रक्रियाप्रसङ्गः भवति ।

३. सिद्धान्तिवाक्यं– सत्यं । यथा अन्नमयादिषु अन्तरः अन्यः आत्मा श्रूयते तथा आनन्दमये न श्रूयते इति । तथापि आनन्दमयस्य ब्रह्मत्वं न सम्भवति । केन कारणेन इति चेत् । '[१]अन्योऽन्तर आत्मा आनन्दमयः' इति आनन्दमयं प्रकृत्य 'तस्य प्रियमेव शिरः । मोदो दक्षिणः पक्षः । प्रमोद उत्तरः पक्षः । आनन्द आत्मा । ब्रह्म पुच्छं प्रतिष्ठा ।' इति उच्यते । तत्र 'सत्यं ज्ञानं अनन्तं ब्रह्म' इति यत् ब्रह्म मन्त्रवर्णे प्रकृतं तदिह 'ब्रह्म पुच्छं प्रतिष्ठा' इति आनन्दमयपुच्छं इत्युच्यते । तद्विजिज्ञापयिषयैव अन्नमयादयः आनन्दमयपर्यन्ताः पञ्च कोशाः कल्प्यन्ते । तस्मात् प्रकृतहानाप्रकृतप्रक्रियाप्रसङ्गः न सम्भवति ।

वृत्तिकाराक्षेपः– यत् अन्नमयादिपञ्चकोशानां निरूपणं प्रधानस्य ब्रह्मणः निरूपणार्थमिति उक्तम् तन्न समीचीनम् । कुतः इति चेत् यथा अन्नमयादीनां 'इदं पुच्छं प्रतिष्ठा' पुच्छवद् विद्यमानपादादीनां निरूपणं कृतम् तथा 'ब्रह्म

१.तै.उ. २.९

पुच्छं प्रतिष्ठा' इति आनन्दमयस्य पुच्छवद् ब्रह्म निरूपितमस्ति । पुच्छं तु देहे अप्रधानं अवयवत्वात् अवयवी एव प्रधानः । तथा च ब्रह्मणः अप्रधानत्वमेव आयातं भवति । अतः प्रधानस्य ब्रह्मणः निरूपणार्थं कोशादीनां निरूपणमिति कथं उक्तम् ?

सिद्धान्ती– प्रकृतत्वात् । अस्य ब्रह्मप्रकरणत्वात् । तज्ज्ञानं इतर-निरूपणात् । ब्रह्मणः पुच्छत्वे प्राधान्यं न हीयते ।

वृत्तिकाराक्षेपः– आनन्दमयावयवत्वेऽपि ब्रह्मणि विज्ञायमाने न प्रकृतत्वं हीयते । आनन्दमयस्य ब्रह्मत्वात् ।

सिद्धान्ती– यदि आनन्दमयः ब्रह्म तथा तदवयवं च ब्रह्म इति उभयमपि ब्रह्म इत्यङ्गीक्रियते । तर्हि तदेव ब्रह्मानन्दमय आत्मा अवयवी, तदेव च ब्रह्म पुच्छं प्रतिष्ठा अवयव इति स्यात् । इदं न युज्यते अवयवावयविनोः भेदः प्रत्यक्षसिद्धः वर्तते । तद्विरुद्धं च स्यात् ।

वृत्तिकाराक्षेपः– आनन्दमयावयवत्वेपि ब्रह्मणि विज्ञायमाने न प्रकृतत्वं हीयते । आनन्दमयस्य ब्रह्मत्वात् ।

सिद्धान्ती– अनेन आनन्दमयस्य तथा तत्पुच्छस्योभयस्यापि ब्रह्मत्वं अङ्गीकृतं भवति । तथा च– किं ब्रह्म आनन्दमयवाक्ये पुच्छवाक्ये चोच्यते इति तवाभिप्रायः उत अन्यतरवाक्येन ब्रह्म प्रतिपाद्यते इति अभिप्रायः ।

न प्रथमपक्षः युक्तः । आनन्दमयवाक्ये तथा पुच्छवाक्ये ब्रह्म प्रतिपाद्यते इति वक्तुं न युक्तम् । यदि आनन्दमयः ब्रह्म तथा तदवयवत्वं च ब्रह्म इति उभयमपि ब्रह्म इत्यङ्गीक्रियते । तर्हि तदेव ब्रह्मानन्दमय आत्मा अवयवी तदेव च ब्रह्म पुच्छं प्रतिष्ठा अवयव इति स्यात् । इदं न युज्यते । अवयवावयविनोः भेदः लोके प्रत्यक्षसिद्धः वर्तते । तद्विरुद्धं च स्यात् ।

यदि द्वितीयपक्षमाश्रित्य अन्यतरवाक्येन ब्रह्म प्रतिपाद्यते इत्युच्यते तर्हि पुच्छवाक्येन प्रतिपाद्यते इत्येव वक्तव्यम् । कुतः इति चेत् पुच्छवाक्ये हि 'ब्रह्म पुच्छं प्रतिष्ठा' इति ब्रह्मशब्दः वर्तते । आनन्दमयवाक्येन ब्रह्म न प्रतिपाद्यते । तस्मिन् ब्रह्मशब्दः श्रवणाभावात् । तथा च आनन्दमयः न ब्रह्म । पुच्छमेव ब्रह्म । एवं च अवयवावयव्यभेदानुपपत्तिः परिहृतं भवति ।

वाक्यशेषादपि पुच्छवाक्ये एव ब्रह्म स्वप्रधानतया प्रतिपाद्यते । तथाहि– '[१]ब्रह्म पुच्छं प्रतिष्ठा' इत्युक्त्वा 'तदप्येष श्लोको भवति । असन्नेव स भवति । असद् ब्रह्मेति वेद चेत् । अस्ति ब्रह्मेति चेद् वेद । सन्तमेनं ततो विदुरिति' इति वाक्ये आनन्दमयोक्तिः नास्ति । ब्रह्मणः अस्तित्ववेदने गुणः तथा ब्रह्मण नास्तित्ववेदने दोषः प्रतिपादितः । तेन 'ब्रह्म पुच्छं प्रतिष्ठा' इति वाक्येन स्वप्रधानतया ब्रह्म प्रतिपाद्यते इति ज्ञायते ।

वृतिकाराक्षेपः– श्लोके आनन्दमयविषयकस्य भावाभावज्ञानस्य गुणदोषत्वकथनं न युज्यते । कुत इति चेत् ? 'तस्य प्रियमेव शिरः' इत्युक्तरीत्या

१.तै.उ.२.६

प्रियमोदप्रमोदानन्दरूपेण आनन्दमयः सर्वेषां प्रसिद्धो वर्तते । प्रसिद्धवस्तुतः चिन्तनं न समीचीनम् । ब्रह्म तु अप्रसिद्धम् । अतः तद्विषयकविचारः आवश्यकः अस्ति । अतः तत्सत्यत्वासत्यत्वज्ञानस्य गुणदोषकथनं उपपन्नं भवति । अतः तद्वेदनगुणदोषकथनात् तद्वाक्ये प्रधानतया ब्रह्म प्रतिपाद्यते इति न वक्तव्यम् ।

किञ्च ब्रह्म प्रधानं वर्तते । पुच्छं निकृष्टं इति लोकसिद्धमस्ति । एवं च ब्रह्म आनन्दमयवाक्ये 'ब्रह्म पुच्छं प्रतिष्ठा' इति आनन्दमयपुच्छत्वेन कथं उच्यते ? तथा सति प्रधानस्य पुच्छत्वमुक्तं स्यात् ।

सिद्धान्ती–

१.पुच्छशब्दस्य ब्रह्मणि वृत्तिमात्रमस्ति इति पृच्छ्यते अथवा मुख्यवृत्तिप्रश्नः क्रियते ?

पुच्छशब्दस्य ब्रह्मणि वृत्तिमात्रमङ्गीक्रियते चेत् न दोषः । प्राणमयप्रकरणे '[१]पृथिवी पुच्छं प्रतिष्ठा' इति प्राणमयस्य पृथिवी पुच्छं इत्युच्यते । तत्र पुच्छशब्दस्य लक्षणया आधार इत्यर्थः क्रियते तथा अत्रापि सर्वाधारे ब्रह्मणि पुच्छपदं लक्षणया प्रवर्तते ।

ब्रह्मणि पुच्छशब्दस्य मुख्यवृत्तिप्रश्न इत्युच्यते चेत् प्रतिष्ठाशब्दविरोधात् नैव मुख्यवृत्तिः उच्यते ।

किञ्च त्वयापि पुच्छशब्दस्य मुख्यवृत्तिः नोच्यते । वक्तुं न शक्यते च ।

१.तै.उ. २.२

ब्रह्मणः आनन्दमयस्य लाङ्गूलत्वाभावात् । प्रतिष्ठापदं च श्रुतौ श्रूयते । लाङ्गूलत्वमुख्यार्थे तच्च बाधकं भवति । लोके लाङ्गूलं कुत्रापि आधारभूतं न दृष्टमस्ति । अतः त्वयापि लक्षणया आधार इत्यर्थ एव वक्तव्यः । अपि च त्वत्पक्षे ब्रह्मपदं आनन्दमयावयवलक्षकं वर्तते । एवं त्वत्पक्षे उभयपदलक्षणा । अस्मत्पक्षे एकपदस्यैव लक्षणा इति गुण एव भवति ।

सिद्धान्तानुसारेण तु पुच्छवत् पुच्छम् । प्रतिष्ठा परायणमेकनीडं लौकिकानन्दजातस्य ब्रह्मानन्द इत्येतदनेन विवक्ष्यते । अवयवत्वं न विवक्षितम् । किञ्च ब्रह्मानन्दं सर्वे जीवाः आश्रयन्ति इति '[1]एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' इति श्रुत्या प्रतिपाद्यते । अतः युक्तमेव अस्मदुक्तार्थः । मयटो विकारार्थत्वोक्त्या प्राचुर्यार्थत्वं निरस्यता पुच्छवाक्ये स्वप्रधान-ब्रह्मोक्तिरुक्ता।

२. किञ्च प्राचुर्यार्थकमयटा सविशेषप्रतिपाद्यते इत्युच्यते चेत् निर्विशेषश्रुत्या बाधो सम्भवति । तच्च इत्थं– 'यत्र सविशेषत्वं तत्र वाङ्मनसगोचरत्वम्' इति व्याप्तिः अस्ति । श्रुतौ ब्रह्मणि वाङ्मनसगोचरत्वरूपव्यापकाभावात् सविशेषत्वा-भावरूपव्याप्याभावसिद्ध्या निर्विशेषत्वसिद्धिः उच्यते । आनन्दमयस्य ब्रह्मत्वे प्रियाद्यवयवत्वेन सविशेषं ब्रह्माभ्युपगन्तव्यं स्यात् । निर्विशेषं तु ब्रह्म वाक्यशेषे श्रूयते । वाङ्मनसयोरगोचरत्वाभिधानात् । '[2]यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान् । न बिभेति कुतश्चनेति' ।

---

१. बृ.उ.४.३.३२

२. तै.उ.२.९

ननु सविशेषमेव ब्रह्म । रागादिकलुषितमनसां अगोचरः इति 'यतो वाचो' इति श्रुत्या उच्यते । रागादिरहितानां ब्रह्म गोचर एव । अत नैतत् निर्विशेषब्रह्मसाधकमिति चेत् न सविशेषं ब्रह्म मिथ्या । अतः तज्ज्ञानात् 'न बिभेति' इति अभयं भवति इति वचनं न युज्यते । तं प्रत्येव श्रुतिः अगोचरत्वं प्रतिपादयतीति यदि उच्यते तदा अप्राप्तनिषेधः स्यात् अतः निर्विशेष-प्रतिपादकमित्येव वक्तव्यम् । अतो निर्विशेषब्रह्मसिद्धये पुच्छवाक्यमेव उदाहरणमिति भावः ।

३. सम्प्रति मयटः प्राचुर्यार्थत्वे दोषान्तरं च उच्यते । अपि च आनन्दप्रचुर इत्युक्ते दुःखास्तित्वमपि गम्यते । प्राचुर्यार्थस्य लोके प्रतियोग्यल्पत्वापेक्षत्वात् । तथा च सति '[१]यत्र नान्यत् पश्यति नान्यत् शृणोति नान्यत् विजानाति स भूमा' इति भूम्नि ब्रह्मणि तद्व्यतिरिक्ताभावश्रुतिरुपरुध्येत ।

प्रत्ययार्थत्वेन प्रधानस्य प्राचुर्यार्थस्य प्रकृत्यर्थो विशेषणं, विशेषणस्य यः प्रतियोगी विरोधीति तस्याल्पत्वमपेक्षयते । यथा विप्रमयो ग्राम इति शूद्राल्पत्वम् ।

प्रकृत्यर्थप्राधान्ये त्वयं दोषः नास्ति । 'प्रचुरप्रकाशः सविता' इत्यत्र तमसो अल्पस्याप्यभावात् । परन्तु आनन्दमयपदस्य प्रचुरानन्दलक्षणादोषः स्यादिति मन्तव्यम् ।

१.छा.उ. ७.२४.१

४. प्राचुर्यार्थताभावात् मयटः नानन्दमयो ब्रह्म इत्यत्रैव हेत्वन्तरमाह । प्रतिशरीरं च प्रियादिभेदात् आनन्दमयस्यापि भिन्नत्वम् । ब्रह्म तु न प्रतिशरीरं भिद्यते । '[१]सत्यं ज्ञानमनन्तं ब्रह्म' इत्यानन्त्यश्रुतेः । '[२]एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा' इति श्रुत्यन्तरात् ।

बाधकानि निरूपयति –

वृत्तिकारेण हि 'अभ्यासात् आनन्दमयः ब्रह्म' इत्युपपादितमस्ति । भाष्यकारः तं विकल्पपूर्वकं निराकरोति । तत्र अभ्यासशब्देन आनन्दमय-पदाभ्यासः विवक्ष्यते उत आनन्दशब्दस्याभ्यासः विवक्षितः । तत्र प्रथमः वक्तुं न शक्यते । हेतोः स्वरूपासिद्धिदोषसम्भवात् । तच्च इत्थम्–

१. श्रुतिषु आनन्दमयपदस्याभ्यासः न श्रूयते । प्रातिपदिकार्थमात्रं आनन्दमात्रमेव हि सर्वत्र श्रुतिषु अभ्यस्यमानं दृश्यते । तथा हि– '[३]रसो वै सः । रसँ ह्येवायं लब्ध्वानन्दी भवति । को ह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यात्' 'सैषानन्दस्य मीमाँसा भवति' 'आनन्दं ब्रह्मणो विद्वान् । न बिभेति कदाचनेति' । '[४]आनन्दो ब्रह्मेति व्यजानात्' इति । तस्मात् आनन्दमयपदाभ्यासादिति हेतु यदि आनन्दमयस्य ब्रह्मत्वं सिषायिषितं चेत् । हेतोः स्वरूपासिद्धिदोषः भवति ।

---

१. तै.उ.२.१

२. श्वे.उ. ६.११

३.तै.उ.२.७-९

४.तै.उ.६.६

वृत्तिकाराक्षेपः– श्रुतिषु अभ्यस्यमानानन्दपदं आनन्दमयपरम् । अतः आनन्दपदाभ्यासेऽपि आनन्दमयाभ्यास एव । तस्मात् हेतोः स्वरूपासिद्धिः न सम्भवति । अतः आनन्दमयः ब्रह्म इति सिद्ध्यति ।

सिद्धान्ती– यदि च आनन्दमयशब्दस्य ब्रह्मविषयत्वं निश्चितं भवेत् । तत उत्तरेष्वानन्दमात्रप्रयोगेष्वप्यानन्दमयाभ्यासः कल्प्येत । तथा च आनन्दमयस्य ब्रह्मत्वे सिद्धे आनन्दपदस्य आनन्दमयपरत्वज्ञानात् अभ्याससिद्धिः अभ्याससिद्धौ आनन्दमयपदेन ब्रह्मसिद्धिः भवति इति अन्योन्याश्रयः । आनन्दमयस्य तु ब्रह्मत्वं नास्ति । 'तस्य प्रियमेव शिरः' इत्यादिना प्रियशिरस्त्वादिना तस्य सविशेषत्वात् । ब्रह्मणः निर्विशेषत्वात् इति पूर्वमेवावोचाम ।

यदि आनन्दपदाभ्यासात् आनन्दमयः ब्रह्म इत्युच्यते इति द्वितीयः पक्षः आश्रीयते चेत् श्रुत्यन्तरबाधितं आनन्दमयस्य ब्रह्मत्वम् । '[१]विज्ञानमानन्दं ब्रह्म' इति ब्रह्मणि आनन्दमयशब्दाप्रयोगात् आनन्दपदस्यैव प्रयोगसद्भावात् इत्यभिप्रायेण उपसंहरति । तथा तर्हि आनन्दपदाभ्यासः किं विषयः इति चेत् पुच्छवाक्योक्तब्रह्मविषयः एव आनन्दपदाभ्यासः इति उपसंहरति । तस्मात् श्रुत्यन्तरे 'विज्ञानमानन्दं ब्रह्म' इत्यानन्दपदप्रातिपादिकस्य ब्रह्मणि प्रयोगः दृश्यते । तस्मात् 'यदेष आकाश आनन्दो न स्याद्' इत्यादिः ब्रह्मविषयः प्रयोगः न त्वानन्दमयाभ्यास इत्यवगन्तव्यम् ।

१.बृ.उ. ३.९.२८

वृत्तिकारप्रश्नः– 'अभ्यासात् आनन्दमयः ब्रह्म' इत्युक्तम् । भाष्यकारः अभ्यासादिति हेतोः आनन्दमयाभ्यासाद् इति विवक्षा चेत् स्वरूपासिद्धिदोषमुक्त्वा अदूषयत् । तस्य परिहारं पूर्वपक्षी चकार । तथाहि– मयडन्तस्यैवानन्दशब्दस्याभ्यासः श्रुतौ हि श्रूयते । '[1]एतमानन्दमयमात्मानमुपसङ्क्रामति' इति । तस्मात् आनन्दमयपदाभ्यासात् इत्युक्ते न कोऽपि दोषः सम्भवति ।

सिद्धान्ती– अस्य वाक्यस्य ब्रह्मविषयत्वं नास्ति । विकारात्मनः हि अन्नमयप्राणमयमनोमयविज्ञानमयाः । ते न ब्रह्म । किन्तु अनात्मनः एव । तेषामुपसङ्क्रमितव्यत्वमस्ति । तेषां प्रवाहे पठितत्वात् आनन्दमयोपि न ब्रह्म भवति । किन्तु अनात्मा एव भवति । तस्मात् आनन्दमयः ब्रह्म इति प्रतिज्ञा श्रुतिबाधिता एव भवति ।

वृत्तिकारप्रश्नः– विकारार्थकान्नमयादिशब्दप्रवाहमध्यपठितत्वात् आनन्दमयशब्दस्य अब्रह्मत्वप्रतिपादनं न युज्यते । '[2]स यश्चायं पुरुषे । यश्चासावादित्ये । स एकः । स य एवंवित् । अस्माल्लोकात् प्रेत्य । एतमन्नमयमात्मानमुपसङ्क्रामति । एतं प्राणमयमात्मानमुपसङ्क्रामति । एतं मनोमयमात्मानमुपसङ्क्रामति । एतं विज्ञानमयमात्मानमुपसङ्क्रामति । एतमानन्दमयमात्मानमुपसङ्क्रामति' इति ब्रह्मविदं प्रक्रम्य अन्नमयादौ उपसङ्क्रमणमुच्यते । उपसङ्क्रमणं च ज्ञानफलप्राप्त्यर्थः ।

---

१. तै.उ.२.८

२. तै.उ.२.८

यदि आनन्दमयः ब्रह्म न स्यात् तर्हि आनन्दमयप्राप्तिः ब्रह्मप्राप्तिरूपा न भवति । तथा च ब्रह्मप्राप्तेः अनुक्तत्वेन श्रुतेः प्रक्रमभङ्गरूपदोषः घटते । प्रक्रमभङ्गो नाम यत्किञ्चित् फलप्राप्त्यर्थं उपासना कथनम् । फलस्य अनुक्तेः तद्भङ्गः सम्भवति ।

सिद्धान्ती– नैष दोषः । अत्र प्रक्रमभङ्गदोषः न सम्भवति । तथाहि– किमिदं उपसङ्क्रमणं प्राप्तिः अतिक्रमो वा । आद्ये अवयविप्राप्त्या अवयव-प्राप्तेरधिकत्वात् पुच्छब्रह्माप्तिरुक्तैव । अवयविभूतानन्दमयोपसङ्क्रमणनिर्देशेनैव अवयवपुच्छप्रतिष्ठाभूतब्रह्मप्राप्तेः फलस्य निर्दिष्टत्वात् । ज्ञानेन कोशानां बाधस्तदिति सिद्धान्ते बाधावधिप्रत्यागानन्दलाभः अर्थादुक्त उत्तरश्लोकेन स्फुटीकृत इत्याह-- रत्नप्रभा '[1]तदप्येष श्लोको भवति । यतो वाचो निवर्तन्ते' इत्यादिना ब्रह्मप्राप्तिफलस्य प्रपञ्च्यमानत्वात् । एवं च विशिष्टप्राप्त्युक्त्या विशेषणप्राप्तिरूपफलस्य श्रुत्या उक्तत्वात् न प्रक्रमभङ्गः सम्भवति ।

यदि अतिक्रमरूपः द्वितीयार्थः अभिप्रेयते तदा नद्याद्यतिक्रमस्य परतीराप्तिवत् कोशातिक्रमस्य ब्रह्माप्तित्वात् तत्प्राप्तिः अर्थादुक्ता भवति इति वक्तव्यम् । तच्च न युक्तम् । श्रुतिः एवं न प्रतिपादयति ।

वृत्तिकाराक्षेपः– आनन्दमयसन्निधाने '[2]सोऽकामयत बहु स्यां प्रजायेयेति' इति श्रुतिरस्ति । तेन आनन्दमयः ब्रह्मेति सिद्ध्यति । कुत इति चेत् तस्य जगत्कारणत्वाभिधानात्। तस्मात् आनन्दमयः ब्रह्म। न तु तदवयव एव ब्रह्म।

१.तै.उ.९.१ २. तै.उ.१४.१

सिद्धान्ती– 'ब्रह्म पुच्छं प्रतिष्ठा' इति वाक्यं 'सोऽकामयत' इति वाक्यापेक्षया सन्निहिततरेण ब्रह्मणा सम्बध्यमाना नानन्दमयस्य ब्रह्मतां प्रतिबोधयति। तदपेक्षत्वाच्चोत्तरस्य कामयितृपुच्छब्रह्मविषयत्वात् ग्रन्थस्य 'रसो वै सः' इत्यादेः नानन्दमयविषयता।

वृत्तिकाराक्षेपः– ननु 'सोऽकामयत' इति ब्रह्मणि पुंलिङ्गेन निर्देशः नोपपद्यते। ब्रह्मशब्दस्य नपुंसकलिङ्गत्वात्।

सिद्धान्ती– नायं दोषः। '[1]तस्माद्वा एतस्मादात्मनः आकाशः सम्भूतः' इत्यत्र पुंलिङ्गेनाप्यात्मशब्देन ब्रह्मणः प्रकृतत्वात्।

वृत्तिकाराक्षेपः– भृगुवल्ल्यां पञ्चमपर्यायस्य ब्रह्मविषयकमस्ति। तद्वद् इहापि पञ्चमस्थानस्थत्वानन्दमये ब्रह्मवल्ली समाप्ता। भृगुवल्ल्यां यथा ब्रह्मप्रतिपादकत्वमस्ति तद्वत् इहापि स्थानरूपात् तात्पर्यनिर्णायकात् आनन्दमयः ब्रह्म इत्युच्यते।

सिद्धान्ती– भृगुवल्लयां या तु '[2]भार्गवी वारुणी विद्या' 'आनन्दो ब्रह्मेति व्यजानात्' इति, तस्यां मयडश्रवणात्, प्रियशिरस्त्वाद्यश्रवणाच्च युक्तमानन्दस्य ब्रह्मत्वम्। आनन्दमयप्रकरणे तु विकारार्थकः मयट्प्रत्ययः श्रूयते, प्रियशिर-स्त्वादिविशेषाश्च श्रूयते तस्मात् आनन्दमयः न ब्रह्म। अतः स्थानापेक्षया मयट्श्रुतेः सावयवत्वलिङ्गस्य प्रबलत्वात्, ताभ्यां स्थानं बाध्यते। तस्मात् आनन्दमयः न ब्रह्म भवति।

१.तै.उ.३.१ २. तै.उ.४.१

इष्टपुत्रादिदर्शनजं सुखं प्रियः, प्रियादिलाभनिमित्तः हर्षः मोदः, मोदः एव प्रकृष्टः यदा भवति विषयस्मृतेश्च अभिव्यक्तः सुखविशेषः प्रमोदः, आनन्दमात्रं आनन्द इत्युच्यते । एते सत्वोपसर्जनात् तमसः, तदुपसर्जनात् रजसः, द्वयोरुपसर्जनात् सत्वात् केवलाच्च अभिव्यक्तं सुखं तत्तच्छब्दवाच्यम् । तेन विषयसम्बन्धं सत्वादिसम्बन्धं वा विशेषमीषन्मात्रमप्यनाश्रित्य ब्रह्मणः स्वतः न प्रियशिरस्त्वादि युज्यते । तस्मात् आनन्दमयस्य सविशेषत्वात् ब्रह्मणः अन्यः एव इति प्रतिपादनीयम् ।

श्रुतौ च सविशेषं ब्रह्म प्रतिपिपादयिषितं वर्तते । तस्य ब्रह्मणः वाङ्मनसगोचरत्वाभावमपि उपपाद्यते । तस्मात् अन्नमयादिष्विवानन्दमयेऽपि विकारार्थ एव मयड्विज्ञेयो न प्राचुर्यार्थः ।

अद्वैतमतानुसारेण सूत्रव्याख्यानम्

एवं भाष्यकारः शङ्कराचार्यः वृत्तिकारस्य उपवर्षस्य अभिप्रेतं अद्वैतैकदेशिमतं निरूप्य सप्रमाणं सयुक्तिकं विमृश्य स्वाभिप्रेतं अधिकरणतात्पर्यं निरूपयति ।

आनन्दमयाधिकरणे सूत्राणि तैत्तिरीयोपनिषद्विरुद्धानि प्रतिभान्ति । प्रायपाठानुसारेण आनन्दमयपदस्य आनन्दविकार इत्यर्थः । परन्तु सूत्रे 'विकारशब्दान्नेति चेन्न प्राचुर्यात्' इति प्राचुर्यार्थः प्रदर्शितः । एवमादिविरोधे कः पक्षः अवलम्बनीयः इति जिज्ञासुं प्रति भाष्यकारः समादधाति । वेदसूत्रयोः

विरोधे तु '[1]गुणे त्वन्याय्यकल्पना' इति न्यायेन सूत्राण्यन्यथा नेतव्यानि । तथाहि–

विप्रतिपत्तौ विकल्पः स्यात् गुणे त्वन्याय्यकल्पना एकदेशत्वात्

अग्निषोमीये पशौ 'अदितिः पाशं प्रमुमोक्तु' 'अदितिः पाशान् प्रमुमोक्तु' इति एकवचनबहुवचनान्तमन्त्रौ पठ्येते । तत्र बहुवचनान्ते मन्त्रे सन्देहः भवति । प्रकृतौ एव अग्निषोमीये निविशते अथवा बहुपाशकेषु पशुगणेषु उत्कृष्यते इति । एकस्मिन् पशौ बहुवचनस्यानन्वितत्वमस्ति । तस्मात् अस्मात् बहुपाशयुक्तेषु बहुपशुषु उत्कर्षः कर्तव्यः इति प्राप्ते इदं सूत्रं प्रवर्तते । बहुवचनान्तश्रुतिः न उत्क्रष्टव्यः । किन्तु एकवचनान्तेन मन्त्रेण सह विकल्पनीयः । 'पाशान्' इत्यत्र प्रधानस्य अनन्वितत्वात् कथं एकपशुयागीयमन्त्रे अन्वयः इति चेत् । प्रातिपदिकविभक्त्ययोः मध्ये प्रातिपदिकं धर्मिवाचकत्वात् प्रधानं भवति । विभक्तिस्तु कर्मत्वकरणत्वरूपधर्मवाचकत्वात् गुणभूता वर्तते । तथा विभक्तिवचनयोः मध्ये विभक्तिः कर्मत्वकारकत्वरूपकारकवाचित्वात् प्रधानं भवति । वचनस्य कारकसङ्ख्यावाचित्वात् गुणभूतम् । तथा सति बहुवचनान्ते पाशशब्दे प्रातिपदिकं कर्मकारकविभक्तिश्चैकस्मिन् पाशे सङ्गच्छेते। गुणभूते बहुवचने लक्षणावृत्तिः कल्पनीया । पाशावयवगतं बहुत्वं लक्ष्यते। तस्मात् गुणभूतं वचनमात्रमनुसृत्य कृत्स्नस्य मन्त्रस्य प्रकरणपाठो न बाधनीयः। किन्तु प्रधानानुसारेण मन्त्रयोः समानत्वात् विकल्पः स्यात् ।

१.शा.दि. ९.३.५.

तथा च सूत्रार्थः– अनुष्ठेयपाशस्य एकत्वात् बहुत्वाभिधायित्वाच्च **विप्रतिपत्तौ** विरोधे सति मन्त्रः न उत्क्रष्टव्यः किन्तु एकवचनान्तेन सहास्य **विकल्पः स्यात्** उभयोरपि पाशविशिष्टकर्मप्रतिपादकत्वेन समत्वात् । **गुणे तु** बहुवचने **अन्याय्यकत्वकल्पना** । ततश्च एकदेशबहुवचनाश्रयेण नोत्कर्ष इत्यर्थः ।

एवमत्रापि सूत्राणि अध्याहारलक्षणानुषङ्गादिभिः कथञ्चित् अविरोधेन योजनीयानि भवन्ति इत्यभिप्रायः ।

ननु सर्वज्ञसूत्रकारः कुतः एवं श्रुतिविरोधभ्रान्तिकरसूत्राणि सूत्रयामास इति चेत् । अध्याहाराद्यपेक्षानेकार्थप्रत्यायनार्थमेव अरचयत् । तथा च सूत्राणि अध्याहारलक्षणानुषङ्गादिभिः योजनीयानि ।

सूत्राणां योजनप्रकारः पूर्वपक्षप्रापकसाधनम् - सङ्गतिनिरूपणम्

इतः पूर्वस्मिन् ईक्षत्यधिकरणे ब्रह्मणि मुख्येक्षणकर्तृत्वसम्भवात् 'स ऐक्षत' इति श्रुतिप्रतिपाद्यं ब्रह्म इति निर्णयः कर्तुं शक्यते । अस्मिन् विषये किमपि संशयो नास्ति । श्रुत्यपेक्षया दुर्बलः प्रायपाठो न निश्चायकः किन्तु बाधितः इति उपपादितम् ।

अस्मिन् अधिकरणे पूर्वपक्षे तथा सिद्धान्ते लक्षणा । पूर्वपक्षे पुच्छशब्दस्य लक्षणा, लक्ष्यार्थस्तु पूर्वपक्षे पुच्छत्वदृष्टिः, सिद्धान्तेपि पुच्छशब्दस्य आधारत्वे

लक्षणा लक्ष्यार्थस्तु आधारत्वम् । प्रायपाठानुसारेण पश्चात् लम्बमानावयवत्व-विवक्षायां न श्रुतिविरोधः ।

तथा च पूर्वाधिकरणेन अस्याधिकरणस्य **प्रत्युदाहरणसङ्गतिः** । अस्य लक्षणं तु–

तैत्तिरीयोपनिषदः स्पष्टब्रह्मलिङ्गाया निर्गुणब्रह्मान्वयोक्तेः **श्रुत्यादिसङ्गतयः** ।

प्रायपाठानुसारेण पक्षित्वेन निरूपिते आनन्दमये 'ब्रह्म पुच्छं प्रतिष्ठा' इति वाक्यं पश्चाद् लम्बमानावयवत्वज्ञानप्रापकं सत् आनन्दमयगुणतयैव ब्रह्म प्रतिपादयतीति प्रतीयते । उपक्रमोपसंहारैकरूप्यावधृतप्राधान्यस्य ब्रह्मणः ब्रह्मपदेन प्रत्यभिज्ञानात् प्राधान्येनैव ब्रह्म प्रतिपादयतीति इत्यपि प्रतीयते । ततश्च संशयः– 'ब्रह्म पुच्छं प्रतिष्ठा' इत्यत्र किमानन्दमयावयवत्वेन ब्रह्म विवक्ष्यते उत स्वप्रधानत्वेनेति ।

पूर्वपक्षे सगुणोपास्तिः सिद्धान्ते निर्गुणप्रमितिः **फलम्** ।

पुच्छशब्दादवयवत्वेनेति प्राप्ते–

आनन्दमयोऽभ्यासात्

सूत्रस्थानन्दमयशब्देन पञ्चमपर्यायस्थपुच्छवाक्यं लक्षणया गृह्यते । तथा च '[1]ब्रह्म पुच्छं प्रतिष्ठा' इति वाक्यं इति पक्षनिर्देशः । ब्रह्मप्रतिपादकम् इति साध्यं अभ्यासात् इति हेतुबलेन लभ्यते । अभ्यासात् इति हेतुः । तथा च–

१.तै.उ.११.४

'ब्रह्म पुच्छं प्रतिष्ठा' इति वाक्यं स्वप्रधानब्रह्मप्रतिपादकं अभ्यासात् इत्यनुमानमुक्तं भवति । '[1]असन्नेव स भवति' इत्यस्मिन् निगमनश्लोके ब्रह्मण एव केवलस्याभ्यस्यमानत्वात् ।

विकारशब्दान्नेति चेन्न प्राचुर्यात्

विकारशब्देन विक्रियते अनेनेति विकारः अवयवः अभिप्रेतः अस्ति । पुच्छमित्यवयवशब्दान्न स्वप्रधानत्वं ब्रह्मण इति यदुक्तं तस्य परिहारो वक्तव्यः । अत्रोच्यते । नायं दोषः प्राचुर्यादप्यवयवशब्दोपपत्तेः । प्राचुर्यं प्रायापत्तिः । अवयवक्रमस्य बुद्धौ प्राप्तिरित्यर्थः । अवयवप्राये वचनमित्यर्थः । अत्र हि प्रकृतस्य ब्रह्मणो ज्ञानार्थं कोशाः पक्षित्वेन कल्प्यन्ते । अस्मिन् विषये तात्पर्यं नास्ति । अन्नमयादीनां हि शिरआदिषु पुच्छान्तानि अववयवानि उक्तानि । तेषु आनन्दमयस्यापि 'ब्रह्म अधिकरणं' इत्यनुक्त्वा शिरआदीन्यवयवान्तराण्युक्त्वा 'ब्रह्म पुच्छं प्रतिष्ठा' इत्याह । तस्य कारणं तु पूर्वं अवयवप्रधानप्रयोगात् तत्प्रयोगस्यैव बुद्धौ सन्निधानात् पुच्छशब्देनापि अधिकरणलक्षणोपपत्तेः पुच्छशब्देन निर्देशयामास । यत्कारणमभ्यासादिति स्वप्रधानत्वं ब्रह्मणः समर्थितम् ।

तद्धेतुव्यपदेशाच्च

तस्य ब्रह्मणः सर्वकार्यहेतुत्वव्यपदेशात् । प्रियादिविशिष्टत्वाकारेणानन्दमयस्य जीवस्य कार्यत्वात् तं प्रति शेषत्वं ब्रह्मणो न युक्तमित्यर्थः ।

१. तै.उ.१२.१

सर्वस्य विकारजातस्य सानन्दमयस्य कारणत्वेन ब्रह्म व्यपदिश्यते '[1]इदँ सर्वमसृजत । यदिदं किञ्च' इति । न च कारणं सत् ब्रह्म स्वविकारस्यानन्दमयस्य मुख्यया वृत्त्यावयव उपपद्यते ।

'अपराण्यपि सूत्राणि यथासम्भवं पुच्छवाक्यनिर्दिष्टस्यैव ब्रह्मण उपपादकानि द्रष्टव्यानि ।' इति भाष्यस्थवाक्यं तदनुसारेण भाष्यरत्नप्रभा-भामतीन्यायनिर्णयवेदान्तकल्पतरुग्रन्थानुसारेण किञ्चित् विव्रीयते ।

मान्त्रवर्णिकमेव च गीयते ।

'[2]ब्रह्मविदाप्नोति परम्' इति यस्य ज्ञानात् मुक्तिरुक्ता, यत् '[3]सत्यं ज्ञानम्' इति मन्त्रोक्तं ब्रह्म, तदत्रैव पुच्छवाक्ये गीयते, ब्रह्मपदसंयोगात् । नानन्दमयवाक्य इत्यर्थः ।

नेतरोऽनुपपत्तेः

इतरः आनन्दमयः जीवः अत्र 'ब्रह्म पुच्छं' इत्यत्र न प्रतिपाद्यः । सर्वस्रष्टृत्वाद्यनुपपत्तेः इति सूत्रार्थः ।

भेदव्यापदेशाच्च

अयं आनन्दमयः ब्रह्मरसं लब्ध्वा आनन्दी भवतीति भेदोक्तेश्च तस्याप्रतिपाद्यतेत्यर्थः । आनन्दमयो ब्रह्म तैत्तिरीयकपञ्चमस्थानस्थत्वात् भृगुवल्लीस्थानन्दवत् इति अनुमाने कृते, तत्परिहाराय सूत्रमाह–

१.तै.उ.२.६ २.तै.उ.५.४ ३. तै.उ.२.१

कामाच्च नानुमानापेक्षा

काम्यते इति कामः आनन्दः तस्य भृगुवल्यां पञ्चमस्य ब्रह्मत्वदृष्टेः आनन्दमयस्यापि ब्रह्मत्वानुमानापेक्षा न कार्या, विकारार्थकमयड्विरोधादित्यर्थः । भेदव्यपदेशाच्चेत् सगुणं ब्रह्मात्र वेद्यं स्यात् इति शङ्कासमाधानमाह–

अस्मिन्नस्य च तद्योगं शास्ति ।

गुहानिहितत्वेन प्रतीचि 'स एकः' इत्युपसंहृते पुच्छवाक्योक्तेः ब्रह्मण्यहमेव परं ब्रह्मेति प्रबोधवत आनन्दमयस्य 'यदा हि' इति शास्त्रं ब्रह्मभावं शास्ति । अतो निर्गुणब्रह्मैक्यज्ञानार्थं जीवभेदानुवादः 'भेदव्यपदेशाच्च' इत्यत्र सूत्रकारैः क्रियते ।

अद्वैतभाष्यकाराणां सिद्धान्तसङ्कोचे कारणाभिधानम्

८/६/२०१९ एकः प्रश्नः । जिज्ञासया पृच्छामि । आनन्दमयाधिकरणे भाष्यकाराः पूर्वपक्षमेव दीर्घतया विवरणं अकरोत् । सिद्धान्तभागस्तु अल्पीयान् वर्तते । कुतः । भाष्ये पूर्णतया एतदधिकरणसूत्राणि न व्याख्यातानि । कुतः ।

कतिपयवर्षेभ्य प्राक् ज्येष्ठाः श्री. मणिद्राविडशास्त्रिणः एवमुक्तवन्तः । अस्यैवाधिकरणस्य वाक्यार्थमण्डनसमये - मूलतः भाष्यकाराणाम् अत्राधिकरणे पूर्वपक्षतया स्वीकृतवृत्तिकारमतेन सह नास्ति विरोधः इति स्वीयाभिप्राय-कथनसमये भाष्ये आनन्दमयशब्दघटितवाक्यानि विहाय पुच्छशब्दवाक्यं

स्वीकृत्य अभ्यासादिकं उपपादितम् परमसिद्धान्ते । अत एव मम मनीषा एवमस्ति - वृत्तिकारमतेनापि अद्वैतसिद्धान्तविरोधः न दृश्यते । तत्प्रतिपादन-नयविषये स्वरसमपश्यन् भाष्यकाराः सूत्राणां अन्यथाव्याख्यानं सूचितवन्तः इति । मदुक्तविषये शास्त्रकोविदाः स्वीयाभिप्रायं वदेयुः इति प्रार्थये ।

परन्तु अत्र प्रश्नः । वृत्तिकारमते आनन्दमयः ब्रह्म । सिद्धान्ते तु आनन्दमयः ब्रह्मभिन्नः खलु । अवयवावयविनोः अभेदः न सम्भवति इत्यादिबाधकसद्भावात् । कथं न विरोधः । दयया उत्तरयतु ।

वृत्तिकारमते आनन्दमयः ब्रह्म । सिद्धान्ते तु आनन्दमय ब्रह्मभिन्नः इति यदुक्तं भवता तत्सत्यम् । वृत्तिकारमते आनन्दमयशब्दस्य ब्रह्मपरतया स्वीकृत्य यत् अन्ते सिद्धान्तितम् । एतदुक्तं भवति - यदैतस्मिन्नानन्दमये अल्पमप्यन्तरमतादात्म्यरूपं पश्यति, तदा संसारभयान्न निवर्तते । यदा त्वेतस्मिन्नानन्दमये निरन्तरं तादात्म्येन प्रतितिष्ठति, तदा संसारभयान्निवर्तत इति । तच्च परमात्मपरिग्रहे घटते, न प्रधानपरिग्रहे जीवपरिग्रहे वा । तस्मादानन्दमयः परमात्मेति स्थितम् ।। १९ ।। – इत्यत्र 'ब्रह्मणा सह अभेदज्ञानादेव संसारभयनिवृत्तिरूपमोक्षः' यदुक्तः तदंशे भाष्यकारविरोधो नास्ति सर्वत्राप्यधिकरणे आनन्दमयशब्दं यथाश्रुतं स्वीकृत्य वृत्तिकारमतं विरचितम् । भाष्यकारस्वमते तु प्रथमसूत्रस्थानन्दमयशब्दोपलक्षितपुच्छवाक्याधारेण अधिकरणरचनं सूचितम् । तावदेव भेदः अनयोर्मतयोः इति ममावगमः

अवयवघटितानन्दमयं कोशत्वेनैव, न तु ब्रह्मत्वेन, भाष्यकाराः तैत्तिरीयेऽपि व्याकुर्वन्ति ।

वृत्तिकारः उपवर्षोऽपि अद्वैती एव । तन्मते प्रकरणमिदं निर्गुणपरमेव इत्यतो मूलतो विरोध नास्ति इत्याशयः ।

अद्वैतमतानुसारेण आनन्दमयाधिकरणं समाप्तम्।

*****

विशिष्टाद्वैतमतरीत्या आनन्दमयाधिकरणस्यविचारः

अथातो ब्रह्मविज्ञासा - कर्म विचारानन्तरम् अतः - कर्मविचाराद्धेतोः ब्रह्मविचारः कर्तव्य इति न्यायेन प्रतिपादितम्। पूर्वधिकरणे ब्रह्मविचारस्य कर्तव्यत्वमुक्तम्। तत् ब्रह्म किमिति शिष्याकांक्षायां जन्माद्यधिकरणमारभ्यते। जन्माद्यस्य यतः। विविधविचित्र जगत् स्रुष्ट्यादिकर्तृत्वं न्यायेन प्रतिपादितम्। तत् स्रुष्ट्यादिकर्तृत्वं जीवस्य भवतु इति चेत् शास्त्रयोनित्वात्। शास्त्रं यस्य योनिः कारणं प्रमाणं तत् ब्रह्म शास्त्रयोनि। इति प्रमाणेन प्रतिपादितम्। पूर्वसूत्रोदितं ब्रह्मणः शास्त्रयोनित्वं वेदितुर्निरतिशयानन्दस्वरूपत्वेन परमपुरुषार्थरूपे परे ब्रह्मर्णि वेदकतया शास्त्रस्य अन्वयात् ब्रह्मणः शास्त्रप्रमाणकत्वं सिद्धमिति। ईक्षतेर्नाशब्दम्। ईक्षतिः - ईक्षतिधात्वर्थः ईक्षणम्। शब्दः प्रमाणं यस्य न भवति, तत् अशब्दम्। सदेव सोम्येदमिति जगत्कारणतयाऽन्वयिनः ईक्षणव्यापारान्नाचेतनमशब्दम्, अपि तु सर्वज्ञ ब्रह्मैव जगत्कारणमिति। आनन्दमयोऽभ्यासात्। आनन्दमयशब्दनिर्दिष्टः आकाशादि जगत्कारणभूतः प्रत्यगात्मनोऽर्थान्तरभूतः परमात्मा। कुतः। आनन्दस्य निरतिशयत्वप्रतिति बलात्। स एको मानुष आनन्दः, ते ये शतम् इत्यभ्यसात्। तस्य प्रत्यगात्मन्यसंभावितस्य तदतिरिक्ते परमात्मन्येव संभवात्।

अधिकरणसङ्गतिः - अचेतनसामान्यस्य ईक्षणरूपसङ्कल्पा सम्भवात् जगत्कारणत्वं न सम्भवतीति परमात्मनः जगत्कारणत्वं व्यवस्थितमीक्षत्यधिकरणे। अस्मिन्नधिकरणे तु प्रत्यगात्मनः शुद्धस्य अशुद्धस्य च ईक्षणसम्भवात् तस्यैव जगत्कारणत्वं, स एव च ब्रह्म आनन्दमयश्च इति आक्षेपसङ्गतिः।

अथवा यथा अचेतनसामान्यस्य जगत्कारणत्वं अयोग्यत्वान्न सम्भवति एवं जीवस्यापि चेतनसामान्यस्य अयोक्यत्वात् जगत्कारणत्वं न सम्भवतीति प्रत्युदाहरणसङ्गतिः।

एतवत्पर्यन्तं ईक्ष्त्यधिकरणे जिज्ञासितस्य परमानत्मनः अचिद्व्यावृत्तिः उक्तं। अस्मिन्नधिकरणे चिद्व्यावृत्तिः उच्यते। चित् शब्देन चेतनाः विवक्षिताः चेतनाः द्विविधा शुद्धाः अशुद्धाश्चः शुद्धाः तावत् मुक्त्यात्मानः अशुद्धाः बद्धाः उभयोऽपि कर्मवश्यत्वं अस्ति तत्र शुद्धाः कर्मण बद्धाः प्रकृति वश्यात् वनविधदुखसागरेमग्नः अशुद्धाः कर्मश्वया एव तथाऽपि इदानीं तेषां प्रकृति सम्बन्धः नास्ति ते मुख्यात्माः उभयेऽपि प्रत्यगात्म इति शब्देन उच्यते। तत्र शुद्धाऽशुद्ध जीवच्च परमात्म भिन्नः एव इत्यस्मिन्नधिकरणे उच्यते। तत्र एवं भगवतः स्वरूपं उच्यते। जगति ये थे हेयाः निखिलाः तेषां विरोधित्व स्वभावः अस्ति अपि च निरतिशय आनन्दस्वभावः अस्ति इति प्रतिपादित अस्मिन्नेव अधिकरणे ।

साङ्ख्यमतरीत्यपूर्वपक्षः

तैत्तिरीये(श्रूयते) '[१]स वा एष पुरूषोऽन्नरसमयः' इति प्रकृत्य 'तस्माद्वा

१.तै.२-१-१

एतस्माद्विज्ञानमयात्'। '[1]अन्योन्तर आत्मा आनन्दमय' इति। जगत्कारणे विषये श्रूयते। तत्र विद्यामानस्य आनन्दशब्दस्य उक्तक इति सन्देहः। कि बद्धः जीवः वा मुक्तः जीवः अथवा परमात्मा इति सन्देहः। तत्र उपनिशदि शरीरत्व - आनन्दाभ्यास श्रावणभ्यां संशयस्य बीजम् श्रुतौ उक्तः आनन्दमयः जीवेति पूर्वपक्षः कुतः इति चेत् '[2]तस्यैष एव शरीर आत्मा' इत्यत्र आनन्दमयस्य शारीरत्व श्रावणात् शारीरो नामशारीरसम्बन्धो जीवात्मा इति।

ननु जगत्कारणतया प्रतिपादितस्य बह्मणः जिज्ञासितानां सुलभतय तस्य प्रतिपत्यर्थ सः अन्नमयः प्रणमयः इत्युक्त्वा सैव आनन्दमयः इति श्रुतिः उपदिशाति। जगत्कारणश्च तदैक्षत् इत्यादि श्रुत्युपदिष्ट ईक्षणकतृत्वात् सः सर्वज्ञाः सर्वेश्वरः इति सिद्धं भवति। तर्हि कथं आनन्दमय शब्दवाच्यः जीवः इति वक्तुं शकयते इति चेतनत्वात् जीवस्य जगत्कारणत्वं भवति। समादधति - सत्य सः ब्रह्म जीवान्नातिरिच्यते। एतद्विषये श्रुतिवाक्यानि दधति [3]अनेनजीवेनात्मानऽनुप्रविश्य [4]तत्वमसि श्वेतकेतो इत्यत्र जगत्कारणतया निदिष्ट पदार्थस्य जीवेन सः समानाधिकरणेन निर्दिश्यो भवति। सामानाधिकरण्यं एकत्व प्रतिपादनपरम् इति नियममाश्रित्य जीवब्रह्मणो अभेदः वक्तुशक्यते। तत्र उदाहारणं यथा सोऽयं देवदत्तः सः अयं शब्दयोः सामानाधिकरण्ये विद्यते तेन पूर्वकाले मया दृष्टः देवदत्तः एव अद्य

---

१. तै.उ.२-५-२

२. तै.उ.२-५-१

३. छा.उ. ६-३-२

४. छा.उ. ६-८-७

मय दृदृष्यते इति द्वयोः मद्ये अभेदः यथा भवति तथा जीवब्रह्मणेः मध्येऽपि इति। अपि च जीवस्य चेतनत्वात् ईक्षापूर्विक सृष्टिरपि उपपद्यते एव।

संशयः ननु '१ब्रह्मविदाप्नोति परं ' इत्यत्र ब्रह्म प्राप्यं श्रूयते तस्य लक्षणं उच्यते सत्यज्ञानमन्तं इति। तत्र सत्यत्वं अनतन्वं च ब्रह्मणी अन्तर्भूतम्। तथा तत्र श्रृतौ प्राप्यत्वं श्रूयतेः तत् नित्यप्राप्यत्वात् जीवस्य नोपपद्यते। अतः परमात्मैव आनन्दमय शब्दवाच्यः इति उत्तरं तस्यैष एव शारिर आत्मा इत्यत्र शारीरत्वं तथा सामानाधि करण्य बलेन यद्यपि एक ब्रह्मः प्रतिपन्नः। अपरस्य जीवस्यापि अचिद्वियुक्त स्वरूपप्राप्यतापरत्वं कल्प्यते अतः नैषदोषः। तथा च सत्यत्वमानत्वन्वथोरपि एकरूपज्ञानस्य परिच्छिन्नस्य जीवरूप नोपपद्यते।

तथा च नकेवलं शरीत्व, समानाधिकरण्य बलात् जीवस्य अचिद्वियुक्तस्वरूप प्राप्यत्वं न वदति। कण्ठतः श्रृत्यऽपि वदति। तादृश रूप प्रप्तिरेव मोक्षः इति। अत्र श्रृतिः '[२]न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहरतिरस्ति'। अशरीरं वावसन्तं न प्रियाप्रिये सपृशतः इति।

अस्य श्रृत्यर्थः यस्य जीवस्य शरीर सम्बन्धः विद्यते सः सुखदुखात् वियोगः न भवति। यस्य जीवस्य शरीर सम्बन्धः न विद्यते तस्य तस्य सुखदुख वियोगः नास्तीति। अतः जीवस्य अविद्यवियुक्त प्राप्यत्वात् आनन्दमयः जीव एव।

---

१. तै.उ.२-१-१

२. छा.उ.८-१२-१

प्रश्नः - अत्र श्रुतौ अचिद्विद्युक्तजीवस्वरूपं उक्तं भवति। ‘स वा एष पुरुषोऽन्न रसमयः’ इत्यत्र शरीर सम्बन्धश्रवणात् यत्र शरीरत्वं तत्र परिच्छिन्नत्वं इति व्यप्त्या जीवः न आनन्दमयः इति दृश्यते।

उत्तरं- शाखचन्द्रन्यायेन अर्थात् अकाशे बहुदूरं विद्यमानं चन्द्रस्य दर्शनं यः कोऽपि पुरुषस्य दर्शनसौलभ्यर्थं पुरोवर्थि वृक्षस्य शाखयां शाखस्य उरि विद्यामानं चन्द्रस्य दर्शनं तस्य चन्द्रज्ञानार्थं यथाकरोति तथा आत्मनः अन्नमयादिन प्रति यः कश्चित् सम्बन्धः नास्त्तेव। तथापि अन्नमयः प्राणमयः इत्युत्त्वा सैव आत्म आनन्दमयः इति उक्तं भवति। ‘ १अन्नमयः पुरुषः’ इत्यत्र अन्नमयस्य शरीरं प्रथमं निर्दिश्य तस्य अन्तर्भूतस्य अन्नमयस्य धारकत्वेनः प्राणमयः मनोमयः विज्ञानमयः इति क्रमेण निर्दिश्य सर्वान्तर भूतं जीवात्मानम् ‘२अन्योऽन्तर आत्मऽऽन्दमयः’ इत्युपदिश्य अन्तरात्मपरंपरां समापयति अतः जीवात्म एव आनन्दमयः इति निश्चीयते। स्थूलारून्धतिन्यायेन आनन्दमयः जीवः इति प्रतिपादितं भवति।

अद्वैतमतरीत्य पूर्वपक्षः

एवं आनन्दमय शब्दस्य जीवात्मपरत्ववादिनं पूर्वपक्षिणं साङ्ख्यं प्रति अद्वैतवदिभिः पृच्छते ननु ब्रह्मपुच्छं प्रतिष्ठा इति श्रुतिवाक्यानुसारेण ब्रह्म आनन्द मयस्य आधरः इत्युक्तानुसारेण ब्रह्म आनन्दमयोः भेदः प्रतियते।

---

१. तै.उ. २-१-१

२. तै.उ. २-१-१

समाधानं- नैवम् ब्रह्मैव स्वस्वरूप भाव विशेषेण पुरुषविधत्वरूपितं शिरः पक्षरूपेण व्यपदिश्यते।

अस्याभिप्रायः 'तस्य पुरुषविधताम् अन्वयं पुरुषविधः' इति श्रुतिवाक्ये तस्य विज्ञानमयस्य पुरुषविधताम् पुरुषविधत्वं शिरः पाण्यादिकं अनुसृत्य अन्वयं विज्ञानमयस्य अनन्तरः विद्यमानः आनन्द मयस्यऽपि पुरुषविधः विज्ञानमय अनुकारि पुरुषविधत्वं विद्यते निरूपितं। ब्रह्मैव स्वस्वरूप विशेषेण जीवः एव आनन्दमयः इति उक्तं भवति।

आनन्दमयजीवानतिरिक्तत्वं दृष्टन्त्वेन विवरिष्यते। यथा अन्नमयः देहः अवयवी तेन अनतिरिक्तेन शिर पाण्यादि स्व अवयवयो 'तस्येदमेवशिरः' इत्यादिन दृष्टान्तीकृतं तथा आनन्दमय शब्दवाच्यं जीवातदभिन्नं ब्रह्मपि स्वस्मादनतिरिक्तैः शिरः पाण्यादिभिः निदर्शितम् भवति। तत्र अवश्यत्वेन निरूपितानां प्रियमोद प्रमोद आनन्दानाम् आश्रयतया अखण्डरूपमानन्दमयं ब्रह्मपुच्छं प्रतिष्ठा इत्युक्तम् भवति।

प्रश्नः - ननु 'आनन्द आत्म' इत्यत्र आनन्दः अवयवि इति निरूपितः न तु भवदुक्तानुसारेण अवयवः। तर्हि कथंमुच्यते अवयवत्वेन रूपितानां प्रियमोदानन्दानाम् इति।

उत्तरः - आत्मशब्दस्य स्ववाचित्वाभवात्। यतो हि कायस्य मध्यभावाः आत्मशब्दवाच्यः दशहस्त्या, अङ्गुलयो दशपाद्या द्वावूरु द्वौबाहू पञ्चविंश आत्मा इत्यादिवाक्ये तथा प्रयोग दर्शनात्। ततः मध्यभागत्वेन निरूपितः आनन्दः कथं अवयवि भवितुर्महति?

यदि आनन्दमयः जीवादन्यः ब्रह्म भविष्ति चेत् 'तस्माद्वा एतस्मा-दानन्दमयादन्योन्तर आत्मा ब्रह्म' इति आनन्दमयस्याऽपि निर्देष्टव्यं। तथा न निर्दिश्यते। अन्तरात्मतय भेदो ननु तस्माद्व एतस्मादामानः इत्यत्र अन्यः अन्तरः आत्मा ब्रह्म इत्येव अभवत् इति नास्तिनियमः। यतो हि पृथगात्मान प्रेरितारम् पतिं विश्वस्य इत्यादौ यथा व्यावर्तकाकारेणऽपि अन्यत्वं (भेदः) प्रतिपादन भवति। अतः अन्तरात्मय भेदः न निर्दिर्षितः अतः आनन्दमयः जीवः इति वक्तुं न शक्यते। इति चेन्न।

विशिष्टाद्वैते एतदुक्तं भवति इत्यस्य अथमर्थः

संक्षेपस्य विस्तारः विस्तरस्य संक्षेपः

प्रपञ्चितस्य संक्षेपः संक्षिप्तस्य प्रपञ्चनं

एतदुक्तं भवति न समाधिः व्याकुलस्य च॥ तत्वटीका (वेदान्तदेशिक)

एतदुक्तं भवति '[१]ब्रह्मविदाप्नोतिपरम्' इत्यत्र प्रक्रन्तं ब्रह्म 'सत्यंज्ञानं' अनन्तं इति तस्य लक्षणतः सकल इतरव्यावृत्ततया उक्त्वा तमेव तस्माद्वाएतस्मात् आत्मनः इत्यात्मशब्देन सर्वान्तरत्वं निर्दिश्य तं अन्नमयादिषु तत्तदन्तर तया आत्मत्वेन उपपाद्या प्राणमयादीनतिक्रम्य अन्योन्तर आत्मं आनन्दमयः इति आत्मशब्देन निर्दिशमनन्दमये अन्तरत्वं समापयति। आत्मशब्देन प्राक्रान्तं ब्रह्म आनन्दमयः इति निश्चीयते।

१.तै.उ. २-१-१

२.तै.उ २-५-१

'ब्रह्मपुच्छं प्रतिष्ठा' इत्युत्वा 'असन्नेव स भवति।' 'असद्ब्रह्मेति वेद चेत्'। '१अस्ति ब्रह्मेति चेद्वेदा सन्तमेनं ततो विदु:'। अत्र ब्रह्मज्ञानेन आत्म सद्भावः ब्रह्माज्ञानेन आत्म असद्भावः दर्शितः। आनन्दमयज्ञानाज्ञानाभ्याम् आत्म-सद्भावसद्भावाभ्यां न दर्शितः।

प्रश्नः - यदि आनन्दमये आत्मशब्दव्याख्यान परिसमाप्तिश्चेत् तर्हि आत्मशब्देन निर्देशः कर्तव्यः। तया न कृतः अपि तु ब्रह्मशब्देन निर्देशः कृतः। अतः आनन्दमयः न प्रधानः पुच्छ ब्रह्मैव प्रधान ज्ञत चेन्न

उत्तरः - प्रियमोदादिरूपेण स्वावयवैः अभिन्नत्वेन सर्वलोक प्रसिद्धस्य आनन्दमय सद्भावासद्भाव शङ्का एव न युक्ताः अतः न आनन्दमयमधिकृत्य अयं श्लेकः उदाहृतः तस्मात् आनन्दमयात् अन्यौः ब्रह्मः नास्ति जीवः एव आनन्दमयः सः एव ब्रह्म इति।

प्रश्नः - आनन्दमयः एव प्रधानः इत्यत्र युक्ति वदति। '२इदं पुच्छप्रतिष्ठा' '२पृथिवीपुच्छं प्रतिष्ठा' '३अयर्वाङ्गिरसः पुच्छं प्रतिष्ठा' 'महः पुच्छं प्रतिष्ठा' इति पूर्व अनुवाके अपि च '४अन्नाद्वै प्रजाः प्रजायन्ते' इत्यादि श्रुतयः न पुच्छमात्र परः अपि तु अन्नमयादि पुरुषप्रतिपादनपराः। एवं आनन्दमय श्लोके उक्त पुच्छ शब्दः न केवलं पुच्छमात्रपरः अपि तु आनन्दमयः परः। तथा 'असन्नेव' इति उत्तरानुवाकश्रुतयः

१.तै.उ.२-६-१ ३.तै.उ.२-४-१

२.तै.उ.२-३-१ ४.तै.उ.२-२-१

अपि आनन्दयपर एव न केवलं तद्व्यतिरिक्तस्य पुच्छ परः इति। आनन्दमयः ब्रह्मयोः अभेदः।

प्रियमोदादिरूपेण आनन्दमयः ज्ञातः एव इति चेत् आनन्दमयः ब्रह्मएव तथाऽपि प्रियमोदादि रूपेण रूपितस्य अपरिच्छिन्नआनन्दस्यज्ञानं नास्त्येव। अतः सद्भासद्भाव शङ्कायुक्ता। एवं शिरः प्रभृति अवयवित्वं ब्रह्मणः नस्ति यतो हि ब्रह्म निरवयकं अतः आनन्दमयः न ब्रह्म इति चेत् । ब्रह्मणः पुच्छत्वं प्रतिष्ठात्व रूप अवयवसद्भावात् भवद्रीत्यऽपि पुच्छत्वेन उक्तः ब्रह्मः ब्रह्म न भवेत्। मृषावादि अविद्यपरिकल्पितस्य आनन्दमयस्य आश्रयत्वेन ब्रह्मणः पुच्छं प्रतिष्ठारूपेण मात्रं कल्पितं अत्र उच्यते। हन्त तर्हि असुखाद्ध्यावृत्तस्य आनन्दमयरूप ब्रह्मणः प्रियशिरस्त्वादिकं कल्पत्यते कोदोषः अतः आनन्दमयः जीवः सः एव ब्रह्मः।

तथा च '१सत्यज्ञानमनन्तं ब्रह्म' इत्यत्र सत्यं नाम विकाररहितं ज्ञानं नाम जडभिन्नं अनन्तं नाम अपरिच्छिन्नादिरूपवस्त्वन्तरव्यावृत्तस्य असुखाद्यवृत्तस्य आनन्दमयः अत्र उपादिश्यते। उक्तानुपपत्तीनां परिहृतत्वात् अखण्डैकरस आनन्दरूपः ब्रह्मः आनन्दमयः इत्युच्यते। यथा प्राणमयः इत्यत्र मयटः स्वार्थिकः अत्रापि स्वार्थेमयतः तस्मात अविद्यपरिकल्पित विविधविचित्र देवादि भिन्नस्य जीवात्मनः स्वाभाविकरूपमखण्डैरसं सुखैकतानमानन्दमयः इत्युच्यते। सः आनन्दमयः जीवः एव।

१.तै.उ. २-१-१

आनन्दमयस्यब्रह्मत्वसाधनम्

एवं प्राप्तस्य पूर्वपक्षस्य उत्तरं समादधति - **आनन्दमयोऽभ्यासात्**

आनन्दमयः परमात्मा अभ्यासात् अभ्यासोनाम वारं वारं उपदेशः

प्रश्नः - आनन्दमयः परमात्म स जीवात् भिन्नः इति सूत्रकारस्य अभिप्रायः। तं वक्तुं आनन्दमयोऽभ्यासात् इति सूत्रं अकरोत् । अस्मिन् अधिकरणे भेदव्यपदेशाच्चां इत्यत्र जीवात् भिन्नत्वं निरपेक्षहेतुत्वात् स्ववाक्यस्यत्वाच्य सिद्यति। स एव प्रथमं वक्तव्यः। न तु वाक्यान्तरस्थऽनुग्रहक युक्तयपेक्षः अभ्यासः इति चेत्।

उत्तरः - नैवम् स्ववाक्यस्यभेदव्यपदेशादपि आनन्दमय इत्यत्र स्वपदैकदेश मडट वाच्यस्य प्राचुर्यस्योपपादनसापेक्षस्यासन्नतरत्वात् तद्विवरणरूपस्य निरतिशय दशाशिरस्कत्वेन अभ्यसस्यैव प्रथमं हेतुतय वक्तुं युक्तत्वात् कस्य अभ्यासः इति चेत् दर्शयति '१सैषानन्दस्यमीमांसा भवति' इत्यारम्य।

'२यतो वाचो निवर्तन्ते' इत्येवमन्तेन वाक्येन शतगुणित उत्तरक्रमेण निरतिशयदशाशिरस्कः अभ्यस्यमानआनन्दः निखिलहेयप्रत्यनीकं कल्याणैकतानं सकलेतरविलक्षणं परमात्मान मेव आनन्दमय शब्देन उच्यते। न अनन्तदुखमिश्रं , परिमित सुखलव भागिनि जीवात्मानं उच्यते।

न केवलं निरतिशयानन्दत्वरूपवस्तुसामर्थ्या अनुग्रहीत वैलक्षण्यात अवगम्र अपि च 'तस्माद्वा एतस्माद्विज्ञानमयात्'। 'अन्योन्तर आत्म आनन्दमयः' इति कण्ठोक्तं मपि अस्ति।

१.तै.उ.२-८-१ २.तै.उ.२-९-१

विज्ञानमयस्य जीवत्वसाधकम्

विज्ञानमयः जीव न वुद्धिमात्रम् अत्रस्य मयट् प्रत्ययेन भेद प्रतीयते। अत्र स्वार्थे मयट् - तथा च विज्ञान मयोनम प्रचुरविज्ञानवान् बद्धः मुक्तः जीवो वा स्यात्। विशिष्टाद्वैते जीवः न केवलं विज्ञानस्वरूपः अपि च विज्ञानाश्रयः अतः विज्ञानमयः जीवः इति भवति। कथं विज्ञानमयः जीवः। '१विज्ञानंयज्ञतनुते' इत्यत्र यज्ञकतृत्व श्रवणात् यज्ञ कर्तृत्वं जीवेः सम्बवति।

प्रश्नः - विज्ञानंयज्ञंतनुते इत्यत्र केवल विज्ञानशब्दः विद्यते न विज्ञानमयशब्दः इति चेन्न - यथा गोत्वरूप धर्मः गोरूप धर्मिस्वरूपमपि प्रतिपादयान्ति तथा अत्रापि विज्ञान शब्दः विज्ञानमयं प्रतिपादयन्तिः। अत एव विज्ञानंयज्ञंतनुते इत्यत्र यज्ञादिकर्तृत्वं विज्ञानस्य श्रूयते। विज्ञानोनाम बुद्धिः। केवलं बुद्धिमात्रस्य न यज्ञ कर्तृत्वं सम्भवति। अचेतनेषु न चेतनव्यापारः सम्भवति। अतः चेतन अचेतन स्वासाधरणधर्मैः निलयन - अनिलयन, विज्ञान - आविज्ञान इत्यादि धर्मभिः विशेषैर्विभज्य श्रुतिः निर्दिशति। अतः विज्ञानशब्देन तद्गुणं चेतनं ग्रह्यं।

तथा अन्तर्यामि ब्रह्मणे '२योविज्ञाने तिष्ठन्' इत्यस्य काण्वपाठगतस्य माध्यद्रिनाः '३य आत्मनि तिष्ठन् ' इति काण्वपाठगतं विज्ञानशब्दः जीवात्मेति निर्दिशति। यथा '४अन्नद्वै प्राजाः प्रजायन्ते ' इत्यत्र शृतौ केवलात्रोपादानेऽपि '५स वा एष पुरुषोऽन्नरसमयः' इति श्रुतौ न अन्नमात्रं प्रतिपादितं अपि तु तन्मयः

१.तै. उ २-५-१
२.बृ.उ.३-७-२२
३.बृ.उ. ३-७-२२
४.तै.उ.२-२-१
५.तै.उ.२-१-१

तद्विकरस्य प्रतिपादितं। तथा '१विज्ञानं यज्ञं तनुते' इति शुतौ केवलं ज्ञानमत्रमुपादिश्यते अन्योन्तर आत्मा विज्ञानमयः इत्यत्र ज्ञानस्य आश्रयः जीवः उपदिश्यते अतः विज्ञानमयः जीवः इति सिद्धो भवति। एतत्सर्व हृदि निधाय सूत्रकारः स्वयमेव भदव्यपदेशात् इति सूत्रं अनन्तरमेव उक्तं युक्तमेव

पूर्वपक्षे जगत्कारणतया निर्दिष्टस्य ब्रह्मणः '२अनेन जीवेनात्मनाऽनुप्रविश्य' '३तत्वमसि' इत्यत्र जगत्करणतय उक्त ब्रह्मणः साकं जीवस्य सामानाधिकरण्य निर्देशात् जगत्कारणमपि जीवस्वरूपान्नातिरिच्यते इति कृत्वा तादृश जीवसैव स्वरूपं '४ब्रह्मविदप्नोतिपरम्' इत्यत्र प्रक्रान्तं जीवं असुखव्यावृतत्वेन इत्युपदिशते इति यत्पूवपक्षे उपपादितं तदयुक्तम् यद्यपि जीवः चेतनः तथापि '५तदैक्षत् बहुस्यां प्रजायेयेति तत्तैजो असृजत' इत्यत्र उपपादित सत्यसङ्कल्प अनन्त विचित्र सृष्टि कर्तृत्व जीवे अनुपपन्नं। यतोहि सामान्याधि करणत्व प्रतिपादकं यदंश श्रुतौ विद्यते तस्मात् विरूद्धधर्मप्रतिपादिका श्रुतिः प्रबलाः तेन जीवब्रह्मणोः भेदः सिद्यति।

पूर्वपक्षे जीवब्रह्मणोः अभेदसिद्यर्थं ब्रह्मणः सहजीवस्य सामानाधिकराण्यं आनन्दमयः जीवः शारीरत्वात् इति शारीरत्व। सामानाधिकरण्यरूप हेतुद्वयं उक्तं।

१.तै.उ.२-५-१

२.छा.उ.६-३-२

३.छा.उ.७-८-७

४.तै.उ.२-१-१

५.छा.उ.६-२-३

तथा हि '१अनेनजिववेन अत्मानअनुप्रविश्य' '२तत्वमसि' जीवे ब्रह्मप्रवेशत्वं उक्तं तादृशब्रह्मणः साकं सामानाधिकरणं च प्रतिपादितं । एवं च अनेन सामनाधिकरणयुत्त्य जीवः ब्रह्मात् नातिरिच्यते प्रतिपादयिष्यति । तादृशजीवैक्य स्वरूपं '३ब्रह्मविदाप्नोतिपरं ' इत्यत्र श्रुतंअसुखा व्यावृतं जीवेति सिद्यति । अतः सएव आनन्दमयः इति सिद्यति ।

तदयुक्तम। अनेन जिवेन, तत्वमसि इत्यत्र प्रकरणगत तत् त्वं इति पदद्वयेन सामानाधिकरण्यं यदुक्तं तत्र तत् त्वं पदयोः विरुद्दधर्म प्रतिपत्या तयोः भेदसिद्यति । अतः जीव ब्रह्मणोः अभेदः सामानाधिकरण्यात् इति हेतुः असिद्दोभवति । यत्र सामानाधिकरण्यं तत्र भेदः एव सिद्यति । अतः पूर्वपक्षि उक्तहेतुन साद्यसादानं कर्तुं न शक्यते । कुतः । तत् त्वं पदयोः प्रकरणगतवाक्य विरुद्दात् परभिमत अभेद न सिद्यति किन्तु भेद एव सिद्यति । तथा च जीवः यद्यपि चेतनः तथापि तदैक्षत् '४बहुस्यांप्रजायेयेति तत्तेजोसृजत्' इत्यत्र प्रतिपादित स्वसंकल्पपूर्वाक अनन्तविचित्रजीवसृष्टिःजीवे न सम्भवति ।

प्रश्नः- विचित्रजगत्सृष्टित्वं बद्दस्य जीवस्य न सम्भवति परन्तु मुक्तस्य शुद्दजीवस्य भवतु ?

१.छां.उ ६-३-२

२.छां.उ ७-८-७

३.तै.उ २-१-१

४.छां.उ ६-२-३

उत्तरम्- मुक्तस्य जीवस्यापि सृष्ट्यादि जगत् व्यापारः न घटते । एत्तु '१जगद्व्यापारवर्जम् ' '२भोगमात्रसाम्यलिंङ्गात् 'इत्यत्र उपपादयिष्यते । अतः शुद्दस्यापि तत् न सम्भवति ।

प्रश्नः- कारणभूतस्य ब्रह्मणः जीवस्वरूपत्वं नअङ्गिकृतं चेत् अनेन जीवेन , तत्वमसि इत्यत्रउपदिष्टसमानविभक्तिक सामानाधिकरण्येन जिव ब्रह्मणोः अभेदःकथं उपद्यते ।

उत्तरम्- 'तदैक्षत् वहुस्यांपजायेयेत तत्तेजोसृजत्' तान्प्रतिपदिकावगत-विशेषाान्वयः प्रदिर्शितः । श्रुतौ प्रतिपादित जगत्स्रष्टुत्वं, सत्यसंकल्पादि गुणाः तिरोहिताभावात् परमात्मनि अगमत् । जीवे तिरोदयकहेयसम्वन्धस्य विद्यमानात्वात् सामानाधिकरण्यसत्वापि विरुद्दधर्मवत्वात् न तयोः अभेदः यत्र विरुधर्माद्यासः तत्र न अभेद इति व्याप्तिः जगति प्रसिद्दमस्ति ।

प्रश्नः- जगत्व्यपारादिगुणाः यथ ब्रह्मणि सन्ति तथा जीवेपि ओपादिगुणाः भवतु ?

उत्तरम्- ओपादिकजगद्व्यापारादि गुणाः जीवे न सन्ति । कण्ठोक्तानां सद्विद्यायां गतिसामान्यात् इत्यत्र उपादितं ।

---

१. ब्र. सू ४-४-१७

२. ब्र.सू.४-४-२१

३. छां.उ. ६-२-३

प्रश्नः- ननु ब्रह्मातिरिक्तस्य सर्वस्य मिथ्यात्वेन उपपाद्याते चेत् ?

उत्तरम्- अस्य प्रश्नस्य विकल्पं कृत्वा दूषयति । कस्य मिथ्यत्वं वदति किं हेयसम्वदस्य ? अथवा हेयप्रत्यनीककल्याणगुणैकतान स्वभावस्य ?

हेयप्रत्यनीक कल्यगुणस्य अनादिअविद्याश्रयत्वेन प्रतिभासिक मिथ्यत्वं इति चेत् स्वतशुद्दस्य पटस्य उपाधिकृतमलिनवत्,परमर्थिकशुद्दस्य स्पटिकाद्यासादिन अरुणवत् , दृश्यमान स्वभाविक निर्दोषकल्येणगुणैकतानत्वं कदापि मिथ्या न भवति । जीवे विद्यमान हेयस्म्वन्दमपि स्वभाविकमेव अतः उभरोपि मिथ्यात्वं वक्तुं न शक्यते ।

प्रश्नः- ननु जीवे अविद्यनिमित्तं यत् हेयस्मन्दमस्ति तस्य मिथ्यात्वं अङ्गिक्रीयते ?

उत्तरम्- लोके यत् मिथ्या तत् अपुरुषार्थःइति सर्वस्यअनुभसिद्दो वर्तते । मिथ्याभूतस्य हेयस्मवादस्यनिर्वत्यर्थं सर्ववेदान्ताः प्रवृत्तः इत्युक्तं भवति । तत् न युज्यते । मिथ्याभूतस्य प्रतिपादने वेदान्ताः सर्ववेदान्ताः अनारम्भणीयस्यात् । एतदुक्तं भवति हेयस्मन्धस्य मिथ्यात्वं भद्भिः उक्तं तत्र पृच्छामः मिथ्यात्वं नाम किं । १ किं अत्यन्तभावः २ ज्ञानवाद्यत्वं वा न प्रथमः हेयस्मन्धः अत्यन्ताभाव मिथ्यरूपः इति चेत् ताद निरसनीयः किमपि न भवति । तन्निरासाय शास्त्रारम्बः न युज्यते । द्धितीये ज्ञानवाद्यत्वरुप मिथ्यात्वस्य अपुरुषार्थः अस्ति वा न वा । न चेत् पुरुषार्थाभावात् शास्त्रारम्भो न स्यात् ।अस्ति चेत् अपुरुषार्थभूतात् हेयप्रत्यनीकात् भेदः नास्ति इति भवति । अतः व्याघातः ।

प्रश्नः- ननु व्याघातरुप विरोधेपि हेयस्मन्धस्यस्य श्रुतिरुपान्यथोपपत्ति बालात् मिथ्यात्वं प्रतिपादयिष्यामः । तथा हि '१येनाश्रुतं श्रुतं भवति' इत्यत्र एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय ' १सदेवसौम्यइदमग्र असीत्' इत्यादिन निखिलजगदेककारणताम् ' २तदैक्षत् बहुस्यांप्रजायेय' सत्यसंकल्पत्वं ब्रह्मणः प्रतिपादितः ' ३तमेव ब्रह्मणः तत्वमसि' इत्यत्र सामानाधिकरण्येन अन्तदुखाश्रितजीवात् ऐक्यं प्रतिपादितं एतदन्यथानुपपत्य ब्रहह्मेव अविद्याश्रयः इति कल्पयामः ?

उत्तरम्- श्रुत्य यत् मित्थात्वं उपपादितं तत् तर्कपराहतम् प्रामाणविरुधं च । १ प्रमणाविरोधः- अपहतपाप्मा, विशोकोविजिघित्सः,एषहिसर्वेभ्यः पाप्मेभ्यः उदितः, अनश्नन्नन्यः, अनीशयशोचतिमुह्यमानःजुष्टंयदापश्यत्यन्यमीशं, अस्मात् मायिसृजते, तस्मिंश्चान्योमाययासन्निरुद्धः, इत्यादिश्रुतिषु अपहतपाप्मत्वादिकं प्रतिपाद्याते । एतादृशगुण विशिष्टेन ब्रह्मणः साकं जीवस्यैक्यं न घटते । काकदन्तमीमांससदृश्यात् कर्ममीमांसायां कस्याप्यप्रवृत्य मीमांसारुपाङ्गसहकृतस्य वेदस्य अप्रामाण्यात् प्रमितिजनकत्वरुप प्रामाण्यं न स्यात् । २ तर्कपराहतम् - एकस्मिन् ब्रह्मणि हेयप्रत्यनीकत्व, हेयस्बन्धत्वरूप विरुद्दर्मान्वात् तर्कविरोधस्यात् । हेयसम्बन्धः एव पारमार्थिकः कल्याणगुणैकस्वभावः मिथ्या इति चेत् तर्हि शास्त्रस्यप्रयोजनपर्यवसायित्वाभावात् अप्रामाण्यं प्रसज्येत ।

१.छां.उ. ६-२-१

२.छां.उ. ६-२-३

३.छां.उ. ६-८-७

प्रश्न - निर्विशेषचिन्मात्रस्वरूपातिरिक्तं जीवत्वं दुःखत्वादिकं सत्यसङ्कल्पत्वादि सर्वं ब्रह्मणि मित्याभूतमिति कल्पनीयम् इति चेत्।

उत्तरम् - अहोभवतां वाक्यापर्यालोचनकुशलता । अत्र पर्यालोचनं--अर्थनिष्कर्षउपयुक्तपदद्वयघटितवाक्ये एतत् प्रकरणं, प्रकरणान्तरोपनिषत्, तदन्तरप्रमाणान्तरतर्कसामानाधिकरण्यनिरुपणं। एतत् प्रकरणउपक्रमविरोधं दर्शयति तथाहि-- एकविज्ञनेन सर्वविज्ञान प्रतिज्ञनं भवति चेत् तदा सर्वस्यमिथ्यात्वे ज्ञातव्यस्याभावात् तत् न युज्यते । ननु सर्वसत्वेपि कथं स युज्यते चेत् । यथ एकविज्ञानं परमार्थविषयं स्यात् तदा सर्वविज्ञनमपि तदन्तर्गतश्च परमार्थविषयं स्यात् ।परन्तु परमार्थशुक्तिज्ञानेन तदश्रित अपरमार्थरजतज्ञानं न हि भवति । ज्ञानार्थं वस्तुसत्यत्वस्य अवश्यकत्वात् तदत्रनास्ति ।

ननु ब्रह्मैक्यमेव सत्यं मिति ज्ञतेसति तदन्यात् सर्वं मिथ्यात्वेन ज्ञातं स्यात् इत्यभिप्रायेण उक्तं एकविज्ञानेन सर्वविज्ञानं इति । ततश्च निर्विशेषवस्तुमात्रमेवसत्यम् तत्भिन्नं सर्वं असत्यम्इति चेत् ?

उत्तरम्-- '१येनाश्रुतंश्रुतंभवत्यमतंमतमविज्ञातंविज्ञातम्' इति श्रुतेः सर्वमिथ्यात्वेन ज्ञानं भवति अथवा सर्वनिवृत्तित्वेन ज्ञानं भवति इति वक्तुं न शक्यते । यतो हि अश्रुतमपि श्रुतं भवति इति सर्वस्य सत्यत्वं प्रतिपादयति । कारणतयउपलक्षित निर्विशेषवस्तुमात्रमेव सत्यं इति चेत् । तथा सति

१.छां.उ.६-१-३

कारणभूतशुक्तिज्ञानेन मिथ्याभूत रजत निवृत्तिः अस्तु । अपि च मृत्पिण्डज्ञानात् घटादि निवृत्तिरपि अस्तु । '१यथ सौम्य एकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं' इति प्रसिदद्दृष्टान्तोपि न युज्यते । तत्रमृत्पिण्डज्ञनेन तद्विकारस्यज्ञातत प्रदर्शितः । तत्रपि विकारता मिथ्याचेत् प्रतिज्ञातस्य सत्यत्व सम्बानाय प्रदर्शितः यथ सौम्य इति श्रुत्युपन्यासः युक्तं न स्यात् । प्रमाणभूत श्रुत्युपन्यासः युक्तमेव अतः मृद्विकारः मिथ्या न भवति । तथा '२सदेवसौम्येदमग्रमसीत् एकमेवाद्वितीयं' '३तदैक्षत् बहुस्यां प्रजायेयेति तत्तेजोसृजत्' हन्ताहमिमस्तिस्रोदवता् ' ४अनेन जीवेनात्मनानुप्रविश्यनामरूपेव्याकरवाणि सन्मुलाः सोम्येन '५सर्वाः प्रजाः सदायतनाः सत्पतिष्ठाः' ' ६ऐतादात्म्यमिदं सर्वाम्' इत्यदिनास्य जगतः सदात्मकता,सृष्टेःपूर्वकाले अहमेवानन्तास्थिरत्रसरूपेण बहुस्यां इत्यनन्यसाधारण संकल्पविशेषः यथा संकल्पमानविचित्रतत्वानां विलक्षणक्रमविशेषविशिष्ट सृष्टिः समत्तेष्वचेतनेषु वस्तुषु स्वात्मकजीवानुप्रवेशेनैवानन्तानामरूपव्याकरणम् स्वव्यतिरित्कस्यसमस्तस्य स्वमूलत्वम् स्वायतनत्वम् स्वप्रवर्त्यत्वम् स्वेन्नेवजीवनम् स्वप्रतिष्टित्वमित्याद्या-नन्तविशेषाः शास्त्रैकसमधिगम्याः प्रतिपादिताः। तत् सम्बन्धितय

१.छां.उ. ६-१-४

२.छां.उ.६-२-१

३.छां.उ. ६-२-३

४.छैं.उ.६-३-२

५.छां.उ.६-८-३

६.छां.उ.६-८-७

प्रकरणान्तेष्वप्यहतपाप्मात्वादिनिरस्तनिखिलदोषतासर्वज्ञतासर्वेश्वरत्व सत्यकामत्व सत्यसंकल्पत्वसर्वानन्दकरणनरतिशयानन्दयोगादयः सकलेतरप्रमाणाविशषायाः सहस्रशः प्रतिपादिताः । एवं शास्त्रैकसमधिगम्यं प्रमाणान्तरेद्यं अनन्त विशेषणविशिष्टः परमात्मा तत्त्वमसि इत्यत्र तत् शब्देन परामर्शितस्य निर्विशेषवास्तुमात्रोपदेशपरत्वेन व्याख्यानम् अत्यनन्त असङ्गतम् । एवं व्याख्यानम् उन्मत्तप्रलपितमपि स्यात् । तत्वमसि इत्यत्र विद्यामानं त्वं शब्दमपि संसारविशिष्ट जीवात्मानं बोदयति । तस्यजीवस्यापि निर्विशेषस्वरूपरतया व्याख्यास्यति चेत् तस्य शब्दस्य स्वार्थपरित्याग स्यात् । निर्विशेष प्राकशस्वरूपस्य वस्तुनः नशः प्रसङ्गत्व पूर्वमेवमुक्तं । सामानाधिकरण्यबालात् निर्विशेषवस्तु अङ्गीकुर्मः चेत् । तथा सति तत्वमसि इत्यत्र विद्यामान तत् त्वं पदयोः मुख्यार्थं परित्यक्त्वा लक्षणस्विकारस्यात् । मुख्यार्थस्य बाधक सद्भावे लक्षण स्विकारयोग्यस्यात् । मुख्यार्थस्य बाधः नास्ति । अतः न लक्षणस्विकारार्ह । अपिच लक्षण स्विकारः लोके जघन्यः इति प्रसिद्दः ।

सामानाधिकरण्येन जीवब्रह्मणोः अभेदस्यबाधकः

प्रश्नः- समानाधिकरणवृत्तस्य तत् त्वं पदयोः एकवस्तु प्रतिपादने तात्पर्यमसति। अतः तौ दौ विशेषणंशे तत्पर्यासम्बवात् ।अतः विशेषणरहित वस्तुमात्रप्रतिपादानात् न लक्षणस्विकारप्रसङ्गः । तदेव सोदहरणं विवृणोति । यथा नीलोत्पलम् नीलत्व उत्पलत्व रुप पदद्वयस्य न एकवस्तु मात्रप्रतिपादके तत्पर्यंमस्ति । विशेषण द्वयेन एकवस्तुमात्र प्रतिदकेतत्पर्यमस्ति चेत् तदा नीलत्वविशिष्टस्य एकस्य उत्पलत्वविशिष्टस्यान्यस्य वस्तुप्रतिपादानं स्यात् । तथा न सम्भवति । तथा च

विशेषणद्वयेन एकवस्तु प्रतिपादने तत्पर्यमस्तीति वक्तव्यम् । विशेषणद्वयेन एकवस्तुप्रतिपादानं कुतः चेत् नीलपदविशिष्टस्यवस्तु उत्पलपदेन न विशिष्यते । एवं च विशिष्टस्य यद्भवति तत् विशेषस्यापि भवति इतिनियमानुसारेण नीलविशिष्टवस्तु उत्पलः तत्र नीलमस्ति तत् विशिष्टस्य विशेषणः उत्पलः तत्रापि नैल्यं भवति इतिकृत्व नीलत्वगुण उत्पलत्वजात्योः समवायप्रसङ्गस्यात् ।

अतः नीलत्व उत्पलत्वोपलक्षित एकमात्रवस्तु समानाधिकरण्येन प्रतिपादयति । नीलोत्पलं इत्यत्र स्पष्टतात्पर्यमभावात् । उदहरणान्तरं दर्शयति । सोयं देवदत्तः इत्यत्र अतीतकाल, विप्रकृष्टदेशविशिष्टस्य देवदत्तस्य सन्निहितदेश, वर्तमानकालविशिष्ट्य प्रतिपादयति । तदन्यथानुपपत्य उभदेशकालोपलक्षितस्वरूपैक्यं सामानाधिकरण्येन प्रतिपादितमसति । ननु विशिष्टवाचिशव्दः विशिष्टपरित्यागेन विशिष्टैकदेशतय तत् सम्बन्दि विशेषमात्रवृत्तित्वमेव लक्षणमुच्यते । तथा च तत् कथं भवद्भिः मुख्यार्थस्विकारस्यात् । नीलमित्यादि एकपदश्रवणे प्रतूयमानं नीलमिति विशेषणं सामानाधिकरण्यसमये विरोधात् न प्रतीयते । तथापि नीलमति पदम् वाच्यार्थ प्रधानाशस्यप्रतिपादानात् न लक्षण स्विकृता भवति । अयमेव सामानाधिकरणस्य स्वभावः इति न कश्चित् दोषः ।

उत्तरम् - तदिदमसारम् समानाधिकरणपदानां विशिष्टएकार्थमेव प्रतिपादयन्ति इति परोक्षापरोक्षरीत्य उदाहरणद्वयमुखेन प्रतिपादयति । १ सामानाधिकरण्येन प्रवृत्तानामपि नीलादिपदानां नैल्यादिविशिष्टपदार्थेएव व्युपत्तिरस्ति इति लेकप्रसिद्दिरस्ति ।

यथा नीलोत्पलम् आनयेत्युक्तौ नीलगुणविशिष्टोत्पलमेव आनीयते । नतु नीलं प्रत्येकं आनेतुं शक्यते । ननु सामानाधिकरणपदसमुदायः केवलं वस्तुमात्रं बोधयति चेत् तदा वस्तुमात्रत्वाविशेषात् अनीलमपि आनय इति वक्तव्यं स्यात् । सामानविभ्कत्यवगत वस्तुद्धयमद्ये ऐक्यार्थं सामानाधिकरणपदानां विशेषणपरित्याग कर्थव्यः चेत् । विभक्तिसामानेन एक्यं न सिद्यति । प्रातिपदिकगत विशेषान्वयवलात् समानाविभक्त्योः एक्यं न प्रतिपादयति । अतएव उक्तं विभक्त्यर्थादपि प्रतिपदि-कार्थप्रधनमिति । अपि च अदिति पाशान् इत्यत्र प्रतिपदिकस्यैव प्राधान्यंभवति । तत्र विभक्त्यर्थः अनादृतः । एक्य विषयप्रयोगदर्शनात् एक्यविषयमितिचेत् ।

भेदविषयक प्रयोगदर्शनात् भेदविषयकमपि अस्तु । प्रत्यक्षबलात् शब्दप्रतीति-वस्तुमात्रविषयकः न विशेषणपरः इतिचेत् । प्रत्यक्षबालात् शब्दप्रतीतिविशेषपरमेवास्तु ऐक्यंपरम् मास्तु । एवं च प्रत्यक्षबलात् विशेषणान्वयसहितवस्तुप्रतीयते इतिसिद्दं भवति । २ विन्धावट्यां मदमुदित मतङ्गगाणास्तिष्ठति इति परोक्षेविद्यामाने विन्ध्यावटि मदमुदित पदद्धगतविशेषणविशिष्ट मतङ्गगणस्येवार्थः प्रतीयते । एवं च प्रत्यक्षपरोक्ष-विभागरहितं सामानाधिकरणपदानां एकविशेषणविशिष्ट एकपदर्थोदकत्वं दृश्यते इत्यभिप्रायेणउदहरणद्धयं दर्शितं । तस्मात् यएवलौकिकास्त एव वैदिकाः लोकवेकाधिकरणन्यायेण वेदान्तवाक्येष्वपि पदकद्धयगत विशेषणसहितएवार्थः स्वीर्कतव्यः इतिउक्तं भवति । तथा च तत्वमसि इत्यत्र समानाधिकरण्येन निर्देषेशु तत् त्वं पदाभ्मं तत् पदविशेणविशिष्ट ब्रह्म एव प्रतिपादितमस्ति । विशेषविवक्षायां

इतर विशिष्टाकारं वस्तु अन्येन न विशेष्टव्यम् किन्तु सर्वविशेषणैः सरूपमेवविशितव्यम् । तथा हि भिन्नवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यम् इति सामानाधिकरणस्य लक्षणं । अन्वमुखेन व्यावृत्तिमुखेन वा वस्तुनः पदान्तर प्रपत्याकारः अथवा आकारान्तर प्रतिपादनं समानाधिकरणपदसमुदायकर्याम् । यथा देवदत्तः श्यमः, युवा, इत्यत्रानेकविशेषण विशिष्टः एकएव देवदत्तः सामानाधिकरण्येन मुख्यतय प्रतिपादिमस्ति । नतु गौर्वाहिकः इत्यत्र विशेषद्वयेण विशेष्यद्वयस्य प्रतिपादानं यथा अस्ति तथा नास्ति । नीलोत्पलादिषु विशेषद्वयाविरोधात् एकमेवउभविशिष्टंप्रतिपाद्याते ।

प्रश्नः - ननु सामानाधिकरण्यसत्वेपि एकविशेषण सम्बन्धः एकविशेष्यं निरूपयति । तं विशेष्यं विशेषनान्तारं न निरुपयति । यथा घटः पटः इयत्र समानविभक्तिकनिर्देशः अस्ति । तथापि तद्विशिष्योःभेदः एव अवगम्यते । तथा विशेषान्तरान्वयस्य अन्यविशेषणस्यस्य च भेदेन तद्विशेयोश्च भेद एवावगमयति । अतः सामानाधिकरण्यं न विशिष्टैक्यप्रतिपादनार्हं भवति । अपितु विशेषणममुखेन स्वरुपमुपस्थाप्य तत् विशिष्टस्य एक्य एक्यपतिपादनपरमिति मनुषे ।

उत्तरम् - एकस्मिन् विशिष्ये अयोग्य धर्मद्वयविशेषणसंसर्गः विशिष्टैक्यं विरोधयति । यथा घटत्वाधिकरणं पटः पटत्वाधिकरणं घटः इति विरोधमवगमयति । नीलोप्तलम् इत्यादिषु तु यथा दण्डित्व कुण्डलत्वयोः विरोधः असति तथा नास्ति । अपितु प्रवृत्तिनिमित्तभेदेन एकार्थनिष्टत्वरुप विरोधोपि नासति । सामानाधिकरण्यः सरुपमात्रैत्यं प्कतिपादयति चेत् तर्हि अनेकपदानां प्रवृत्तौ निमित्ताभावात् तेषां

मध्ये सामानाधिकरणमेव न स्यात् । विशेषणाः स्वरूपसम्बन्धं परित्त्वा वस्तुस्वरुपमात्रोपलक्षो भवति चेत् तदा एकविशेणः एक वस्तु उपलक्षकत्वात् अन्यत् उपलक्षान्तरं व्यर्थं स्यात् । एवं च उपलक्ष्याकान्ताराभ्यपगमेन तस्योपलक्षणत्वाङ्गिरारादपि उपलक्षणतयाभिमतमेव विशेषणत्वेङ्गिकारः वरं भवति । उभपद विशेषणाविवक्षायमपि सामानाधिकरण्यं सोयं देवदत्तः इत्यादिषु दृष्यते इति यदुक्तम् तत्र उच्यते सोयं देवदत्तः इत्यापि लक्षण न विद्यते । कुतः । तत्र मुख्यार्थभूतविशेषद्वयसम्बन्धे विरोधः नस्ति । देशान्तर सम्बन्धाद्युपाद्यवच्छिन्नातीत कालसम्बन्धिनः सन्निहित देशसम्बन्धाद्युपाधिमत् वर्तमानकालसम्बन्धात् विरोधः नस्ति । अतः कालद्वयसम्बन्धाविरोधादेव सोयं देवदत्तः इति प्रत्यभिज्ञया कालद्वय सम्बन्धि वस्तुनःएक्यं उपपद्यते । कालद्वयसम्बन्धेविरोधः अस्तिचेत् तदा वस्तुस्थिरत्वविषयपतीति विरोधस्यात् । एकस्य देशद्वयकालद्वय सम्बन्धविरोधे देशान्तररालान्तर साद्यफलविद्यानाम्, अत्मनित्यत्वोपदेशाश्चा क्षाणिकत्वात् अप्रमाणं भवेत् । एवं च लोकसिद्द नीलोतपलादि सामानाधिकरणपदप्रयोगेन विशेषणवविवक्षायं उपस्थापित भवति । प्रवृत्तिनिमित्तभेदेन एकार्थ पर्यवसायित्वं सामानाधिकरणपदानां साधयित्व वैदिकप्रयोगसिद्दिं च उपपादित भवति ।

तत्तवमासि इत्यत्र वस्तुमात्रपरत्वे अरुणाधिकरणसिद्धान्त न्ययविरोधः स्यात् । तथाहि-'१अरुणयैरहायन्य पिङ्गाक्ष्यसेमं क्रीणति' इति आरूणादि विशिष्ट

१.तै.उ.६-१-७

एकहायन्यक्रयः साद्यातया उपपादयिष्यते । ‘१अर्थैकत्वे द्रव्यगुणयोरैककर्म्यान्नियमः स्यात् ‘। इति । किमिति अरुणय इति पदोक्त आरुण्यं एकहायनि मन्त्रान्वयि उत प्रकरणोक्त सर्वद्रव्यान्यि । तत्र अरुणय इति पदं किं एकहायन्य इत्यादि पदैः एकवाक्यत्वं अस्ति उत भिन्नवाक्यत्वं । तत्रऽपि अरुणय इत्यादि पदानि एकहायन्य इत्यादि पदैः व्यधिकरणानि अथवा समानाधिकरणानि । अरुणय इत्यत्र कारकविभक्त्यन्तत्वं किं सामानाधिकरण्य विरोधि अथवा अविरोधि । तत्र विरोधि इति पूर्वपक्षः । यथ यः कोऽपि जतिः तद्वस्तुव्यतिरिक्तेन भवितुं शक्यते । तथा गुणस्य न शक्यते । तथा हि गुणः द्रव्याश्रायः इति प्रसिद्धः । अरुणय इति पदं एकहायनि मत्रान्वयि इति चेत् तदा एकहायन्या क्रीणति इति अरुणाय इति पदं अर्थद्वये विद्यमानासंबवात् । अतः अरुणाय इति पदं प्रकरणस्थ सर्वद्रव्यान्वयित्वे तदा अरुणयेति वाक्यं भित्वा प्रकरणविहित सर्वद्रव्यपर्यन्तमेव अरुणिम अविशेषणं अभिदधाति । ननु गुणवाचि पदस्य द्रव्यापर्यन्तत्वे एतदधिकरणपूर्वपक्षोथानं न स्यात् । गुणमात्रपर्यन्तत्वे गुणस्यकारकतया निर्दिष्ठस्य क्रयान्वयस्य द्रव्यान्वयस्य च एकपदत्वेन बोधयितुं अशक्यत्वेन वाक्यभेदात् प्रकरणस्थसर्वद्रव्यान्वयि ति पूर्वपक्षोथानं स्यात् । द्रव्यमात्रपर्यन्तत्वे तु एकहायनिपदसामानाधिकरण्येन विशिष्टकरणैकत्वात् अरुणय इति पदस्य क्रयान्वय मात्रस्य एकवाक्यत्वेन बोधयितुं शक्यत्वेन वाक्यभेधभावात् । एकहायणि मत्रान्ययिति वाक्यभेदायत्ता पूर्वपक्षानुदयः । अतः अरुणय प्रकरणस्य सर्वद्रव्यान्वयि इति वक्तव्यमेव । अपि च अरुणय इति स्त्रीलिङ्ग

१.शा.दी. ३-१-१२

निर्देशात् प्रकणस्य विहित सर्वलिंङ्गकद्रव्याणां प्रदर्शितं भवति । एकहायनि अरुणय इत्यत्र कारकविभक्ति वैयधिकरण्येन स्ववाक्यस्य अरुणय इति पदेन अन्वय नियमो न स्यात् । तस्मात् एकहायनि अन्वयनियमः अरुणय इति पदेन न भवति इति चेत् । अत्राभिधीयते 'अर्थैकत्वे द्रव्यगुणयोरैककर्म्यान्नियमः' स्यात् कारकयोः ऐकत्वे शब्दस्यार्थप्रतिसम्बन्धित्वात् पदविशेषयोः संनिहित विषयवाक्यस्थत्वाच्चा । अरुणयविशिष्ट द्रव्यैकहायनि द्रव्यवाचिपदयोः आरुण्यविशिष्ट एकहायनीत्वविशिष्टं च द्रव्याम् तद्वाचि पदयोः सामानाधिकरण्यन तत् विशेषण द्वार एकविशेष्यवृत्तित्वात् एकार्थकत्वे सिद्धेसति गुणान्वायस्य क्रयान्वये वाक्यभेदप्रसङ्गात् क्रयान्वय एककर्मान्वयावरोधात् अरुणयक्रयसाधनभूत एकहायनि अन्वयनियमः स्यात् । अत्र गुण द्रव्ययोः विशेषण विशेष्यभावः प्रतिपादकावसेयः विशेष्यैक्यं सामानाधिकरण्यावसेयम् क्रयान्वय वाक्यावसेयः । तस्मात् एकस्मिन् वाक्ये अर्थद्वयविधानप्रसङ्गाभावात् वाक्यभेदभावेन आरुण्यं प्रकरणस्य सर्वद्रव्यान्वयि न भवति । अपि तु एकहायनिमात्रान्वयीति सिद्दं भवति । अत एव रक्तः पटोभवति इत्यादिषु एकार्थात् एकवाक्यत्वम् । ननु रक्तः पटः इत्यादि वाक्ये विशेषणस्यैकत्वात् तदुथापित अकाक्षमन्वेति । बहूनि विशेषणानि समस्तपदोक्तानि अन्वितानिस्युः । न व्यस्त पदोक्तानि । अत्र व्यस्तपदानि सन्ति । रक्तः पटः इत्यत्र प्रथमान्ततत्वात् सामानाधिकरण्यं । अत्र तु पदानि कारकविभक्त्यन्तानि । तस्मात् न सामानाधिकरण्यम् इति चेत् । उच्चते । पटस्य भवनक्रियसम्बन्धे व्यपारः । रागसम्बन्धस्तु रक्त

पदेनैवाभिहितः । रागसम्बन्धि द्रव्यं पटः इत्येतावन्मात्रं सामानाधिकरणवसेयम् । एवं च एकेन गुणेन द्वाभ्यां, बहिर्भिवा तेन तेन पदेन समस्तेन व्यस्तेन वा विशिष्टमुपस्थाप्य सामानाधिकरण्येन सर्वविशेषणविशिष्टोऽर्थः एकः इति ज्ञापित्वा तस्य क्रियासंबन्धं अभिदधति तदविरुद्धम् । प्रथमान्त बहुविशेषणान्वाये देवदत्तः श्यामः लोहिताक्षः दण्डी,कुण्डलि इत्युदहृतमस्ति । यथा रक्तः पटः इति पदद्वयम् अचिद्वाक्याम् , अरुणयेति पदं चेतनवाक्यं इति वैषम्यं तत्र न प्रयोजकम् । तथा अत्रपि प्रथमान्थत्व कारकविभक्त्यन्तत्व वैषम्यमपि न प्रयोजकम् भवति । 'शुक्लेनवाससायविकां सम्पादयेत् ' इति कारकविभक्त्यन्त एकपदान्वयमुदहृतमस्ति । नीलोत्पलमानय, नीलमुत्पलमानय, गामानय, इत्यादि कर्मकारकं दृष्टान्तेन उक्तं । '१अग्नयेपथिकृते पुरोडाशमष्टाकपालं निर्वपेत्' सम्प्रदानकारकविषयं वैदिकमुदहृतं भवति । एवमेव '२अरुणयैकहायन्या पिङ्गाक्ष सोमं क्रीणाति' उपात्तद्रव्यवाक्यस्य गुणशब्दः केवलगुणाभिधायि । अरुणायेति पदेन केवल गुणस्यैवाभिधानमिति । तत्र उपात्तद्रव्यवाक्यस्थत्वं गुणवाचिपदानां गुणमात्रपर्यन्तत्वे प्रयोजकमभ्युपेतम् । पटस्य शुक्लः इत्यादिषु दर्शनात् । पटः शुक्लः इत्यादिषु उपात्तद्रव्यवाक्यस्थत्वेऽपि तदपवादक सामानाधिकरण्यात् गुणिपर्यन्ताभिधानमिति च अभ्युपेतम् । तत्र गुणिपर्यन्तत्वे यत् प्रयोजकमुक्तम् तदभ्युपगम्य प्रकृते गुणमात्रपर्यन्तत्वम् दूषयति । तन्नोपपद्यते -- लोकवेदयोः द्रव्यवाचि पद सामानाधिकरणस्य गुणवाचिनः क्वचिदपि

१.तै.सं. २-२-१

२.तै.सं. ६-१

केवलगुणाभिधानदर्शनात् । पटः शुक्लः इत्यत्र गुणविशिष्टस्यैवाभिधानात् । तस्मात् सामानाधिकरण्यस्य अनेकविशेषणविशिष्टैकार्थपरत्वस्य लोक,वेद सिद्दत्वात् ईदृश सामानाधिकरण्यं 'तत्वमसि'इत्यादि सामानाधिकरण्ये न सम्बवति । कुतः चेत् तत्र पदद्वयगतविशेषणपरित्यागेन ऐक्यप्रतिपादनं वर्णनीयम् । तत्तु अनाद्यविद्योपहित अनवधिकदुखभागिनः शुद्धऽशुद्धोभयवस्यात् । चेतनार्दतानतरभूतं अशेषहेयप्रत्यनीक अनवद्यकल्याणगुणैकतानं, परमात्मानम्भुपगच्छन्तो न सम्बवति । ननु एवं अभ्यपगच्छन्तोऽपि सामानाधिकरण्य पदानां यथावस्थित विशेषणविशिष्टैक्य प्रतिपादपरत्वाश्रवणे त्वं पदप्रतिपन्न सकलदोषभागित्वं परस्य ब्रह्मणः प्रसज्येत इति चेत् । त्वं पदेनापि जीवान्तर्यामिनः परस्यैवाभिधानात् ।

प्रश्नः - ननु जीववाचित्वेन उत्पन्नस्य त्वं पदस्य तदन्तर्यामिपरत्वं लक्षाणिकम् भवति। तत् कथं परस्यपरमात्मनः अभिधायि भवति ।

उत्तरम् - सत्यंज्ञानमनन्तंब्रह्म इत्यत्र सत् शब्दाभिहितं निरस्तनिखिलदोषगन्धं, सत्यसंकल्पत्वं, अनवधिकातिशय असंङ्खेयकल्याणगुणगणसमस्तकारणभूतं परम् ब्रह्म 'बहुस्यां' इति सकल्प्य तेजोबन्नप्रमुखं प्रत्येकं जगत् सृष्ट्वा, तस्मिन् देवादि विचित्र संस्थानस्स्मिते जगति चेतनं जीववर्गम् स्वकर्मानुगुणेशु शारीरेषु आत्मतया प्रविश्य,स्वयश्चस्वेच्छयैव जीवान्तरात्मतयाऽनुप्रविश्य एवंभूतेषु स्वपर्यन्तेषु देवाद्याकारेषुसंघातेषु नामरुपे व्याकरोत् । अतः न लक्षण इत्युक्तं भवति । 'अनेन जीवेनात्मना'इत्यत्र 'मय' इति अत्मशब्दः जीवस्य ब्रह्मात्मकत्वं दर्शयति ।

ब्रह्मात्मकत्वं च जीवस्य जीवान्तरात्मतया ब्रह्मणोऽनुप्रवेशादित्यवगम्यते । '१इदम सर्वमसृजत् य इदम् किञ्च'। तत् सृष्ट्वा तदेवानुप्राविशत् । तदनु प्रविश्य सच्चत्यच्चा भवत् ' इत्यत्र उपपादितमस्ति । तथा च श्रुतौ इदं सर्वमिति निर्दिष्टं चेतनाचेतनवस्तुद्धयं सत्यच्छब्दाभ्यां च विभज्य निर्दिश्य चिद्धवस्तुन्यपि ब्रह्मणोऽनुप्रविश्याभिधानात् । एवं सर्वशब्दानां परमात्मपर्यन्तत्वं दर्शयित्व देहनाचि शब्देषु अकृतिनय सञ्चारेण परमात्मपर्यन्तत्वं उपपादयति । '२ऐतदात्म्यमिदंसर्वं' इति चेतनमिश्रं प्रपञ्चम् इदं सर्वमिति निर्दिश्य 'तस्यैष आत्मा'इति प्रतिपादितमस्ति । अतः सर्वंचेतनाचेतनं प्रति ब्रह्मणः आत्मत्वेन सर्वं सचेतनं तस्य शरीरं इत्युक्तं भवति । तथा च श्रुत्यन्तरणि '३अन्तः प्रविशष्टः शास्ता जननां सर्वात्मा' 'यः पृथिव्यां तिष्ठन्पृथिव्या अन्तरो यं न वेद'। यस्य पृथिवी शरीरम् । यः पृथिवीमन्तरो यमयति । स त आत्म अन्तर्याम्यृतः'इत्यारभ्य '४य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्म शरीरम् । य आत्मानमन्तरो यमयति स त आत्म अन्तर्याम्यृतः'। अपि च 'यः पृथिवीमन्तरे सञ्चरन् यस्य पृथिवी शरीरम् । योऽपोऽन्तरे सञ्चरन् यस्याऽऽपः शरीरम् ' इत्याराभ्य 'योऽक्षरमन्तरे सञ्चरन् यस्याक्षरम् शरीरम् । यमक्षरम् न वेद एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव येको नारायणः 'इत्यादीनि सचेतनं जगत्

१.तै.उ.२-६-२

२.छा.उ. ६-७-८

३.तै.आ. ३-२-१

४.बृ.उ. ५-७-३-२२

तस्य शरीरत्वेन निर्दिश्य तस्यात्मत्वेन परमात्मानमुपदिशन्ति । अतः चेतन वाचिनोऽपि शब्दाश्चेतनस्याप्यत्मभूतं चेतनशरीरकं परमात्मानमेवाभिदधति , यथा अचेन देवादि संस्थानपिण्डवाचिनः शब्दाः तत्तच्छरीरकजीवात्मान एव वाचकाः 'चत्वारः पञ्चदशरात्राः देवत्वं गच्छन्ति ' देवाः भवन्तीत्यर्थः । शरीरस्य शरीरिणं प्रति प्रकारत्वात् प्रकारवाचिनां शब्दानां प्रकारिण्येव पर्यवसानात् शरीरवाचिनां शब्दानां शरीरपर्यवसानं न्याय्यम् । अत्र प्रकारं नाम- 'इदमित्थमिति प्रतीयमाने वस्तुनि इत्थमिति प्रतीयमानोंऽशः । तस्य तद्वस्त्वपेक्षत्वेन तत्प्रतीतेस्तदपेक्षत्वात् तस्मिन्नेव पर्यवसानं युक्तमिति तस्य प्रतिपादकोऽपि शब्दः तस्मिन्नेव पर्यवस्यति ' इति । अत एव 'गौरशवौमनुष्यः'इत्यादि प्रकारभूत कृतिवाचिनः शब्दाः प्रकरिणि पिण्डे पर्यवस्यन्तः पिण्डस्यापि चेतनशरीरत्वेन तत्प्रकारत्वात् पिण्डशरीरचेतनस्यापि परमात्मप्रकारत्वाच्च परमात्मन्येव पर्यवस्यन्तीति सर्वशब्दानां परमात्मैव वाच्च इति परमात्मवाचिशब्देन सामानाधिकरण्यं मुख्यमेव। ननु 'खण्डो गौः खाण्डः शुक्लः ' इत्यत्र जातिगुणवाचिनामेव पदानां द्रव्यवाचि पदैः सह सामानाधिकरण्यं दृष्टम् ,परन्तु विशेषणवचि शब्दाः परमविशेष्यवाचि शब्देन सामानाधिकरण्यं दृष्टम् इति चेत् । उच्यते -- जतिर्वा गुणो वा द्रव्यं वा न एतेष्वेकमेव सामानाधिकरण्ये प्रयोजकम् । कुतः । व्यभिचारात् । सामानाधिकरण्य रुप साद्यः जातिगुणवाचि मात्रं अति लङ्घवृत्तित्वात् । अतः यस्य पदार्थस्य कस्यचित् प्रकारतयैव सद्भाव- तस्य तदपृथक्सिद्धिस्थितिप्रतीतिभिः तद्वाचिनां शब्दानां स्वाभिधेयविशिष्टद्रव्यवाचित्वात् धर्मान्तरविशिष्टतद् द्रव्यवाचिना शब्देन

सामानाधिकरण्यं युक्तमेव । यत्र पुनः पृथक् सिद्धस्य स्वनिष्ठस्यैव द्रव्यस्य कदाचित् क्वचित् द्रव्यान्तरप्रकारत्वमिष्यते । पूर्वोक्तप्रकारेण 'एतदात्म्यमिदं सर्वं'इति प्रगेव वैयधिकरण्येन परमात्ममत्वं सर्वस्य विहितमिति प्रतिपादितं भवति । परमात्मनः शरीरतया तत्प्रकरत्वदचिद्विशिष्टजीवस्यापि जीवनिर्देशविशेषरूपाः अहम् त्वां इति परमात्मनमेव आचक्षते इति 'तत्वमसि' इत्यत्र सामानाधिकरण्येन उपसंहारः कृतः । तथा च परमात्मानं प्रति जीवस्य शरीतया अन्वयात् जीवगतधर्माः परमात्मानं न स्पृशन्ति । यथा स्वशरीरगता बालत्व,युवत्वादयो धर्माः जीवं न स्पृशन्ति । अतः 'तत्वमसि'इति सामानाधिकरण्ये तत्पदं जगत् कारणभूतं सत्यसंकल्पं, सर्वकल्याणगुणाकारं,निरस्तसमस्तहेयगन्धं, परमात्मानमाचष्ट । त्वमिति पदं च तमेव सशरीरजीवशरीरकमाचष्टे इति सामानाधिकरण्यं मुख्यवृत्तित्वम् ,प्रकरणाविरोधः,सर्वश्रुत्यविरोधः,निरवद्ये ब्रह्मणि कल्याणगुणैकतानं अविद्यादि दोषगन्धाविदुरं प्रतिपादयति । अतः जीवसामानाधिकरण्यमपि विशेषणभूतीज्जीवात् अन्यत्वमेव आपादयति । अतः विज्ञानमयाजीवत् अन्यः एव आनन्दमयः परमात्मा इति प्रतिपादितं भवति ।

शारीरत्वश्रवण पूर्वपक्ष निराकराणम्

'१तस्यैष एव शारीर आत्मा' इत्यत्र आनन्दमयस्य शारीरत्व श्रवणात् शरीर सम्बन्धः जीवस्य भवति अतः आनन्दमयः जीवदन्यत्वं न इति यत् प्रतिपादितं

१.तै.उ.२-५-१

तदयुक्तम् अस्मिन् प्रकरणे सर्वत्र '१तस्यैष एव शारीर आत्मा, यः पूर्वस्य' इत्यत्र परमात्म एव शारीरः तमेव आत्मशब्देन अभिधानात्।

प्रश्नः - ननु प्राणमय अन्थस्थ शारीरआत्मशब्दः मनोमयपरः मनोमय अन्तस्थः विज्ञानमयपरः इति तत्र तत्र अन्तः सद्भवान परः शारीरआत्मशब्दाः अत्र सर्वत्र उक्त शारीरात्मत्वं शब्दवाच्यः परमात्मएव इति कथं वक्तुं शक्यते।

समाधानं - '२तस्माद्वा एतस्मादात्मन आकासः सम्भूतः' इत्यत्र आकाशदि सृष्टित्वं परमात्मकारणत्वेन जीवभिन्नस्य परब्रह्मणः आत्मत्वेन व्यपदेशात्। तथा च जिवव्यतिरिक्त आकाशादीनां आरभ्य अन्नमय पर्यन्तानां परमात्म शरीरन्तमवगम्यते। कुतः श्रेत् आकाशादिसृष्टे पश्चात् हि जीवस्य करणकलेवर सृष्टिः। अतः ततः पूर्वं जीवस्य सृष्ट्यक्षमत्वात् आकाशादि सृष्टित्वं जिववैलक्षण्य साधकम् भवति। परमात्मनः अन्नमयादि शरीरत्वं श्रृतौ कण्ठतः उक्त च 'यस्यपृथिवी शरीरम यस्यापशरीरम् यस्यतेजशरीरम् यस्याकाशशरीरम् यस्याक्षरंशरीरम् यस्यमृत्युः शरी एष सर्वभूतान्तरात्मा अपहतपात्मा दिव्यो देवः एको नारायणः इति सुबालश्रुत्य सर्वतत्वानां परमात्म शरीरत्वम् स्पष्टमवगम्यते। अतः '३तस्माद्वा एतस्मादात्मनः' इत्यत्र परमात्मैव अन्नमयस्य शारीर आत्म इति अवगतो भवति। प्रणमयं प्रत्याह '४तस्यैष एव शारीर आत्मा यः पूर्वस्य' इति। तत्र पूर्वस्य अन्नमयस्य य शारीरात्मा श्रुत्यन्तर

१.तै.उ. २-३-१
२.तै.उ.२-१-१
३.तै.उ.२-१-१
४.तै.उ.२-३-१

सिद्धः परमकरणभूतः परमात्मा। एवं प्राणमय मनो विज्ञानययो ज्ञातव्यम्। आनन्दमये तु एष एव इति निर्देशः। ननु आनन्दमयं प्रति श्रूयमाणे यः पूर्वस्य इति वाक्ये पूर्वशब्दस्य विवरणं विज्ञानमयं इत्युक्तम्। विज्ञानमयशारीरात्मनः परमात्मत्व सिद्धे आनन्दमयशारीरात्मन परमात्मत्व सिद्धिः अतः विज्ञानमयः न जीवः परमात्मएव इति चेत् न। सत्यं अत्र आनन्दमयस्य ब्रह्मत्वं अभ्यासरूप तत्पर्यादवगम्यते अतः आनन्दमयः ब्रह्म इति सिद्धम्।

प्रश्नः - अभ्यासरूप हेतुन आनन्दमयस्य ब्रह्मत्वं उक्तं। तत्र आनन्दरूप अभ्यासः अस्ति न आनन्दमयस्य तर्हि कथं ब्रह्मत्वं सिद्यति चेत्।

समादानं - 'आनन्द ब्रह्मणे विद्वान्' इत्यत्र पूर्वं अभ्यस्त आनन्द शब्दस्य ब्रह्मसंबन्धित्व निर्देशात् ब्रह्मणश्च 'आनन्दो ब्रह्म इत्यानन्दशब्दवाच्यत्वात्' 'आनन्दो ब्रह्मेति व्यजानात्' इत्यानन्द शब्दवाच्यस्थाने 'एतमानन्दमयमात्मानमुपसङ्क्रम्य' इति आनन्दमयशब्देनिर्देशेन आनन्दः आनन्दमयशब्दः पर्यायत्वात् आनन्दमयः परब्रह्मइत्यवगम्यते।

एवञ्च स्वव्यतिरिक्त चेतनाचेतनवस्तुजातं स्वशरीरमिति स एव निरूपाधिकः शारीर आत्मा। अत एवेदं परं ब्रह्मं अधिकृत्य प्रवृत्तं शास्त्रं शारीरकमित्यभियुक्तैः अभिधीयते। अतः विज्ञानमयात् जीवात् अन्यः एव परमात्म आनन्दमयः।

आनन्दमयः न जीवादन्यः यतो हि मयट्प्रत्ययस्य श्रवणात्।

'१मयड्वैतयोर्भाषायामभक्ष्यच्छदनयोः' तस्य अर्थः प्रकृतिमात्रान्मयड्वास्यात्इकारावयवयोः यथा अश्ममयम् आश्मनम् इति इत्यारभ्य '२नित्यवृद्धशरादिभ्यः' इति विकारार्थे मटय इत्यवगम्यते। अपि च '३वृद्धिर्यस्याचामादिस्तत् वृद्धम्' अस्य अर्थः यस्यसमुदायस्य अचां मद्ये आदिवृद्धिः तत् वृद्धसंज्ञ स्यात्। इति सूत्राणुसारेण आनन्द शब्दस्य वृद्धसंज्ञास्यात् वृद्धसंज्ञकत्वात् विकारार्थे मयट् विहितः।

प्रश्नः - ननु प्राचुर्येऽपि मयडस्ति '४तत्प्रकृतवचने मयट्' तस्य अर्थः - प्राचुर्येण प्रस्तुतं प्रकृत तस्य वचनं प्रतिपादनम्। यथ प्रकृतमन्नमन्नमयम् अपूपमयम्। अत- प्राचुर्य अर्थे अयं भवात् इति।

समादधति - नैवम् अन्नमय इत्यत्र मयटः विकारार्थत्वं उपक्रमे दृष्टम् उपक्रमदर्शनात् उपक्रमप्रतिपन्नार्थस्वीकारे औचित्यात् अत्रपि विकारार्थत्वमेव उचितम्। किञ्च मयटः प्राचुर्यार्थत्वेऽपि जीवादन्यत्वं न सिद्यति। तथाहि आनन्दप्रचुरः इत्युक्ते दुखमिश्रआनन्दप्रचुरत्वमेव सम्भवति। यतो हि आनन्दस्य प्राचुर्यं दुखस्याल्पत्वमवगमयति। दुखमिश्रितत्वमेव जिवत्वम्। यद्यपि मयट विकारार्थपरत्वेऽपि जिवात्मनिन सम्भवति प्राचुर्यार्थत्वेऽपि न सम्भवति तथापि उपक्रमप्राबल्यरूप औचित्वस्याधिकत्वाच्य अत्र विकारार्थत्वमेव ग्राह्यं।

१.पा.सू. १५२३

२.पा.सू.४.४४

३.पा.सू.१३३५

४.पा.सू. ५-४-२१

किञ्च - लोके दारूमयि हिरणमयं मृण्मयं इत्यादौ, वेदे पर्णमयी जुहुः शमीमस्यः स्रुयः दर्भमयी रशना इत्यादिषु मयट्ः विकारार्थे प्रयोगबाहुल्यस्य सत्वात् मयटः विकारार्थकः।

प्रश्नः - ननु लोके, वेदे प्रसिद्धमपि यदि तत् अर्थं अयोग्यं चेत् न ग्रह्यमेव

उत्तरं - अन्यद्रीन्य विकारार्थत्वं उपपादयति आनन्दमयः इत्यत्र मयट् विकारार्थत्वमेव अस्तु। जीव- आनन्दविकारि भवत्येव। स्वतः आनन्दरूपस्य तस्य संसारादशायां आनन्दविकारः अत्स्येव। अतः विकारार्थे मयट्ः श्रवणात् आनन्दमयः जिवादनतिरिक्तः इति भवति तदेतदनुभाष्य परिहरति

विकारशब्दान्नेति चेन्नप्राचुर्यात्

नैतद्युक्तम् कुतः ? प्रचुर्यात् परस्मिन्ब्रह्मणि आनन्दप्राचुर्यात् केवलं प्राचुर्यार्थे रूढिः न अलं किन्तु शब्दशक्तिरपेक्षते चेत्। अन्नमयोयज्ञः इत्यत्र अन्नप्रार्चुयस्य अचयज्ञयोः सम्बन्धः दृश्यते अपि। '१ततप्रकृतवचने मयट ' प्रकृतं प्राचुर्येण प्रस्तुतमुच्यते सप्तम्यन्तप्रत्ययस्य उक्तं भवति। अतः प्राचुर्यार्थे मयटः सम्भवात् प्राचुर्यार्थेऽपि मयट किमर्थ विकारार्थस्य परित्यागो किं हेतुः इति चेत् एतदुक्तं भवति। वेदे शतगुणितोत्तरक्रमेणभ्यास्यमानस्य आनन्दस्य जीवाश्रयत्व असंम्भवात् ब्रह्माश्रयः आनन्दमयः इति निश्चिते सति तस्मिन् ब्रह्मिणि विकारअसम्भवात् प्राचुर्येऽपि मयडर्थ सम्भवाच्च आनन्दमयः परब्रह्म इति सिद्यः भवति।

---

१. पा.सू. ५-४-२१

प्रश्नः - अत्र मयटडर्थस्य बाधवा सद्भावात् विकारार्थत्वं त्यज्यते इति चेत् तर्हि पूर्वोक्त औचित्यरूप साधकसद्भावात् तदर्थः स्वीक्रियते इति।

उत्तरः - उपक्रमरूप औचित्यं प्राणमयेव त्यज्यम्। यतो हि तत्र विकारार्थत्व असम्भवात्। तथा च प्राणमयो नाम प्राणविकारः इत्यर्थस्यात् प्राणविकारः किं इति वक्तुं न शक्यते। अपि च मयट् प्रत्ययस्य प्राचुर्ये प्रौढिर्नास्ति इति न अन्नमयोयज्ञः शकटमयी यन्त्रः इत्यादिषु दर्शनात्।

आनन्दमयः इत्यत्र विद्यमान मयटः यदि प्राचुर्यार्थः उक्तं चेत् तर्हि तत्रैव अल्पदुखसद्भवमवगमयति इति यदुक्तम्।

तदसत् - तत्प्रचुरत्वं हि तत्प्रभूतत्वम् तत् ब्रह्मादन्यस्य जीवस्य सतां न अवगमयति अपि तु तस्याल्पत्वं निवर्तयति। तत्र एतावदेव वक्तव्यम् ब्रह्मानन्दस्य प्रभूतत्वम् अन्यानन्दस्याल्पन्व मपेक्षते। उच्यते च तत् '१स एको मानुषआनन्दः' इत्यादिना जीवादन्यापेक्षया ब्रह्मानन्दः निरतिशयदशापन्नः प्रभूतस्यात्। यच्चोक्तम् आनन्द विकारत्वं जीवस्य सम्भवति इति तदपि अयुक्तम् तथा च मृत् यथा घटाकारेण परिणमति तथा ज्ञानान्दस्वरूपस्य जीवस्य परिणामः सकल शृतिस्मृति विरोधः संसारदशायां तु कर्मणा ज्ञानानन्दौ सङ्कुचितत्व उपपादयिष्यते अतः आनन्दमयः जीवादन्यः परब्रह्मः इति सिद्धो भवति।

१.तै.उ. २-६-१

॥ तद्धेतुव्यपदेशाच्च॥

अत्र जीवादन्यः आनन्दमयः परंब्रह्म इति प्रतिपादितं

'१कोह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो नस्यात्' 'एषह्येवानन्द यति' इति। अनितरसुकर मोक्षप्रदानत्वं हि नितरामानन्दहेतुर्भवति यथा धनुप्रचुरः पुरुषः अन्यस्य पुरुषाय तदभिप्रेतं धनं ददाति। तथा आनन्दप्रचुरः परब्रह्म स्वभक्तानां तदपेक्षित मोक्षरूप आनन्दं ददाति। एवं च आनन्दयितव्याजीवात् आनन्दयित अयं आनन्दमयः जीवादन्यः इति ज्ञातं भवति।

॥ मान्त्रवर्णिकमेव च गीयते ॥

'२सत्यंज्ञानमनन्तं ब्रह्म' इति मन्त्रवर्णोदितं ब्रह्मैव आनन्दमयः इति प्रतिपाद्यते। सः ब्रह्मः जीवादन्यः। तथा हि '३ब्रह्मविदाप्नोतिपरम्' इत्यत्र जीवस्यप्राप्यतय ब्रह्म निर्दिष्टम्। 'तदेषाऽभ्युक्ता' इत्यत्र जीवोपसकतया ब्रह्म प्राप्यं अतः ब्रह्म जीवात् विलक्षणमेव। अपि च '४तस्माद्वा एतस्मादात्मन आकाशः संभूतः' इत्यारभ्य उत्तरत्र ब्रह्मणः मन्त्रैश्च विशादीकरोति। अतो जीवदन्यः आनन्दमय।

प्रश्नः - यद्यपि उपासकभेदात् प्राप्यस्य भेदः अस्तु। तथापि वस्न्वन्तरं जीवात् मान्त्रवर्णिकं ब्रह्मेन साकं न भेदः सम्भवति ततोहि तस्यैव उपसकस्य जीवस्य निरस्तसमस्त अविद्यगन्ध निर्विशेष चिन्मात्रैकरसं शुद्धं स्वरूपमिति अङ्गीकुर्मः।

१.तै.उ.२-७-१ ३.तै.उ.२-२-१

२.तै.उ.२-७-१ ४.तै.उ.२-१-१

तदेव '१सत्यंज्ञानमन्तंब्रह्म' इति मन्त्रेण उच्यते। तदेव च '२यतो वाचो निवर्तन्ते अप्रप्य मनसा सह' इति वाङ्गनसागोचरतया निर्विशेषमिति श्रूयते। अतः तदेव मन्त्रवर्णिकमिति प्रतिपादयिष्यते। तस्मात् जीवात् न अतिरिक्तः आनन्दमयः।

अत्र उत्तरं पठति

॥ नेतरोऽनुपपत्तेः ॥

परमात्मनः भिन्नः मुक्त जीवोऽपि न मान्त्रवर्णिकः भवति। कुतः अनुपपत्तेः। तथा विधस्य जीवात्मनः निरूपाधिकं विपश्चित्वं नोपपद्यते इदमेव '३सोकामयत बहुस्यां प्रजायेय' इत्यत्र सत्यसंङ्कल्पत्व प्रतिपादनेन प्रदर्शयिष्यति। अत्र निरूपाधिकं नाम कर्मविशेषेन्द्रिय अनपेक्षत्वं। विविधं पश्यचित्वं विपश्चित्वम् पश्यन्ती चित् इति कृत्व पश्यचित् तस्य भावः पश्यश्चित्वं। विविधदर्शनत्वं यद्यपि मुक्तस्य जीवस्य विपश्चित्वं सम्भवति तथापि तस्यैव जीवस्य संसारदशायां अविपश्चित्वमत्यस्ति अतः निरूपाधिकविपश्चित्वं नोपपद्यते। तथा च निर्विशेषचिन्मात्रतापन्नस्य मुक्तस्य विविधदर्शननाभावात् सुतरां विपश्चित्वं न सम्भवति। '४यतोवाचोनिर्वन्ते' इत्यत्र ब्रह्मणः वाङ्गन अगोचरत्वम् मुक्तम् । तदयुक्तम्। तथा च ब्रह्मविदाप्नोतिपरं इत्यारभ्य ब्रह्मणः विपश्चित्वं जगत्कारणत्वं, ज्ञानान्दैकतानताम्, इतरान् प्रति आनन्दयितृत्वं

१.तै.उ.२-१-१

२.तै.उ.२-१-१

३.तै.उ.२-६-१

४.तै.उ. २-९-१

वाग्वादिनां प्रशासितृत्वं, शतगुणित उत्तरक्रमेण निरातिशय आनन्दवत्वम् इत्यादि अनेकं प्रतिपाद्य वङ्गनसयोः ब्रह्मणि प्रवृत्यभावेन निष्प्रमाणकं ब्रह्म इत्युच्यते इति चेत् तत् भ्रान्तिरेव। अतः शतगुणित उत्तरक्रमेण ब्रह्मानन्दस्य अतिशयेयत्तां वक्तुमुद्यम्य जीवस्य एतदृशः ब्रह्मणः जड वडमनसयोः ज्ञातुमश्यक्यत्वात् वङ्गनसयोस्ततो निवृत्तिः 'यतोवाचोनिर्वन्ते' इत्यनेन उक्तं भवति। किश्च अस्य मन्त्रवर्णिकस्य ब्रह्मणः विविधदर्शनत्वं '१सोऽकामयत्' इत्यारभ्य वक्षमाणसत्यसंकल्पत्व, जगज्जन्म-स्थितित्व, जगदन्तरात्मत्वादेः मुक्तात्मं प्रति प्रतिपादितं न शक्यते। अतः मुक्तात्मदन्यः एव आनन्दमयः इति सिद्धः भवति।

॥ भेदव्यपदेशाच्च ॥

'२तस्माद्वा एतस्मादात्मन आकाशः' इत्यारभ्य मान्त्रवर्णिकं ब्रह्म प्रतिपादयत् वक्यं यथा अन्न, प्रण मनोयात् भेदं प्रतिपादयति तथा जीवादपि भेदं व्यपदिश्यति। अपि च 'तस्माद्वा एतस्माद्विज्ञान मयात्' '३अन्योन्तर आत्माऽऽनन्दमयः' इत्यत्र विज्ञानमय शब्दवाच्यात् जीवादन्यत्वं आनन्दमयस्य ज्ञायते। अतः जीवात् भेदस्य व्यपदेशाच्या अयं मान्त्रवर्णिकं ब्रह्मः एव आनन्दमयः इति बुद्दिर्जायते एव।

॥ कामाच्यनानुमानपेक्षा ॥

यदि अविद्यपरवशः जीवः जगत्कारणं स्यात्। तदा अनुमानिकप्रधानदि शब्दाभिधेयः अचिष्वस्तु संसर्गापेक्षास्यात्। इह तु '४सोऽकामयत् बहुस्यां प्रजायेय'

१.तै.उ.२-६-१ ३.तै.उ.२-५-१

२.तै.उ.२-१-१ ४.तै.उ.२-६-१

इति अचित संसर्गरहितः परमात्म स्वकामादेव स्वसङ्कल्पादेव विचित्र चिदचिन्वस्तुनः सृष्टिः करोति। अपि च '१इदं सर्वमसृत्ज यदिदं किञ्च' इत्यत्राम्नानात्। अतः परमात्मनः आनन्दमयत्व साधने अनुमानानपेक्षत्वमपि हेतुः इति निरूपित मत्र भवति।

॥ अस्मिन्नस्य च तद्योगं शास्ति ॥

अस्मिन् आनन्दमये अस्य जीवस्य तद्योगम् आनन्दयोगम् शास्ति शास्त्रम्। '२रसेवै सः रसह्येवायं लब्ध्वाऽऽनन्दी भवति' इत्यत्र रसशब्दवाच्यः आनन्दमयः आनन्दी शब्दवाच्यः जीवः। एवं च आनन्दमयेन जीवः आनन्दं प्रप्नोति इत्युक्तं भवति। तथा च येन आनन्दत्वं लभ्यते तेन साकं स जीवः कथं अभिन्नः इति वक्तुशक्यते कथमपि न। एवं आनन्दमयः परं ब्रह्मेति निश्चिते सति, '३यदेष आकाश आनन्दः '४विज्ञानं आनन्दब्रह्म' इत्यादिषु आनन्द शब्देन आनन्दमयः एव परमृश्यते। यथा विज्ञानशब्देन विज्ञानमयः। अत एव '५आनन्दमयमा-त्मानपुसङ्क्रामति' इति फलनिर्देशः कृतो भवति। अपि च पूर्वानुवाकउक्तनामन्नमयादीनां उत्तरानुवाके '६अन्नंब्रह्मेतिव्यजनात् ' '७प्राणो ब्रह्मेतिव्यजनात्'

१.तै.उ.२-६-१
२.तै.उ.२-७-१
३.बृ.उ.५-९-२८
४.बृ.उ.३-९-३८
५. तै.उ.२-८-१
६. तै.उ.३-२-१
७. तै.उ.३-३-१

'१मनोब्रह्मेतिव्यजानात्' '२विज्ञानं ब्रह्मेतिव्यजानात्' इति तेषां ब्रह्मत्वप्रतिपादानंकृतं। तथैव '३आनन्दोब्रह्मेतिव्यजानात्' इति आनन्दमयः ब्रह्म इति प्रतिपादितमिति ज्ञायते। तत एव तत्राऽपि '४आनन्दमयमात्मनमुपसंक्रम्य' इति उपसंहारः कृतम्। अतः विज्ञानमयात् जीवात् अन्यः आनन्दमयः ब्रह्म इति सिद्धान्तितं भवति।

विशिष्टाद्वैत मतरीत्या आनन्दमयाधिकरणस्य स्वरूप विचारः

समाप्तः

१.तै.उ.३-४-१

२.तै.उ.३-५-१

३.तै.उ.३-६-१

४.तै.उ.३-६-१

।। आनन्दमयाधिकरणस्य अद्वैतपरव्याख्यानस्यविमर्शः ।।

द्वैतसिद्धान्तोपरिकृताक्षेपसमाधानम्

अद्वैतमतानुसारेण कृतस्य आनन्दमयाधिकरणव्याख्यानस्य विमर्शः ।

१.अद्वैतिनः– द्विरूपं हि ब्रह्मावगम्यते वेदान्तवाक्येषु । नामरूपविकारोपाधिविशिष्टं तद्विपरीतं च सर्वोपाधिविवर्जितम् । '१यत्र हि द्वैतमिव भवति' '२सर्वाणि रूपाणि विचिन्त्य धीरः' इत्येवं सहस्रशो अविद्याविद्याविषयभेदेन ब्रह्मणो द्विरूपतां दर्शयन्ति वेदान्तवाक्यानि । तत्राविद्यावस्थायां ब्रह्मणः उपास्योपासकादिलक्षणः सर्वो व्यवहारः । तत्र कानिचिद् ब्रह्मणः उपासनान्यभ्युदयार्थानि । कानिचित् क्रममुक्त्यर्थानि कानिचित् कर्मसमृद्ध्यर्थानि । एवमपेक्षितोपाधिभेदं ब्रह्मोपास्यत्वेन निरस्तसमस्तोपाधि तु ज्ञेयत्वेनोपदिश्यत इत्यस्यार्थस्य प्रदर्शनायोत्तरग्रन्थ आरभ्यते इति ।

द्वैतिनः– ब्रह्मणो द्वैरूप्यस्याप्रामाणिकत्वात् । न चैतद् द्वैरूप्य-प्रपञ्चनमुत्तरत्रोपलभ्यते । नाप्यस्याविद्याविषयस्य प्रपञ्चनं मोक्षशास्त्रे अत्रोपयुज्यते । प्रसङ्गादुच्यते इति चेन्न । सर्वस्य प्रासङ्गिकत्वे प्रतिपाद्याभावप्रसङ्गात्

१.बृ.उ.२.४.१४ २. तैत्ति.आर.३.१२.७

। एतच्च सगुण-निर्गुणभेदं निराकुर्वताऽऽचार्येण जन्माधिकरणे निरस्तमिति नेह पुनः प्रक्रान्तम्।

सर्वाण्यपि हि वेदवाक्यान्यसङ्ख्येयकल्याणगुणाकरं सकलदोषगन्ध-विधुरमेकरूपमेव ब्रह्म नारायणाख्यं प्रतिपादयन्ति । कानिचित् सर्वज्ञत्वसर्वेश्वरत्व-सर्वान्तर्यामित्वसौन्दर्यौदार्यवीर्यादिगुणविशिष्टतया, कानिचिदपहतपाप्मत्व-निर्दुःखत्वप्राकृतभौतिक-विग्रहरहितत्वादिदोषाभावविशिष्टतया, कानिचिदतिगहन-ताज्ञापनाय वाङ्मनसागोचरत्वाद्याकारेण, कानिचित् सर्वपरित्यागेन तस्यैवोपादानाया-द्वितीयत्वेन, कानिचित् सर्वसत्ताप्रतीतिप्रवृत्तिनिमित्तताप्रतिपत्त्यर्थं सर्वात्मकत्वेन इत्येवमाद्यनेकप्रकारैः सर्वत्राप्येकरूपतया ब्रह्म प्रतिपादयन्ति ।

अन्नमयादिनां पञ्चानां ब्रह्मत्वाङ्गीकारे प्रायपाठविरोधः - तत्परीहारश्च

२. अद्वैतिनः– अन्नमयादय पञ्चापि कोशा इति मन्यमाना 'ब्रह्म पुच्छं प्रतिष्ठा' इत्युक्तस्य ब्रह्मण स्वप्राधान्येन ज्ञेयत्वप्रतिपादकान्येतानि सूत्राणीति व्याचक्षते । तथाहि– अन्नमयादयश्चत्वारः तावदन्नादिविकारा कोशा एव । तथाच विकारार्थे मयट्प्रवाहे सत्यानन्दमय एव कस्मादर्ध-जरतीयन्यायेन कथमेव मयट प्राचुर्यार्थत्वं ब्रह्मविषयत्वं चाश्रीयते? अतः प्रायपाठत्यागरूपदोषः सम्भवति । मान्त्रवर्णिक-ब्रह्माधिकारादिति चेत्, अन्नमयादीनापि तर्हि ब्रह्मत्वप्रसङ्गः ।

द्वैतिनः– अन्नमयादिपञ्चकं यदि न ब्रह्म, तदाऽन्नमयादीन् प्रत्युदा-हृतश्लोकेषु 'येऽन्नं ब्रह्मोपासते' इति प्रथमानुवाके, 'अन्नं ब्रह्मेति व्यजानात्'

इत्युत्तरानुवाके च ब्रह्मतयोक्तिविरोधः स्यात् । तथा च अनुवाकद्वये ब्रह्मतयोक्तानां अन्नमयादीनां अब्रह्मत्वे, आनन्दमयपुच्छस्यापि ब्रह्मत्वे प्रमाणं ब्रह्मशब्दमेव, अन्यत् किमपि नास्ति । तथा च आनन्दमयपुच्छोपि ब्रह्म न स्यात् ।

अन्नमयादावपि प्राचुर्यार्थस्य एवाङ्गीकारात् न प्रायपाठत्यागदोषः सम्भवति ।

किञ्च प्राणमये मयट्प्रत्ययस्य मुख्यविकारार्थत्वं त्वयापि न स्वीकृतः । किन्तु गौणः एव । भामत्यां तु 'प्राणाद्युपाध्यवच्छिन्नः ह्यात्मा भवति प्राणादिविकारः । घटाकाशमिव घटविकारः' इत्युक्तम् ।

अद्वैतरीत्या प्राणमये स्थित मयटः प्राचुर्यार्थ स्वीकारावश्यकतासमर्थनम्

अद्वैतिनः– प्राणमयमनोमययोः मयटः '[१]द्व्यचश्छन्दसि' इति छन्दोविषयेन विशेषसूत्रेण विकारार्थत्वः एव वक्तव्यः । '[२]तत्प्रकृतवचने मयट्' इति छन्दोऽच्छन्दःसाधारण्येन सामान्यशास्त्रेण प्राचुर्यार्थत्वाश्रयणं न युक्तम् ।

द्वैतिनः– आनन्दमयशब्दस्य त्र्यच्कप्रकृतिकतया '[३]द्व्यचश्छन्दसि' इति विकारार्थे मयच्प्रसक्त्यभावेन अयं मयट्शब्दो विकारार्थो वा प्राचुर्योर्थो वा इति सन्देहः एव नास्ति । अतः प्रायपाठानुसरणं अनावश्यकम् । विकाराप्रायपाठस्याभावाच्च । तथाहि– विज्ञानमयान्नरसमयशब्दयोः त्र्यच्कचतुरच्कप्रकृतिकतया ब्रह्मलिङ्गानां श्रवणेन च त्वदुक्तरीत्यैव 'द्व्यचश्छन्दसि' इति सूत्रेण विकारार्थे मयड्प्रसक्तिः । प्राणमयमनोमयोरपि 'ये प्राणं ब्रह्मोपासते' 'यतो वाचो निवर्तन्ते' इत्यादिषु ब्रह्मत्वमनोवाचां गोचरत्वादि-

---

१. पा.सू.३४५३ २. पा.सू.२०८९ ३. पा.सू.३४५३

ब्रह्मलिङ्गश्रवणेन '१अन्तःशरीरे ज्योतिर्मयो हि शुभ्रः' '२य एषोऽन्तर्हृदये आकाशस्तस्मिन्नयं पुरुषो मनोमयः' इत्यादौ विकारहीने ब्रह्मणि 'ज्योतिर्मयः मनोमयः' इति विकारभिन्नार्थे 'द्व्यचश्छन्दसि' मयट्प्रयोगदर्शनेन विकारार्थ एव मयट् न तु प्राचुर्यार्थे इति वक्तुं न युक्तम् । किञ्च 'द्व्यचश्छन्दसि' 'तत्प्रकृतवचने मयट्' अनयोः सामान्यविशेषभाव एव नास्ति ।

पुच्छब्रह्मवादनिरूपणम् - तत् समाधानं च

अद्वैतिनः– अन्नमयादीनामन्तरस्यान्यस्य श्रवणादब्रह्मत्वमानन्दमयस्य तु तदभावाद् ब्रह्मत्वमिति चेत्, न । तत्रापि 'सत्यं ज्ञानमनन्तं ब्रह्म' इति प्रकृतस्य ब्रह्मणो 'ब्रह्म पुच्छं प्रतिष्ठा' इत्यानन्दमया-श्रयतयोक्तत्वात् । तद्विजिज्ञापयिषैवान्नमयादय पञ्चापि कोशा कल्प्यन्ते ।

द्वैतिनः– नन्वेतद् ब्रह्मज्ञानद्वारतयोपदिष्टम् । नतु ब्रह्मतयोपदिष्टमिति चेत्, न । सामानाधिकरण्येनोक्तत्वात् । न च सामानाधिकरण्यमपि गौणम् । तथासति विदुषस्तत्प्राप्तिरुक्ता विरुद्ध्येत । न च तत्रातिक्रमोऽर्थः इत्युक्तम् । न चाऽनन्दमये ब्रह्मशब्दो नास्ति श्लोकस्य पुच्छविषयत्वादिति वाच्यम् । तथासत्यन्नमयादिश्लोकानामपि तथात्वप्राप्तेः ।

स्यादेतत्। ब्रह्मप्रश्नोत्तरतयोक्तिमात्रेण न वरुणोक्तान्नादीनां ब्रह्मत्वं सिद्ध्यति। ब्रह्मज्ञानोपायतयाऽपि तदुपदेशोपपत्ते। तथाहि द्वितीयाचन्द्रप्रश्नेऽचन्द्ररूपाऽपि

१. अ.उ.१.५

२ .तै.उ.१.१५

शाखा चन्द्रतयोच्यते, चन्द्रज्ञानोपायत्वात्। यथावाऽरुन्धतीप्रश्ने तत्समीपवर्तिनी पृथुला तारकाऽरुन्धतीत्वेनोपदिश्यते, अरुन्धतीज्ञानद्वारत्वात्। द्वारत्वं चान्नादिशब्दोदितानां शरीरादीनां बहिर्वृत्तिनिवारणद्वारा ब्रह्मज्ञानं प्रत्युपपद्यत एवेति। मैवम्। किमनेन व्यभिचारश्चोद्यते, किंवाऽन्यथासिद्धि सम्भाव्यते, उत सा निश्चीयते? पक्षत्रयमसम्बद्धमित्याह द्वारमिति।

.....द्वारं तददतिवादिन।।

उपसत्तिं कथं विद्युरुपसन्नाय हि त्रिश।

वक्तव्यं ब्रह्म गुरुणा चतुर्वारमथापि वा।

सकृद् वेत्यागमा ब्रूयु सम्प्रदायविदोऽपि च ।।

तद् यत्किञ्चित् कथं ब्रूयादुपसन्नाय दिक्पति।

न वदेद् ब्रह्म च कथं मायावी नहि वारिराट्।।

तदन्नादिकम्। उपसत्तिम्, ब्रह्मज्ञानार्थोपसत्त्युत्तरकालीनं गुरूपदेश-प्रकारमित्यर्थ। कथमित्याक्षेपे। न विद्युरित्यर्थ। गुरूपदेशप्रकाराज्ञानविजृम्भितेयं शङ्केति भाव।

तत् कथं न विद्युरित्यत आह उपसन्नायेति। ब्रह्मैव वक्तव्यम्। न पुनर्यत्किञ्चित्। अबोधेऽपि पुनपुन शब्दान्तरेण तदेव वक्तव्यम्। द्वारं च द्वारतयैव वक्तव्यम्। नतु तदात्मकत्वेन। नहि धूमोऽग्न्यात्मकत्वेन न प्रदर्श्यते।

चन्द्राद्युदाहरणमप्यसिद्धमेवेति। आगमा वेदा। सम्प्रदायविद स्मृतीतिहास-पुराणकर्तार। अपिचावितरेतरसमुच्चायार्थौ।

अद्वैतिनः– नन्वन्नमयादीनामिवाऽनन्दमयस्य पुच्छत्वेनोक्तं ब्रह्म कथं स्वप्रधानं स्यात्? न। स्वप्रधानतया प्रकृतत्वात्। नचाऽनन्दमयावयवत्वेनापि ब्रह्मणि ज्ञायमाने प्रकृतत्वं न हीयते, आनन्दमयस्य ब्रह्मत्वादिति वाच्यम्। तथासति तदेवावयवि अवयवश्चेत्यसामञ्जस्यप्रसङ्गात्। अन्यतरपरिग्रहे च पुच्छस्यैव ब्रह्मत्वं युक्तम्, ब्रह्मशब्दश्रवणात्। नत्वानन्दमयस्य तत्र ब्रह्मशब्दाश्रवणात्। 'असन्नेव' इति श्लोकस्य 'ब्रह्म पुच्छम्' इत्युक्तब्रह्मविषयत्वात्। नह्यत्राऽनन्दमयोऽन्वाकृष्यते। किन्तु पुच्छतयोक्तं ब्रह्म स्वप्रधानतया। नचाऽनन्दस्यानुभवसिद्धस्य भावाभावशङ्का युज्यते। कथं तर्हि पुच्छत्वोक्तिः? पुच्छवत् पुच्छमित्या-श्रयार्थत्वात्।

द्वैतिनः– आनन्दमयपुच्छयोः द्वयोरपि पूर्णत्वेन ब्रह्मशब्दः तावन्मुख्यः। पूर्णत्वं हि ब्रह्मशब्दस्य मुख्यार्थः। यथा धर्मान्तरेष्वदृष्टमपि जातिसमवायादौ धर्मितः अधिकदेशत्वं, यथा वा परिच्छिन्नेन आव्रियमाणसम्बन्धिना आवृतेष्वन्येष्वदृष्टमपि परिच्छिन्नाज्ञानावृते निरंशे चैतन्ये अपरिच्छिन्नत्वं, यथा वा आनन्दान्तरेष्वदृष्टमपि ब्रह्मानन्दस्य पूर्णत्वादिकं तथान्यत्रादृष्टमप्यवयवस्य पूर्णत्वं विचित्रशक्तियुक्तब्रह्मावयवे अस्तु।

ब्रह्मणः अवयवस्य पूर्णत्वं 'विश्वतश्चक्षुः' 'पूर्णमदः पूर्णमिदं' इत्यादिश्रुतिभ्यां, '[१]सर्वतः पाणिपादं तद्' इत्यादिस्मृत्या अवयवस्य पूर्णत्वम्। एतच्च उपपादितं

१.भ.गी.१३.१४

द्वैतसिद्धान्तकथनावसरे । तथा 'उद्धबर्हात्मनः केशौ' इत्यादिस्मृत्या केशस्य कृष्णत्वेन अवतारात्, तस्य च 'व्याप्तं त्वयैकेन दिशश्च सर्वाः' इति पूर्णत्वोक्त्या भगवतः अवयवस्य पूणत्वं सिद्ध्यति । 'स शिरः स दक्षिणः पक्षः' इत्यादि श्रुतौ अवयविनः एवावयवत्वं श्रूयते ।

अद्वैतिनः– १.'स शिरः स दक्षिणः पक्षः' इत्यादि मध्वोदाहृतश्रुतेः क्वापि वेदकोशेषु अनुपलब्ध्या शशशृङ्गतुल्यत्वात् ।

द्वैतिनः– १.पूर्वमीमांसायां शाबरभाष्ये औदुम्बराधिकरणे 'ऊर्जपशूनाप्नोति ऊर्जोवरुध्य' इति अप्रसिद्धश्रुत्युदाहरणं दृश्यते ।

२. शाङ्करभाष्ये 'ॐ १अत एव चोपमा सूर्यकादिवत् ॐ' इति सूत्रव्याख्यावसरे 'यथा ह्ययं ज्योतिरात्मा विवस्वान्' इति इदानीमनुपलभ्यश्रुत्युदाहरणं प्रसिद्धं वर्तते ।

३. रामानुजभाष्ये 'ॐ २ज्योतिश्चरणाभिधानात् ॐ' 'इन्द्रः शचीपतिः बलेन पीडितः दुश्च्यवनो वृषा समुत्ससास हि' इति इदानीन्तनैः अश्रुतश्रुत्युदाहरणमपि कथं सङ्गच्छते इति भवता समाधातव्यमस्ति ।

आपस्तम्बसूत्रादिषु, श्रीकण्ठभाष्ये च अप्रसिद्धश्रुतीनामुदाहृतत्वात् । अतः अल्पज्ञैरदृष्टत्वमात्रेण ता असत्य इति वक्तुं न शक्यते । अन्धैरदृष्टानां पदार्थानामप्यसत्वप्रसङ्गात् ।

---

१. ब्र.सू.३.२.१८

२. ब्र.सू.१.१.२४

अद्वैतिनः– 'उद्धबर्हात्मनः केशौ' इति उत्पाटनोक्तिः न सङ्गच्छते । क्षीराब्धिशायिनः भगवत्केशस्य परिपूर्णब्रह्मरूपत्वे तस्य व्यापकतया आकाशस्य इव उत्पाटनं न सम्भवत्येव । श्रीकृष्णस्य केशत्वोक्तिस्तु 'मत्केशेनापि कंसादिवधः कर्तुं शक्यते' इति कंसादिवधस्य अनायाससाध्यत्वप्रतिपादकमेव । अतः एतत् अवयवस्य पूर्णत्वसाधकं न भवति ।

द्वैतिनः– विष्णुपुराणे अस्मिन् विषये प्रमाणानि एवं सन्ति ।

एवं संस्तूयमानस्तु भगवान् परमेश्वरः ।
उज्जहारात्मनः केशौ सितकृष्णौ महामुने ।।
उवाच च सुरानेतौ मत्केशौ वसुधातले ।
अवतीर्य भुवो भारक्लेशहानिं करिष्यतः ।।
वसुदेवस्य या पत्नी देवकी देवतोत्तमा ।
तस्यायमष्टमो गर्भो मत्केशो भविता सुराः ।।
अवतीर्य च तत्रायं कंसं घातयिता भुवि ।

इत्यादि विष्णुपुराणवचनेभ्यः परमात्मनः केशस्यैव गर्भप्रवेशावतरण-कंसादिहननदिकर्तृत्वं उपपादितम् । तस्यैव '१व्याप्तं त्वयैकेन दिशश्च सर्वाः' इति सर्वत्र पूर्णत्वं च प्रतिपादितम् । तेन अवयवावयविनोः अभेदस्य सिद्धिः **भवति ।**

१.भ.गी.११

अत एव 'नेह नानास्ति किञ्चन' इत्यनेन अवयवादिप्रतियोगिकभेदस्य निषिद्धत्वेन 'स शिरः स दक्षिणः पक्षः' इत्यादिप्रमाणानि न स्वकपोलकल्पितानि इति प्रतिपादयितुं शक्यते । अतः ते शशशृङ्गसदृशाः इत्यभिलपनं सज्जनैः गर्हितं वर्तते ।

अद्वैतिनः– किञ्चाऽनन्दमयस्य प्रियाद्यवयवयोगशारीरत्वाभ्यां सविशेषत्वाद् ब्रह्मणोऽपि सविशेषत्वप्रसङ्गः । निर्विशेषं च ब्रह्म । वाङ्मनसागोचरत्वश्रुतेः।

द्वैतिनः– सविशेषत्वं तु ब्रह्मत्वसाधकम् । न च 'यतो वाचो निवर्तन्ते' इति श्रुतिर्निर्विशेषत्वमाह । किन्तु अवाङ्मनसगोचरानन्तविशेषवत्त्वम् ।

मयटः प्राचुर्यार्थत्वे प्रतियोग्यल्पत्वस्यसमर्थनम् तत् निराकरणं च

अद्वैतिनः– मयट प्राचुर्यार्थत्वेऽप्यानन्दप्रचुर इत्युक्ते दुखाल्पत्वमपि गम्यते। प्राचुर्यस्य लोके प्रतियोग्यल्पतासापेक्षत्वात्। न च ब्रह्मणि दुखं सम्भवति । अतः आनन्दमयः ब्रह्म न भवति ।

द्वैतिनः– प्राचुर्यस्य प्रतियोग्यल्पत्वापेक्षत्वेपि न प्रतियोगिनः सामानाधिकरण्यनियमः । यतः प्राचुर्यस्य–

विजातीयासमानाधिकरणाल्पं यथा तथा ।
सजातीयाविभिन्नाधिकरणाल्पं निरूपकम् ।।

दृश्यते हि ब्राह्मणप्रचुरो ग्राम इत्यादौ समानाधिकरणस्य विजातीयशूद्रादेः अल्पत्वेनेव प्रचुरप्रकाशः सवितेत्यादौ व्यधिकरणस्य सजातीयस्य नक्षत्रादि-

प्रकाशस्याल्पत्वेनापि प्राचुर्यं, प्रकृते च 'सैषानन्दस्य' इत्यादिश्रुत्यैव व्यधिकरणस्य सजातीयस्य जीवानन्दस्याल्पत्वमुक्त्वा ब्रह्मानन्दस्य 'यतो वाचः' इति महत्त्वमुक्तम् ।

अद्वैतिनः– कल्पतरौ प्राचुर्यस्य विशेषणत्वे प्रतियोगिनः ईषदनुवृत्त-प्रतीतिनियमाभावेऽपि विशेष्यत्वे तन्नियमः अस्त्येव । 'ब्राह्मणप्रचुरो ग्रामः' इत्यादौ तथा दर्शनात् । आनन्दमय इत्यत्र तु प्राचुर्यं विशेष्यमस्ति ।

द्वैतिनः– 'प्रकाशप्रचुरः सविता' इति प्राचुर्यस्य विशेष्यत्वेन उक्तेपि तस्मिन् अन्धकारलेशाप्रतीतेः । 'अन्तःशरीरे ज्योतिर्मयो हि शुभ्रोऽयं पश्यन्ति यतयः क्षीणदोषाः' 'य एषोन्तर्हृदयः आकाशः तस्मिन्नयं पुरुषो मनोमयः' 'प्रज्ञानघन एवानन्दमयः' इत्यादौ त्वन्मतेपि ब्रह्मण्यपि विज्ञानमयादि-शब्दप्रयोगाच्च । न चात्र प्राचुर्यार्थत्वसम्भवे वैयर्थ्यापादकं स्वार्थिकत्वं युक्तम् । ब्राह्मणप्रचुर इत्यादावपि प्रचुरशब्दो महत्त्वमात्रमाह । विरोधिप्रतीतिस्तु मानान्तरात् । 'सैषानन्दस्य' इत्यादौ आनन्दपदं न प्राचुर्यलक्षकम् । किन्तु आनन्दमात्रपरम् । अन्यथा 'ते ये शतम्' इति तारतम्योक्त्ययोगात् । 'आनन्दं ब्रह्मणः' इत्यत्र तु अवाङ्मनसगोचरत्वेनानन्दस्य प्राचुर्यसिद्धिः । 'यदेषः' इत्यत्रापि सुखरागस्य दुःखद्वेषस्य दुःखोद्रेकस्य च प्रवृत्तिनिमित्तस्य भगवत्यसम्भवेन सृष्ट्यादिप्रवृत्त्यन्यथानुपपत्याानन्दोद्रेके सिद्धे महा-प्रवृत्त्या महानन्दोद्रेकसिद्धिः । न त्वानन्दमयस्य प्राचुर्यलक्षकत्वेन ।

अन्नमयादीनां सह आनन्दमयस्याभेद प्रतिपादिनम्

अद्वैतिनः– किञ्च प्रियादीनां प्रतिशरीरं भेदेनाऽनन्दमयस्यापि भेदे ब्रह्मणोऽपि प्रतिशरीरं भेद प्रसज्येत । न च तद् युक्तम्, अनन्तत्वश्रुतेः ।

नचैवं भार्गवी वारुणी विद्या विरुद्ध्येत । तत्र मयटोऽश्रवणेन भिन्नविषयत्वात्। 'एतमानन्दमयमात्मानम्' इति चान्नमयादीनामिवाऽनन्दमयस्यातिक्रमणीयतयोक्तस्य अब्रह्मत्वात् । अन्ते मयटः श्रवणेन पूर्वमपि तदध्याहारे पूर्वमपि नाऽनन्दमयो ब्रह्मास्तु । ब्रह्मज्ञानार्थिनस्तु तदुपदेशद्वारतयोपपन्नो भविष्यतीति ।

द्वैतिनः– प्रियादिकं च यः प्रतिशरीरं भिन्नः नासौ भगवतोवयवः । यश्चावयवः न स भिन्नः । विस्तृतं चैतत् भगवत्पादैः तैत्तिरीयभाष्ये ।

शिरः प्रिये स्थितं तस्य परेयं प्रियनामकम् ।
मोदप्रमोदयोः बाहू मोदनाच्च प्रमोदनात् ।।
मोदप्रमोदनामानावानन्दस्त्वाततत्वतः ।
मध्यमानासंस्थं च ब्रह्मसृष्ट्या तु बृंहयन् ।।
पुच्छं प्रधानवायौ च ब्रह्माख्ये संस्थितं सदा ।।

७.नन्वेवन्तर्हि कथं सूत्राणि? आनन्दमयस्य ब्रह्मताप्रतिपादनपरतयोपलम्भात् । मैवम् । 'वेदसूत्रयोः विरोधे गुणे त्वन्याय्यकल्पना' इति

न्यायेन सूत्राणां कथञ्चिद् योज्यत्वात्। तस्मादानन्दमयादय पञ्चापि कोशा न ब्रह्मेति ।

किञ्च बाधकवशादित्थमाश्रीयते, एवमेव वा? नाऽद्य, बाधकानां परिहृतत्वात्। द्वितीये तु निर्निमित्तं वेदार्थभूतब्रह्मापलापिनो बौद्धस्येव वेदाभिमानिकोपेन नरकप्राप्ति स्यादिति।

स्थानद्वयगतेत्युक्तम्। प्राक् च ''भृगोश्चैतद् वदिष्यति'' इति। तत्रोत्तरानुवाकोक्तस्य ब्रह्मत्वं प्रपञ्चयति अधीहिति।

अधीहि भगवो ब्रह्मेत्युक्तोऽन्नप्राणपूर्वकम्।

आह ब्रह्म कथं तन्न

अधीहि अध्यापय। ण्यर्थस्यान्तर्णीतत्वात्। भगवो भगवन्। ''मतुवसो सम्बुद्धौ छन्दसि'' इति वचनात्। उक्तो भृगुणा पृष्टो वरुण। ''१भृगुर्वै वारुणि। वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति। तस्मा एतत् प्रोवाच। अन्नं प्राणं चक्षु श्रोत्रं मनो वाचमिति'' एवं ब्रह्मप्रश्नोत्तरत्वेनोक्तत्वादन्नादिकं ब्रह्मैव भवितुमर्हतीत्यर्थ।

ननु तत्र मयटोऽश्रवणाद् भिन्नविषयत्वमिति चेत्, न । उक्तोत्तरत्वात् । किञ्च तथासत्यन्नमयादीन् प्रत्युदाहृतश्लोकेषु मयटोऽश्रवणाद् भिन्नविषयत्वं स्यात्। अस्त्विति चेत्, न। तथासति तदुदाहरणस्य असङ्गतिप्रसङ्गात्।

१.तै.उ.१.१

यस्यान्नादेर्विकारास्ते तत्प्रशंसापरतया सङ्गतिरस्त्विति चेत्, न। मनोमयश्लोके तदयोगात्। तर्हि तत एवानुपपत्तेरन्नादिशब्दैरन्नमयादय एवोच्यन्त इति कल्प्यत इति चेत्, तर्ह्यत्रापि प्रकरणवशादन्नमयादय एवोच्यन्त इत्यङ्गीकार्यम्। उक्तेऽर्थे हि संवादित्वेनेयमाख्यायिकोक्ता। तस्मादन्नमयादय एवात्रोच्यन्ते। ते च ब्रह्मप्रश्नोत्तरत्वेनोक्तत्वान्यथाऽनुपपत्त्या ब्रह्मैवेति। यद्यपि ''१सैषा भार्गवी वारुणी विद्या। परमे व्योमन् प्रतिष्ठिता'' इति साक्षाद् ब्रह्मविद्यात्वमुच्यते। तथाऽपि मीमांसार्थं युक्त्युपन्यास। अथवाऽस्यापि समानयोगक्षेमत्वादिति।

तर्ह्युपदेशप्रकाराज्ञतया वरुणोऽन्यदुपदिशतीत्यस्तु। मैवम्। लोकपालस्यैतावज्ज्ञानाभावासम्भवादित्याशयेन द्वारोपदेशशङ्कानिराकरणमुपसंहरति तदिति। तत् तस्मात्। यत्किञ्चिद् द्वारम्।

नन्वब्रह्मैव ब्रह्म पृष्टवते वरुणेनोक्तं व्यामोहनायेति किं न स्यादित्यत आह न वदेदिति। किमाक्षेपे। ब्रह्मैव वदेदित्यर्थ। तत्र हेतु मायवी नहीति। आप्तत्वदित्यर्थ। विवक्षितार्थज्ञानं हि वरुणस्य दिक्पते प्रसिद्धम्। अविप्रलम्भकत्वं च पितृत्वात्। भृगोर्ब्रह्मज्ञानयोग्यत्वात्। उपसन्नायेति प्रसङ्गदोषस्य निरस्तत्वात्। वारिराडिति भूताभिमानित्वेनोक्तस्यापटुकरणत्वसम्भवात्। विवक्षायाश्च उपदेशादेव सिद्धे। अत एव श्रुति ''२वरुणं पितरमुपससार'' इत्याह। तदनेनाऽस्नेन ब्रह्मप्रश्नोत्तरत्वेन उक्तत्वम्, अन्नादीनां ब्रह्मत्वे हेतुरित्युक्तं भवति।

ननु वरुणेनोक्तेष्वन्नादिष्वन्नप्राणमनांसि सन्तु ब्रह्मस्वरूपाणि।

१.तै.उ.४,१ २.तै.उ.१.२

अन्नादिशब्दानामत्तृत्वाद्यर्थतया अनुपपत्त्यभावात्। चक्षुश्रोत्रवाक्शब्दं तु कथं ब्रह्म स्यात्? चक्षुरादिशब्दानां चष्टेऽनेनेति चक्षु, श्रुणोत्यनेनेति श्रोत्रम्, वदत्यनयेति वागिति करणार्थत्वात्। ब्रह्मणश्च करणत्वानुपपत्तेरिति चेत्, न। कर्तर्यपि तद्व्युत्पत्तिसम्भवादित्याह चष्ट इति।

चष्ट इत्येव तच्चक्षु श्रवणाच्छ्रोत्रमुच्यते।

वचनादेव वाग् ब्रह्म सृष्टिस्थित्यादिकारणम्

एवशब्देन करणसाधनतां निराकरोति । किञ्च 'यतो वा इमानि भूतानि जायन्ते' इति सकलभूतानां सृष्टिस्थितिसंहारकारणत्वं च ब्रह्मलक्षणमन्नादिषूपदिष्टम्। ततश्चैतद् ब्रह्मेत्याह सृष्टीति। यत सृष्ट्यादिकारणमुक्तम्, अतोऽपि ब्रह्मेति सम्बन्ध।

ननु तथाऽपि नानुवाकद्वयोक्तमेकं वस्तु भवितुमर्हति। सङ्खभेदात्, सञ्ज्ञाभेदाच्च। पूर्वं खल्वन्नमयादय पञ्चोक्ता, न चक्षुश्रोत्रवाच। उत्तरत्र चान्नादय षट् न विज्ञानानन्दाविति। तत्राऽह तच्चेति।

तच्च वाधूलशाखायामष्टरूपमुदाहृतम्।

विज्ञानानन्दसहितं पृथक् सृष्ट्यादिलक्षणै।

आवापोद्वापत शाखा यत आहु परं पदम्

चशब्दो हेत्वर्थ। यस्माद् वाधूलशाखायां विज्ञानानन्दसहितं तदन्नादि-

षट्कमित्यष्टरूपं ब्रह्मतया उदाहृतम्। तस्मात् तदनुसारेण प्रथमानुवाके चक्षुरादित्रयस्य, उत्तरत्र विज्ञानानन्दयोरध्याहारेण सङ्ख्यसङ्ख्यैक्यं भविष्यतीति भाव। हेत्वन्तरसमुच्चये वा चशब्द। अत्रापि ''१विज्ञानं ब्रह्मेति व्यजानात्'', ''आनन्दो ब्रह्मेति व्यजानात्'' इत्युत्तरवाक्यपर्यालोचनयाऽपि ह्यत्र विज्ञाना-नन्दयोरध्याहारो गम्यते। नह्यन्यद् वरुणेनोपदिष्टम्, भृगुस्त्वन्यद् व्यजानादिति युज्यते।

ननु वाधूलशाखोक्तमपि कुतो ब्रह्मेत्यत आह पृथगिति। अनेकशाखा-विदामेवात्र सम्यगधिकारज्ञापनायैतदुक्तम्।

ननु वाधूलशाखायमिवात्रोभयत्राष्टकमेव कस्मान्नोक्तमित्यत आह आवापेति। क्वचिदन्यत्रानुक्तावापेन क्वचिदन्यत्रोक्तोद्वापेन क्वचिदुभयथा, क्वचित् साम्रेण परमेश्वरस्वरूपं प्रतिपादयन्तीति शाखानां स्वभावो यतोऽतो न कश्चिद् विरोध इति।

भृगुवल्युक्त पुनरूपसासारत्वसमर्थनम्

ननु तथाऽपि वरुणोपदिष्टानामन्नादीनां ब्रह्मत्वं नोपपद्यते। ''तद् विज्ञाय पुनरेव वरुणं पितरमुपससार'' इति लब्धोपदेशस्यापि भृगो पुनरुपसरणवचनात्। पूर्वोक्तस्यैव ब्रह्मत्वे ''२अधीहि भगवो ब्रह्म'' इति पुनरुपसरणं व्यर्थं स्यात्। अनेन ज्ञायते न पूर्वोपदिष्टं ब्रह्मेति। यथाहि कश्चित् सुवर्णं याचितवते रजतं

१. तै.उ. ११.२ २. तै.उ.१.३

ददाति सोऽपि गृहीत्वाऽऽलोच्य पुन सुवर्णं देहीति याचते, तेन पार्श्वस्थो जानाति प्राग् दत्तमन्यदेव किञ्चित्, न सुवर्णमिति। तथेहापीत्याशङ्कां परिहरति यत इति।

[१]यतो भूतानि जायन्त इत्याद्यैर्लक्षणै स्वयम्।
लक्षितं गुरुणा पश्चात् तपसैवापरोक्षितम्।।
दृष्ट्वैकैकस्वरूपं तु समस्तोक्तानुदर्शनम्।
इच्छताऽऽज्ञां गुरो प्राप्य तपसैवापरोक्षितम्।।
अब्रह्मेत्येव वदतां श्रुतहान्यश्रुतग्रहौ।
साक्षाल्लक्षणतां प्राप्ताविति लज्जा तदुक्तिषु।।

अयमर्थ न पुनरुपसरणान्यथानुपपत्त्या पूर्वोपदिष्टस्याब्रह्मत्वं कल्प्यम्। पुनरुपसरणस्य अन्यथोपपत्ते। तथाहि वरुणो ह्युद्देशलक्षणाभ्यां भृगवे ब्रह्मोपदिश्योवाच ''न श्रवणमात्रेण कृती भवान्। श्रवणमात्रस्य ब्रह्मसाक्षात्कारा-साधनत्वात्। साक्षात्कारस्यैव मोक्षसाधनत्वात्। अतस्त्वया मननिदिध्यास-नरूपं तप करणीयम्'' इति। स चैवमुपदिष्टाष्टरूपो युगपत् सर्वस्य साक्षात्कर्तुमशक्यत्वान्मनननिदिध्यासनाभ्यामन्नाख्यं भगवद्रूपं साक्षात्कृत्य गुरुप्रसादलब्धमपूर्वतमं धनं तस्मै निवेदयितुम्, प्राणाख्यरूपान्तरसाक्षात्काराय मनननिदिध्यासने चिकीर्षुर्गुरोरनुज्ञामादातुं च पुनर्गुरुमुपससार। एवं

१.अ.नु.११.१२

रूपान्तरेऽपि। तत्रानुजानीहीति वक्तव्ये यत् ''अधीहि भगवो ब्रह्म'' इति वदति तदहङ्कारनिरासार्थमिति।

नन्वस्त्वेवमर्थापत्तिरन्यथोपपत्त्योपक्षीणा। तथाऽपि किं पूर्वस्याब्रह्मत्वात् पुनरुपसरणम्, उत उक्तरीत्याऽनुज्ञार्थमिति सन्दिह्यते। सन्देहे चान्नमयादीनां न ब्रह्मत्वावधारणं सम्भवतीति। मैवम्। ''यतो वा इमानि भूतानि जायन्ते'' इत्यादिलक्षणयोगात् तपसैवापरोक्षिततत्वलिङ्गाच्चोत्तरपक्षावधारणोपपत्ते। नहि देहादाविदं लक्षणं सम्भवतीति। नच तस्य स्वभावसिद्धज्ञानस्य साक्षात्काराय तपोऽपेक्षितम्।

किञ्च पूर्वस्याब्रह्मत्वेन पुनरुपसरणे 'स तपस्तप्त्वा। अन्नमब्रह्मेति व्यजानात्। नान्नाद्ध्येव खलु' इत्यादि ब्रूयात्। एवं ब्रह्मत्वज्ञापकेषु श्रुतेष्वश्रुतमब्रह्मत्वं कल्पयतां श्रुतहानिरश्रुतग्रहापत्तिश्च स्यादित्यलम्, निर्दलपक्षप्रतिक्षेपेऽस्माकमेव लज्जा जायत इति। अक्षरार्थस्तु स्फुट एव।

सूत्राक्षराणामनानुगुण्यं तु भगवता न व्युत्पादितम्। तस्य परेण स्वयमेवाङ्गीकृतत्वात्। यो हि स्वयमेव स्वव्याख्यानस्यास्वारसिकत्वं मन्यते, तं प्रति तद्व्युत्पादनं मृतमारणमिव निराकर्तुरेव लज्जाकरम्। अत एवाऽह इति प्रकारेण तदुक्तिषु विषयभूतासु दूषणाभिधाने अस्माकमेव लज्जेति।

यच्च ''भेदव्यपदेशाच्च'' इति सूत्रं व्याख्यायोक्तं परेण मिथ्याभूतं जीवात्मपरमात्मभेदमाश्रित्य ''भेदव्यपदेशाच्च'' इत्युक्तमिति, तदनुपपन्नमिति भावेनाऽह समीप इति।

१.तै.उ.२१.८

समीपे सहभोगस्य मुक्तित्वेनोक्तितोऽसकृत्।

भेदो जीवेशयोर्मिथ्येत्येव मिथ्या स्वयं भवेत्।।

''[1]एतमानन्दमयमात्मानमुपसङ्क्रम्य'' इत्यादौ परमेश्वरस्य समीपे ''सोऽश्नुते'' इत्यादौ तेन सह। नहि सामीप्यं साहित्यं च भेदेन विना नोपपद्यते। नच मोक्षेऽपि शिष्यमाणं मिथ्या भवितुं युक्तम्। आत्मस्वरूपस्यापि मिथ्यात्वप्रसङ्गात्।

अथवा भेदव्यपदेशादित्युक्ते मिथ्याभेदोऽयं किं न स्यादित्याकाङ्क्षा-निरासार्थत्वेन ''अस्मिन्नस्य च तद्योगं शास्ति'' इति सूत्रं प्रकरान्तरेण व्याख्याति।

एवं पञ्चकोशवादिनां मायावादिनां व्याख्यां निराकृत्य ये तु भास्करादयो यथाश्रुतसूत्रानुसारिण अन्नमयादयश्चत्वार कोशा आनन्दमयस्त्वेक एव परमात्मेति व्याचक्षते, तन्मतमतिदेशेन निराकरोति एतेनेति।

एतेन मयटश्चैव द्वैविध्येनार्थकल्पनात्।

तदन्येषां मतमपि सत्संसत्सु न भासते ।।

एतेनैवान्नमयादीनां पञ्चानामपि ब्रह्मत्वोपपादनेन तदन्येषां पञ्चकोशत्व-वादिभ्योऽन्येषां चतुष्कोशवादिनां। सत्संसत्सु विद्वत्सभासु। अधिकं चात्र दोषमाह मयटो द्वैविध्येनार्थकल्पनाच्चेति। अन्नमयादिषु विकारार्थत्वम्, आनन्दमये प्राचुर्यार्थत्वमिति। यदत्र नियामकमुक्तं तत् प्रागेव निराकृतमिति। ननु प्राणमय एव विकारप्रक्रमो भग्न। तर्हि तत्र प्रत्ययस्य स्वातर्हिकत्वकल्पनादधिको दोष स्यादिति।

अतः साधकसद्भावात् द्वैतमतानुसारेण आनन्दमयः ब्रह्मः न जीवः इति प्रतिपादितम् भवति।

।। विशिष्टाद्वैतमतोक्ताक्षेपपरिहारः ।।

द्वैतिनः– अन्नमयादीनां ब्रह्मत्वसाधने अभ्यासात् इति सूत्रोक्तहेतोः ब्रह्मशब्दाभ्यासात् इति व्याख्यातम् । तत्र मुख्याभ्यासः विज्ञानमयानन्दमययोः वर्तते । असकृदुक्तिरूपामुख्याभ्यासः अन्नमयादिषु त्रिषु वर्तते । अन्नमयादिषु ब्रह्मशब्दश्रवणरूपहेतुरेव विवक्षितः ।

विशिष्टाद्वैतिनः– एवं चेत् अव्यभिचारात् ब्रह्मशब्दमेव सूत्रकारः हेतुं ब्रूयात् । श्रवणमात्रं अभ्यासशब्दार्थः न भवति । अतः भवदीयं व्याख्यानं सूत्राक्षराननुगुणं वर्तते । एकविषयासकृदुक्तेरेव मुख्याभ्यासात् ।

द्वैतिनः– अन्नमयादेस्तु ब्रह्मत्वे ब्रह्मशब्द एव हेतूकृतः न तु ब्रह्मशब्दाभ्यासः इति भागासिद्धेरप्यभावाच्च । आनन्दमयविज्ञानमययोस्तु ब्रह्मशब्दसत्वेऽपि अभ्यासोऽप्यस्तीति स सूत्रितः । 'अन्नमयादौ अभ्यास-शब्दोपलक्षितब्रह्मशब्दस्यैव त्वत्पक्षे हेतुत्वेन नासावभ्यासशब्दार्थः' इत्युक्तिः न सम्भवति । एवं वयं न वदामः ।

किञ्च अनुवाकद्वयविवक्षायां अन्नमयादीनामपि ब्रह्मत्वविषये मुख्याभ्यासः एव अस्तीति व्यभिचारः न सम्भवति । तथा अभ्यासादिति ब्रह्मशब्दाभ्यासादिति हेतुना एव अन्नमयादीनामपि ब्रह्मत्वं सिद्ध्यति ।

द्वैतिनः– सुधायां 'येऽन्नं ब्रह्मेत्यादिरूपादभ्यासात् तैत्तिरीयके' इत्यनु-व्याख्यानानुसारेण एकविषयासकृदुक्तिरूपमुख्याभ्यासाभावेऽपि असकृदुक्ति-मात्रमस्ति । तथा च अन्नमयादिविषयकत्वेन ब्रह्मशब्दस्य श्रुतत्वात् इत्यभिप्रायः अभ्यासशब्दः । इत्युक्तम् ।

विशिष्टाद्वैतिनः– सुधाग्रन्थोऽपि परीक्षकव्यवहारविरोधात् अयुक्तः । कुतः इति चेत् ? परीक्षकाः केवलश्रुतत्वाभिप्रायेण अभ्यासशब्दं न प्रयुङ्क्ते । अमुख्याभ्याससत्वे अभ्यासपदप्रयोगं न कुर्वन्ति ।

द्वैतिनः– युष्माभिरपि अमुख्याभ्यास एव हेतुकृतः वर्तते । युष्माभिरपि मुख्याभ्यासः वक्तुं न शक्यते । तथाहि– मानुषाद्यानन्दपरानन्दपदे असकृदुक्ति-मात्रेण अभ्यासपदस्य युष्माभिः अङ्गीकृतत्वात् । पुनः तत्खण्डने स्वव्याघाताच्च । अभ्यासपदप्रयोगस्य तु विज्ञानानन्दमययोः ब्रह्मशब्दस्य पञ्चस्वपि आत्मपदस्य मुख्योऽप्यभ्यासोऽस्तीति सूचकतया साफल्याच्च ।

यद्वा ब्रह्मशब्दवत् 'अन्योन्तर आत्मा' 'एतमन्नमयमात्मानमुपसङ्क्रामति' 'एतमन्नमयमात्मानमुपसङ्क्रम्य' इत्यादौ ब्रह्मशब्दसमानार्थात्मशब्दसद्भावाद् अभ्यासः । भाष्ये तु ब्रह्मशब्दपदेन ब्रह्मवाचकः शब्दः विवक्षितः । अत एव परमात्मेत्यात्मशब्दोपेतस्मृत्युपादानम् । '[1]ब्रह्मेति परमात्मेति भगवानिति शब्द्यते' '[2]वासुदेवात्मकं ब्रह्म मूलमन्त्रेण वा यतिः ।' इत्यादिषु तस्मिन्नेव प्रसिद्धब्रह्मशब्दाभ्यासात् - उत्तरानुवाके अन्नमयादौ ब्रह्मशब्दाभ्यासस्तु विद्यते एव ।

१.भा.ग.१.२.११ २. ब्रा.सू.१.१.१२

विशिष्टाद्वैतिनः– मुख्याभ्यासाभावादेव आत्मशब्दसाहित्येन ब्रह्मशब्दश्रुतिरभ्यासः इति कल्पनमपि न युक्तम् ।

द्वैतिनः– परस्परनैरपेक्ष्येणाभ्यासस्योपपादनात् । एकविषयग्रन्थान्तर-मालोचयितरि अभ्यस्यतीति प्रयोगाच्च । 'जहिहि जहीहि जहाहि रामभार्याम्' इत्यादौ एकप्रकारत्वाभावेपि अभ्यासत्वदर्शनाच्च ।

विशिष्टाद्वैतिनः– यदि अन्नमयादयः न ब्रह्म तर्हि किमर्थं तेषां उपनिषदि ब्रह्मत्वनिर्देशः क्रियते इति चेत् ब्रह्मदृष्टिविधानार्थमित्युक्तं मा विस्मार्षीः ।

द्वैतिनः– असदुपासनाया बहुधा अनर्थकारित्वेन निराकृतत्वात् न कर्तव्य एव । अतः मुख्यब्रह्मत्वविवक्षया एव निर्देश इति वक्तव्यम् । तथाहि अनुव्याख्यानोदाहृतप्रमाणानि–

[१]योन्यथा सन्तमात्मेशमन्यथा प्रतिपद्यते ।
किं तेन न कृतं पापं चोरेणात्मापहारिणा ।।
योऽन्यद्विष्णुरिति ध्यायेज्जानीयाद्वा हरिं तथा ।
अन्धे तमसि मज्जेत् स यत्र नैवोत्थितिः क्वचित् ।।
यत्किञ्चिदन्यथासंस्थमन्यथाध्यातमञ्जसा ।
महादोषकरं विष्णुः किमु सर्वेश्वरेश्वरः ।।

१. अ.नु.४.१

द्वैतिनः– 'तपो ब्रह्मे'त्यसकृच्छ्रवणात् तपस्यपि ब्रह्माभ्यासोऽस्ति । तथापि पूर्वत्र 'तपसा ब्रह्म विजिज्ञासस्वेति उत्तरत्र 'स तपस्तप्त्वा । अन्नं ब्रह्मेति व्यजानात्' इति चाभ्यासात् तपसि ब्रह्मशब्दो न मुख्य इति न तपसो ब्रह्मता ।

विशिष्टाद्वैतिनः– तपस्यभ्यासोऽस्ति । तन्मुख्यत्वमस्ति । ब्रह्मशब्दस्त्वमुख्यः । तन्मुख्यत्वमपि विवक्षितमिति चेत् । न हि तद्वाचकं तत्सूचकं वा किञ्चिदस्ति पदम् । अभ्यासग्रहणवैयर्थ्यं च तदवस्थम् ।

द्वैतिनः– यत्परत्वं साध्यं तत्र मुख्यत्वेन निर्णीतस्य प्रकृतेऽन्यत्रा-मुख्यत्वादिना अनिर्णीतस्य शब्दस्यासकृदुक्तेरेवाभ्यासपदमुख्यार्थतया तपसि तादृशाभ्यासाभावात् । अभ्यासपदार्थपर्यालोचनयैव अभ्यस्यमानशब्दस्य तात्पर्यविषयमुख्यतायाः अन्यत्रामुख्यत्वेनानिर्णीतत्वस्य च लाभेन तन्मुख्यत्ववाचकसूचकपदाभावोक्तेरयुक्तत्वाच्च । असकृदावृत्तिलाभायैव अभ्यासग्रहणसार्थक्याच्च । अन्यथा शब्दादित्युक्ते तद्वाचकशब्दमात्रलाभेन तदसकृदुक्तेरलाभात् । ब्रह्मशब्दस्य तत्र मुख्यत्वेन निर्णयेऽपि तत्समभि-व्याहृतान्नमयादेब्रह्मतायाः साध्यत्वेन इतरेतराश्रयाभावाच्च । अन्यथा शब्दस्यापि शब्दत्वेनैव निर्णायकत्वे गङ्गायां घोष इत्यादौ तीरबोधकशब्दत्वेन गङ्गायां मत्स्य इत्यादावपि तीरपरत्वप्रापकत्वापत्त्या तात्पर्यविषयमुख्यत्वेन निर्णीतत्वस्यावश्यकत्वे 'गङ्गायां घोषः' इत्यत्रापि नदीपरत्वप्रापकत्वस्य

'कदाचनस्तरीरसि' इति मन्त्रे इन्द्रपदस्यापि पुरन्दरप्रापकत्वस्य चापत्त्याऽमुख्यवृत्त्या अन्यपरत्वेनानिर्णीतत्वस्यापि आवश्यकत्वेन आभाससमानयोगक्षेमतया शब्दस्यापि निर्णायकतानापत्तेश्च । तथा च साधु समर्थिता मीमांसेति यत्किञ्चिदेतत् । प्रकृते तपसि ब्रह्मशब्दस्य पूर्वोत्तरविरुद्धाभ्यासबलादमुख्यत्वेन निर्णयान्नाभ्यासोऽस्तीति न व्यभिचारः ।

विशिष्टाद्वैतिनः– यदि अन्नमयादीनां ब्रह्मत्वमुच्यते । तर्हि अन्योन्याश्रयः स्यात् । सिद्धे पञ्चानां ब्रह्मत्वे अन्नादौ ब्रह्मशब्दमुख्यतासिद्धिः, अन्नादौ ब्रह्मशब्दमुख्यतासिद्धौ पञ्चानां अन्नादीनां ब्रह्मतासिद्धिः इति ।

द्वैतिनः– ब्रह्मशब्दस्य विष्णौ मुख्यत्वेन निर्णयेपि तत्समभिव्याहृतान्नमयादेः ब्रह्मतायाः साध्यत्वेन इतरेतराश्रयाभावाच्च । अन्यथा शब्दस्यापि शब्दत्वेनैव निर्णायकत्वे गङ्गायां घोषः इत्यादौ तीरबोधकशब्दत्वेन गङ्गायां मत्स्य इत्यादावपि तीरपरत्वप्रापकत्वापत्या तात्पर्यविषयमुख्यत्वेन निर्णीतत्वस्यावश्यकत्वे 'गङ्गायां घोषः' इत्यत्रापि नदीपरत्वप्रापकत्वस्य 'कदाचनस्तरीरसि' इति मन्त्रे इन्द्रपदस्यापि पुरन्दरप्रापकत्वस्य चापत्त्या अमुख्यवृत्त्या अन्यपरत्वेनानिर्णीतत्वस्यापि आवश्यकत्वेन आभाससमानयोगक्षेमतया शब्दस्यापि निर्णायकतानापत्तेः । तथा च साधु समर्थिता मीमांसेति यत्किञ्चिदेतत् ।

अन्नमयादीनां ब्रह्मत्वे मार्ताण्डोक्तसाधकाभाव-बाधकभावनिरासः

विशिष्टाद्वैतिनः– अन्नमयादीनां ब्रह्मत्वे नास्ति साधकम् । बाधकं चास्ति

। अन्नमयस्य तावत् 'अन्नात् पुरुषः' इत्यन्नजन्यत्वमवगम्यते। मयटा च विकारित्वम् । नच तदुभयं ब्रह्मणि सम्भवति । अजन्यत्वादविकारित्वाच्च तस्य । 'एष' इति अन्नमयस्य 'इदमेव शिरः' इत्यादिना शिरआदेश्च प्रत्यक्षनिर्देशो ब्रह्मत्वे बाधक इति ।

द्वैतिनः– 'अन्नात् पुरुषः' इत्यत्र पुरुषपदोक्तस्य भगवत अन्नपदोक्तभगवतः सकाशात् प्रादुर्भावरूपजन्यत्वस्य सम्भवात् । 'अजायमानो बहुधा विजायते' इति श्रुतेः,

[१]य एष भगवान् विष्णुर्भूतस्रष्टा गुणाधिकः।
स एवान्नात्पुनर्जातो ह्यजातोऽपि यतो विभुः।
अन्नात्मनि शरीरेऽसौ व्यज्यते सुविवेकिभिः ।
अन्नस्य सारभूतोऽयं शरीरस्य च केशवः ।
अन्ननामा चान्नसंस्थः शरीरेषु च संस्थितः।
अत्तृत्वात् सर्वलोकानामन्नमित्युच्यते हरिः ।।
उपजीव्यश्च भूतानामिति चान्नं जनार्दनः ।।

इति तैत्तिरीयभाष्योदाहृतप्रमाणे जायमानस्यापि जनेः, अन्नशब्दस्य सर्वलोकात्तृत्वसर्वभूतोपजीव्यत्वप्रवृत्तिनिमित्तकत्वस्य चोक्तेः, 'अद्यतेऽत्ति च

१.तै.उ.भ.१.१.१४

भूतानि तस्मादन्नं तदुच्यते' इत्यत्तृत्वादिप्रवृत्तिनिमित्तकतया अन्नशब्दस्य व्याख्यानाच्च ।

विशिष्टाद्वैतिनः– अन्नशब्दार्थत्वं 'अद्यते' इत्युक्तमद्यमानत्वं च बाधकमिति ।

द्वैतिनः– उक्तप्रमाणादिबलेन अन्नशब्दस्य ब्रह्मणि यौगिकत्वात् । व्याख्यानरूपप्रमाणबलेन गुणलाभेन सत्यशब्दविवरणलाभेन च योगस्यैव स्वीकार्यत्वाच्च । प्रत्युत अब्रह्मत्वे एव 'अद्यतेऽत्ति च' इति श्रौतयोगार्थानुपपत्तिः । सर्वभूतोपजीव्यत्वस्य सर्वलोकात्तृत्वस्य प्रसिद्धान्नेऽनुपपत्तेः ।

विशिष्टाद्वैतिनः– 'अन्नं मृत्युं तमु जीवातुमाहुः' इत्यादिना प्रसिद्धान्ने अत्तृत्वोपपादनम् ।

द्वैतिनः– तदपि न । तद्वाक्यस्यापि भगवत्परत्वात् । 'अन्नं ब्रह्माणोऽजरसं वदन्ति' इत्यजरत्वोक्तेः । तस्मान्न जन्यत्वं बाधकम् । नापि विकारित्वम् । सूत्रकृतैव प्राचुर्यार्थकताया उक्तेः । उक्तरीत्या अन्नशब्दार्थोपजीव्यत्वादि-गुणप्राचुर्योपपत्तेः । नापि प्रत्यक्षनिर्देशो बाधकः । प्रत्यक्षसन्निहितत्वेन वस्त्रप्रावृतजान्वादौ प्रत्यक्षनिर्देशवदुपपत्तेः ।

विशिष्टाद्वैतिनः– नेदं युक्तम् । कदाप्यप्रत्यक्षे प्रावृतेऽपि तथा व्यपदेशस्य क्वाप्यदर्शनात् । तत्सन्निधानस्य प्रागनवगमाच्च ।

द्वैतिनः– तन्न । सन्निधानञ्च–

देहस्यैव शिरस्थस्य शिरो विष्णोः प्रतिष्ठितम् ।

बाह्वोः पक्षौ तथा मध्ये मध्यं पश्चात्तनौ तथा ।।

पुच्छमित्येष भगवान् अनिरुद्धः स्वयं हरिः।।

इत्यादिप्रमाणेनावगतम् । तस्मान्न किमपि बाधकम् ।।

अन्नमयादीनां अब्रह्मत्वे बाधकनिरूपणम्

प्रत्युत अब्रह्मत्वे चेतने मुख्यं पुरुषपदं बाधकम् । 'तस्य पुरुषविधतां अन्वयं पुरुषविधः' इत्यादिना प्राणमयपुरुषस्य अन्नमयपुरुषसादृश्योक्तावपि पुरुषत्वं नारोपितम् । प्राकृतान्नमयत्वप्रतीतिवारणाय अन्नशब्दार्थेषु मुख्यार्थात्तृत्वादिलक्षणब्रह्मत्वे असत्यशब्दार्थगुणप्राचुर्यलाभाय च प्रयुज्यमानं सारापरपर्यायं रसपदमपि बाधकम् । 'अद्यतेऽत्ति च भूतानि' इति अन्नशब्दनिर्वचनं च बाधकमित्युक्तम् । प्रत्यक्षनिर्देशोऽपि शरीरशिरःप्रभृतेः प्रत्यक्षसिद्धत्वेनोपदेशानपेक्षणात् व्यर्थः सन् बाधकः । तस्मादन्नमयस्य ब्रह्मत्वे बाधकं नास्ति ।

प्राणमयस्य ब्रह्मत्वे परोक्तबाधकनिरासः

विशिष्टाद्वैतिनः– प्राणमयस्य प्राणे तस्मिन् प्राणप्राचुर्याभावः, 'प्राणो हि भूतानामायुः' इति वाक्यशेषविरोधश्च बाधक इति ।

द्वैतिनः– तन्न ।

'तस्यान्तरं परं रूपं अभिन्नमपि भिन्नवत् ।

प्रद्युम्नाख्यं प्राणमयं प्रणेतृत्वात् प्रकीर्तितम् ।

शिरस्तस्य ।।

इत्यादिना प्रणेतृत्वादिप्राचुर्यस्यैव प्राणमयशब्दार्थतया भौतिकप्राणविधुरेऽपि परमात्मन्युपपत्तेः । 'स एव जगतामायुः' इत्यादिना प्रमाणेन तस्यैव सर्वभूतानामायुष्ट्वोक्त्या वाक्यशेषविरोधाभावाच्च । मनोमये तु 'आनन्दं ब्रह्मणो विद्वान्' इत्यादिकं तु न ब्रह्मत्वे बाधकम् । '१यज्ञभृद्यज्ञकृद् यज्ञी' इत्यादिना परमात्मन्युपपत्तेः । तस्मात् पञ्चानां ब्रह्मत्वे न किञ्चिद्बाधकम् ।

अन्नमयादिपञ्चानां ब्रह्मत्वे चन्द्रिकोक्तसाधककारिकानुवादः

अन्नमयादिपञ्चानां ब्रह्मत्वे चन्द्रिकायां साधकानि च सङ्गृहीतानि ।

२ब्रह्मशब्दात्समस्तात्तृत्वादिलिङ्गाच्च वाक्यतः ।

पूर्वोत्तरस्मान्मन्त्रस्थब्रह्मप्रकरणादपि ।।

भृगुवल्लीसमाख्यानात् मुक्तगीतावसानकात् ।

स्थानप्रमाणतश्चैव पञ्चानां ब्रह्मता स्थिता ।

इत्यनेन कारिकया । विवृता चैषा बहुधा चन्द्रिकाप्रकाशे ।।

---

१. ता.च. १.१.१२

२. ता.च.१.१.१२

चन्द्रिकोक्तसाधकानामुपरि मार्ताण्डोक्तदूषणाना मयुक्तत्व-व्युत्पादनम्

विशिष्टाद्वैतिनः— ब्रह्मश्रुत्याद्यन्यथासिद्धेरुपपादितत्वात् ।

एकात्मत्वान्यतोक्तिभ्यां अब्रह्मत्वेऽवधारिते।

पञ्चानां ब्रह्मताऽश्रित्य पञ्चत्वमुपपद्यते ।।

अनन्योऽप्यन्यशब्देन श्रुत्या यद्यभिधित्सितः ।

सूत्रकृद्भगवान् भेदव्यपदेशं कथं वदेत् ।।

यद्यभेदेऽपि भेदोक्तिः श्रुत्या सत्यापिता भवेत् ।

जीवेशयोरभेदेऽपि भेदं वेदो न किं वदेत् ।। इति ।

द्वैतिनः— तन्न । एतत्सङ्गृहीतसाधकानां मध्ये केषाञ्चिदनाशङ्कितत्वात् । केषाञ्चिदन्यथासिद्धयुक्तेरस्माभिः असद्धर्मप्रकाशे । अत्र च पूर्वमुपपादितत्वात् । तपसीव ब्रह्मशब्दस्य बाधकाभावेन गौणताया असदुपासनायाश्च निषिद्धत्वेन कोशानां द्वारत्वस्य च खण्डितत्वेन चोपासनार्थतायाश्च अयोगात् । नच एकात्मत्वोक्तिर्बाधिका । असिद्धेः । अन्यथा आनन्दमयेऽपि 'तस्यैष एव शारीर आत्मे'त्यस्य श्रवणेन अन्यात्मकत्वप्राप्त्या ब्रह्मतानापत्तेः । 'तस्यैष' इत्यादौ विभक्तिव्यत्ययाद्यापत्तेश्च । प्रपञ्चितमेतत् असद्धर्मप्रकाशे । 'अन्योऽन्तर' इत्यन्यत्वावान्तरत्वाद्युक्तिस्तु अधिष्ठानभूतकोशानामन्यत्वान्तरत्वात्, भगवतो

बहुरूपत्वात्, विशेषसद्भावात्, 'अनन्योऽप्यन्यशब्देन' इत्यादिभाष्योदाहृत-स्मृतिबलाच्च युक्ता । श्रीविष्णुपुराणे–

१क्षीरोदमध्ये भगवान् कूर्मरूपी स्वयं हरिः ।

मन्थनादेरधिष्ठानं भ्रमतोऽभून्महामुने ।।

रूपेणान्येन देवानां मध्ये चक्रगदाधरः ।

चकर्ष नागराजानं दैत्यमध्ये परेण च ।।

उपर्याक्रान्तवान् शैलम् ... ।।

इत्यादौ भगवद्रूपेष्वभेदेऽपि अन्यापरादिपदप्रयोगदर्शनाच्च । तत्र रूपाभिप्रायकत्वेऽत्राप्यनिरुद्धादिरूपाभिप्रायकत्वस्य

'पुच्छमित्येष भगवाननिरुद्धः स्वयं हरिः ।

तस्यान्तरं परं रूपमभिन्नमपि भिन्नवत् ।।

प्रद्युम्नाख्यं प्राणमयं प्रणेतृत्वात्प्रकीर्तितम् ।।'

इत्यादिना प्रमाणेन स्पष्टत्वात् । एवं बाधकवशादन्यशब्दस्यात्र गौणत्वे 'तयोरन्यः' इत्यादावपि गौणत्वापत्त्या जीवेशयोर्भेदो न सिद्ध्येदित्यभिप्रायेण 'यद्यभेदेऽपि भेदोक्तिरि'ति पद्यरचनं व्यथामात्रमूलम् । अन्यथा–

यदि भेदेऽप्यभेदोक्तिः प्रस्तरादेः श्रुतौ भवेत् ।

सत्यं ज्ञानमनन्तं च ब्रह्मेत्यादौ तथा भवेत् ।।

१.वि.पु.

इत्यपि स्यात् । स्थानस्य ब्रह्मपरता तु–

शन्नो मित्रादिभिर्वाक्यैस्तैरेव हरिमस्तुवत् ।

मुक्तगीतावसानैस्तु स्तुतस्तेन जनार्दनः ।।

इति भाष्योदाहृतयजुःसंहितासिद्धवचनात् सिद्धाः । भृगुवल्याः ब्रह्मपरता तु–

ब्रह्मप्रश्नोत्तराद् ब्रह्मलक्षणाद् ब्रह्मशब्दतः ।

विज्ञातत्वाच्च तपसा मुक्तगम्यत्वतस्तथा ।।

वाधूलीयसमाख्यानादनुव्याख्यानिरूपितात् ।

भृगुवल्यादितस्यान्नप्राणादेब्रह्मता स्थिता ।।

इति चन्द्रिकायामेव समर्थिता ।

भृगुवल्याः ब्रह्मपरत्वे मार्ताण्डोक्तदूषणविमर्शः

विशिष्टाद्वैतिनः– अत्र यदुक्तम्---

आत्मप्रश्नोत्तरत्वेऽपि यथा नामाद्यनात्मता ।

अनात्मन्यप्यहङ्कारे सार्वात्म्यं तद्गतं यथा ।।

तपस्य ब्रह्मणि ब्रह्मशब्दः प्रकरणे यथा।

तपोज्ञेयत्वमुक्ताप्योः तद्गुणेषु स्थितिर्यथा ।।

एवं चतुर्षु कोशेषु व्यपदेशोऽपि दृश्यताम् ।

बुध्यारोहाय तत्सर्वं अन्यथासिद्धिबाधितम् ।।

न ब्रह्मताऽवगतये स्यात्समर्थमितीरितम् ।

वाधूलीयसमाख्या च तत एवोपपद्यते ।। इति ।

द्वैतिनः– तन्न युक्तम् । 'नाम ब्रह्मेत्युपासीत' इत्यादौ नामेत्यादेः सप्तम्यन्ततया तत्र ब्रह्मोपासनपरत्वेन अनात्मविषयत्वाभावात् ।

'नामादिप्राणपर्यन्तमुभयोः प्रथमात्वतः ।

ऐक्यदृष्टिरिति भ्रान्तिरबुधानां भविष्यति ।

नामादिस्थितिरेवात्र ब्रह्मणो हि विधीयते।

सर्वार्थाग्रन्थमप्यस्मात्सप्तम्यर्था ततो मता '। इति ब्रह्मतर्कवचनात् ।

अहङ्कारस्यापि 'सैव हि सत्यादय' इत्युक्तरीत्या ब्रह्मरूपतया अब्रह्मणि सार्वात्म्यरूपब्रह्मलक्षणोक्तेरभावाच्च । अन्यथा लक्षणोक्तेप्रामाण्यस्य सार्वात्म्यस्यालक्षणतायाश्च प्राप्तेः । अमुख्यत्वेन अनिर्णीतश्रुतेरेव मुख्यार्थपरत्वसाधकतया तपसि ब्रह्मशब्दस्य उक्तरीत्या अमुख्यत्वेन निर्णीततया व्यभिचाराभावाच्च । अन्यथा शब्दमात्रस्य साधकतापत्तेः । ब्रह्मनिधिध्यासन-जन्यापरोक्षज्ञानविषयत्वस्य तपोज्ञेयत्वस्य आत्मगुणेऽभावाच्च । मुक्तप्राप्यत्वस्यापि मुक्तोपसृप्यत्वरूपतया आत्मगुणेऽभावाच्च । अन्यथा मुक्तानां परमागतित्वस्यापि ब्रह्मधर्मत्वानापत्तिः । पृथक् सृष्ट्यादिलक्षणस्याष्टरूपस्य ब्रह्मणः वाधूलीयशाखायामुक्तत्वेन अत्रत्यानामब्रह्मत्वे तद्विरोधस्य दुर्निरसत्वाच्च

। असदुपासनादेर्निषिद्धतया कोशेषु ब्रह्मदृष्ट्यादेरयोगात्। 'सैषा भार्गवी' त्यनेनास्याः विशिष्टायाः विद्याया एव ब्रह्मनिष्ठस्योक्तेश्च 'उसत्यन्तर-स्याधीही'त्युक्तेश्च गुणान्तरविशिष्टब्रह्मरूपध्यानानुज्ञार्थं विनयोक्तिरूपत्वेना-ब्रह्मत्वानापादकत्वात् । वल्लीद्वयोक्तानां पञ्चानामपि उक्तसाधकैर्ब्रह्मत्वसम्भवे आनन्दमयस्यैव ब्रह्मत्वमिति सङ्कोचस्य अयुक्तत्वाच्च । 'स यश्चायं पुरुषे । यश्चासावादित्ये । स एक' इति एकत्वोक्तिरपि पञ्चरूपस्य नारायणस्यैकत्वान्न रूपाणां पञ्चत्वं निरुणद्धि। 'जीवान्यत्परमं ब्रह्म पञ्चरूपं तु ये विदुः । सन्तस्त इति विज्ञेया मोक्षयोग्या हि ते ध्रुवम्' इत्यादिप्रमाणेनैव पञ्चरूपपरत्व-स्यावश्यकत्वाच्च ।

विशिष्टाद्वैतिनः–

ब्रह्मदृष्ट्यभिधानेन साफल्यं प्रागुदीरितम् ।
परमव्योमनिष्ठैषा विद्या श्रुत्यैव दर्शिता ।।
उपसत्त्यन्तराद्ब्रह्मविज्ञानोक्त्या पुनः पुनः ।
भृगुवल्यपि पूर्वेषामब्रह्मत्वं व्यनक्ति यत् ।।
श्रोतृश्रोतव्यनामभ्यां वल्लीद्वयमुदाहृतम् ।
आनन्दमयविश्रान्तं तेनास्य ब्रह्मता मता ।।
पुरुषादित्ययोरेकः स यश्चायमितीरिता।
सङ्ख्या रुणद्धि प्रत्यक्षा पञ्चानां ब्रह्मतामतिम् ।।

द्वे वाव ब्रह्मणो रूपे मूर्तं चामूर्तमेव च।

इतिवद्रूपताऽनुक्तेर्नोचिता रूपभिन्नता ।।

द्वैतिनः– 'अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमया मे शुद्ध्यन्ताम्' इति शुद्धिप्रार्थनवाक्ये तु ब्रह्मशब्दाभावात् । तल्लक्षणाभावात् ज्ञानिनः तत्प्राप्तिकथनाभावात् रसशब्देन विशेषणाभावेन 'अथैष ज्योतिरथैष विश्वज्योतिरथैष सर्वज्योतिः' इत्यादाविव सञ्ज्ञाभेदात् 'कुण्डपायिनामयने मासमग्निहोत्रं जुहोति' इत्यादाविव प्रकरणभेदात् शुद्धिप्रार्थनलिङ्गाच्च अन्नमयादयो न ब्रह्म । किन्तु कोशाः । अत्र तु कोशान्तर्गतभगवन्मूर्तिविशेषाः ।

विशिष्टाद्वैतिनः– शुद्धिवाक्ये तु पञ्चानां कोशत्वं ब्रह्मताऽत्र तु । इति वैरुप्यमुक्तं यत् तन्न युक्तं यतो द्वयम् । एकप्रकरणाधीतं प्रत्यभिज्ञातमेकधा। आत्मशब्दा-द्यभावेन यदि वैरूप्यमिष्यते । आकाशाद्वायुरित्यादौ कुतस्तत्परतेष्यते । मनःकालुष्यराहित्यं शोध्यत्वं न विरुद्ध्यते । ब्रह्मण्यपि ततस्तत्र ब्रह्मोक्तिरुपपद्यत इति ।।

द्वैतिनः– तन्न । उपनिषदः पञ्चमप्रपाठके 'पृथिव्यापस्तेजोवायुराकाशा मे शुद्ध्यन्तामि'त्यादिबहुप्रार्थनावाक्यानन्तरं एतद्वाक्यस्य श्रवणेनैकप्रकरणाधी-तत्वोक्तेरुपनिषदनध्ययनमूलत्वात् । प्रकरणान्तरत्वेनोक्तवैरूप्येण च प्रत्यभिज्ञानस्याभावाच्च । आत्मशब्दाद्यभावेऽपि 'आकाशे तिष्ठन्नि'त्यादिना यथाव्यपदिष्टत्वस्य 'आकाशाद्वायुरि'त्यादावुक्तेरिति 'कारणत्वेने ति

सूत्रकृतैवोक्तत्वात् । '१स वा एष पुरुषोऽन्नरसमय' इति तच्छब्देन 'आत्मन आकाश' इत्यारभ्य 'अन्नात्पुरुष इति पर्यन्तं प्रकृतत्वसूचनाच्च । ब्रह्मप्रकरणमध्यपतितत्वाच्च 'आकाशाद्वायुरित्यादेर्ब्रह्मपरतोपपत्तेश्च । 'पृथिव्याप' इत्याद्यारभ्य जीवसम्बन्धिनामेव शुद्धिप्रार्थनेन ब्रह्मरूपाणामत्र मनःकालुष्यराहित्यरूपशोध्यत्वोत्त्ययोगाच्च । तस्य नित्यसिद्धत्वेन प्रार्थनायोगाच्चेति ।

पञ्चानां न ब्रह्मता, किन्तु आनन्दमयस्यैव पक्षीकारेण तस्यैव इति रामानुजमतानुवादः

विशिष्टाद्वैतिनः– किञ्च न पञ्चानां ब्रह्मता सूत्रकृदिष्टा । आनन्दमयमात्रपक्षीकारविरोधात् । उपलक्षणं स इति चेत्, प्रथमातिक्रमे कारणाभावात् तेनैव किमन्यन्नोपलक्ष्यते । जिज्ञासाक्षेपकपूर्वपक्षहेतोरवयवत्वस्य तत्रैव सद्भावात् स एवोपलक्षणमित्यभिसन्धिरिति चेत्, कुतस्तर्हि अन्येषामपि पूर्वपक्षविषयता । तेषामब्रह्मत्वेऽपि जिज्ञासानाक्षेपात् । गतिसामान्याक्षेपेण तदभिधानमिति चेत् । तर्हि तदेव सर्वत्राक्षेपकमस्तु । किमव्यापकेनावयवत्त्वेन । किञ्च अस्त्ववयवता, तथापि कुतो न जिज्ञास्यता ? । अब्रह्मत्वादपूर्णत्वाद्वा । नाद्यः । तस्मिन्नपि ब्रह्मशब्दश्रवणात् । तदाच्छादनेन पूर्वपक्ष इति चेत् । अनाच्छादनेनैव तत्सम्भवात् । अत एव न द्वितीयः । पूर्णत्ववाचिनि ब्रह्मशब्दे सत्यपूर्णताया एव अप्रतिपत्तेः । अवयवत्वादपूर्णत्वमवगम्यत इति चेत् । २श्रुतिविरोधेऽनुमानाप्रवृत्तेः विरोधनयसिद्धत्वात् । अन्यथा सिद्धान्तोऽपि न

१. तै.उ.४.१ २. शा.दी. १.३.२

सिद्ध्येत् । तथापि पुच्छश्रुत्या अवयवत्वावगमानपायात् स्वावयवत्वं नापूर्णतागमकमिति चेत् । पूर्णावयवस्य पूर्णत्वानियमात् । परिधिशब्दश्रवणात् परिधित्वापरित्यागेन परिधः पशुनियोजनाङ्गत्ववत् ब्रह्मश्रुत्या तदवगतपूर्णत्वा-परित्यागेनैव अवयवत्वं कल्प्यत इति चेत् । पूर्वपक्षस्तर्हि नोत्तिष्ठेत्, जिज्ञासानाक्षेपात् ।

ननु कारणत्वाद्ब्रह्म जिज्ञास्यमित्युक्तम् । कारणं च आनन्दमयः । 'सोऽकामयत' इति तस्मिन् कारणत्वश्रवणात् । तत्पुच्छं तु ब्रह्म । अतो न ब्रह्म जिज्ञास्यमित्याक्षेपः सम्भवतीति चेत् । कथं तर्हि आनन्दमयस्य जीवत्वेन पूर्वपक्षः । तस्मिन् कारणत्वेन बाधकेन रूढिभङ्गे सति ब्रह्मशब्देन जीवासम्भावितगुणपूर्त्यभिधानेन ब्रह्मशब्दिते तस्मिन् जीवत्वशङ्कानुत्थानात् । श्लोकस्य प्रायपाठेन पुच्छवद्विषयतया तत्स्थब्रह्मशब्दयोस्तद्विषयकत्वात् । तस्यान्यविषयकत्वे ब्रह्मशब्दाभ्यासेन सिद्धान्तसिद्धिर्न स्यात् । कारणत्वाच्छादनेन शङ्केति चेत्, कथं तर्हि जिज्ञासाक्षेप इति ।

द्वैतिनः– तन्न। कण्ठोक्तसमन्वयमात्रे तात्पर्ये विश्वतोमुखत्वालाभेन शास्त्रापर्यवसानप्राप्त्या चाल्पाक्षरसूत्रस्थपदस्योपलक्ष्यत्वावश्यंभावेन अन्नमयादीनां ब्रह्मत्वेऽपि आनन्दमयमात्रपक्षीकाराविरोधात् । सूत्रकृतः स्वतन्त्रेच्छात्वेन अन्तरधिकरणे आनन्दमये श्रुतादृश्यत्वेन श्रुतान्तस्थस्याब्रह्मत्वे आनन्दमयस्याप्यब्रह्मत्वमिति आनन्दमयेनैवाक्षेपसङ्गतिसद्भावेन

सर्वापेक्षितानन्दप्रदोपासनाविषयपूर्णानन्दत्वरूपमहागुणस्य प्रथमं वक्तव्यत्वेन अन्नमयादिसाधारणविकारशब्दाद्यपेक्षया अधिकस्य ब्रह्मावयवकत्वस्याब्रह्मत्वप्रापकस्य श्रवणेन च प्रथमातिक्रमकारणाभावेन आनन्दमयपदेनैवोपलक्षणसम्भवाच्च । भाष्योक्तरीत्या जिज्ञासाक्षेपकावयवत्वस्य आनन्दमय एवं सत्त्वाच्च । तद्यन्नमयादीनामसङ्गतत्वेन असमन्वेतव्यत्वापत्तिरिति तु न वक्तव्यम् । जिज्ञासाक्षेपाभावेऽपि समन्वयनयेनेक्षतिनयस्य असम्भावनाशङ्कानिरासकतया अव्यवधायकत्वेन प्रपञ्च्यप्रपञ्चकभावसङ्गतेः ईक्षतिनयेन आत्मशब्दतन्निष्ठमोक्षोपदेशस्वाप्ययगतिसामान्याक्षेपकतया चन्द्रिकोक्ताक्षेपकसङ्गतेश्च सत्त्वेनासङ्गतत्वाभावात् । अवयवत्वस्य त्वानन्दमये आधिक्येनाक्षेपकत्वम् ।

किञ्चेत्याद्यपि न । ब्रह्मत्वादिकमुपेत्यैव आनन्दमयस्यान्यत्वेऽवयविनं विनाऽवयवमात्रस्य जिज्ञासाक्षेपस्य भाष्यादावुक्तत्वेन अब्रह्मत्वादपूर्णत्वाद्वेत्यादिविकल्पस्यैवानवकाशात् । आनन्दमयस्यान्यत्वे तदवयवस्य सम्यक् ब्रह्मताया अप्राप्तेः तद्वेदनात्परप्राप्त्ययोगेन जिज्ञासाक्षेपस्य 'समस्ताब्रह्मताप्राप्तेः' इति व्याख्यावसरे सुधायां उक्तत्वाच्च । अवयवत्वानुपपत्त्या सम्यक् पूर्णतारूपमुख्यार्थपरित्यागस्य 'इन्द्रः पराधीनः' इत्यादौ सम्यक् परमैश्वर्यत्यागस्येव युक्तत्वाच्च । स्पृष्ट्वोद्गानसर्ववेष्टनयोः विरुद्धत्वेन श्रुतिविरुद्धस्मृत्या मूलश्रुत्यनुमानायोगस्यैव विरोधनयविषयत्वेनात्र तन्न्यायप्रवृत्तेश्च । अन्यथा गङ्गापदस्यापि श्रुतित्वेन घोषाधारत्वानुपपत्त्या मुख्यार्थात्यागापत्तेश्च ।

आनन्दमयस्य ब्रह्मत्वेऽचिन्त्यशक्त्याऽवयवस्यापि पूर्णत्वेन जिज्ञास्यत्वेन च सिद्धान्तेऽनुपपत्त्यभावाच्च । पूर्णावयवस्य पूर्णत्वानियमेऽपि 'उद्धबर्हात्मनः केशौ द्यावापृथिव्योरिदमन्तरं हि' इत्यादिप्रमाणैः ब्रह्मावयवस्य पूर्णत्वनियमसम्भवाच्च । परिधेः परिधित्वापरित्यागेन पशुनियोजनाङ्गत्ववत् पूर्णत्वपरित्यागेनावयवत्वस्य सिद्धान्ते सम्भवेऽपि पूर्वपक्षेऽन्यावयवत्वेन जिज्ञासाक्षेपसम्भवाच्च ।

जिज्ञास्यतायां कारणतायां चोक्तगतिसामान्यस्यानन्दमये '[१]सोऽकामयत । बहु स्याम्' इति कारणत्वस्य तत एव जिज्ञास्यत्वस्य च प्राप्त्या आक्षेपोऽपि सम्भवति । न ह्यत्रापि जीव एव पूर्वपक्षयितव्यः । रुद्रादेरपि तद्विषयत्वसम्भवात् । श्लोकस्यानन्दमयविषयकत्वेऽपि तस्य विकारशब्दादिना ब्रह्मत्वे श्लोक-ब्रह्मशब्दोऽपि कथञ्चित्तत्र युक्तः । कारणत्वादनेन जीवादिविषयकपूर्वपक्षे तु अवयवत्वेनैव जिज्ञासाक्षेपः । विकारित्वेन पूर्वपक्षे तद्विरोधिप्राचुर्योपष्टम्भ-कानन्दाभ्यास एव हेतूकर्तुं युक्तः इति तु पूर्वमेव खण्डितम् ।

आनन्दाभ्यासस्य हेतुत्वे चन्द्रिकोक्तस्य रामानुजमते उत्तरसूत्रे पुनराक्षेपसमाधानायोगस्य दृढीकरणम्।

किञ्चानन्दाभ्यासेन प्राचुर्यार्थकत्वे उपष्टम्भलब्धे उत्तरसूत्रे पुनराक्षेप-समाधानायोगः ।

१. तै.उ.१४.१

विशिष्टाद्वैतिनः– अनभिज्ञो हि भवानाक्षेपसमाधानप्रकारयोः । प्रायपाठ-विरोधान्न प्राचुर्यमिहाश्रयितुं युक्तमिति आक्षेपस्य, तदसिद्धया समाधानस्य च सुगमत्वादिति ।

द्वैतिनः– तन्न । अभ्यासेन प्राचुर्यार्थकत्वे साधिते दुर्बलेन प्रायपाठादिति चेत्तदसिद्धेरिति सूत्रयितुं युक्तत्वाच्च ।

सिद्धान्ते ब्रह्मशब्दाभ्यासस्य हेतुत्वे असामञ्जस्यशङ्का तन्निरासश्च

विशिष्टाद्वैतिनः– ब्रह्मशब्दो हेतुरिति वदतस्तवैवासामञ्जस्यम् । विकारित्वेन जीवत्वे शङ्किते ब्रह्मशब्देन तत्परिहारायोगादिति । नह्यसौ जीवव्यावृत्तः । तत्रापि रुढत्वात् । तद्भङ्गे विद्धद्योगेनासावसाधारणो ब्रह्मणीति चेत् । सत्यं तर्हि तद्भञ्जक एव हेतुरभिधातव्यः । योगभञ्जक उत्तरेण भग्ने स उन्मज्जतीति चेत् । अहो भवान् देवदत्तहन्तन्यायं न जानाति । स्वरूपप्राबल्यमपि विस्मरति । कारणत्वादिना रूढिभङ्गे हि सति योगं भवानपि तत्र तत्र वदति । प्राचुर्यमेव तद्भञ्जकमिति चेत् । सत्यम् । अत एव स एव हेतुस्तद्धेतोरेवेति न्यायेन हेतूकर्तुं युक्तमित्यभ्यधाम । आनन्दाभ्यासस्तु तत्पर्यवसायीति दिगिति ।

द्वैतिनः– तन्न । ब्रह्मशब्दस्य जीवे रूढत्वेऽपि ब्रह्मणीव बहुप्रयोगबाहुल्या-भावेन रूढावपि गोशब्दस्य धेनुवागादाविव तारतम्येन प्रसिद्धिसम्भवेऽप्रसिद्ध-ग्रहणायोगेन जीवव्यावृत्तेरुपपत्तेः । '[1]तदेव ब्रह्म परमं कवीनां' इत्यादिना

१.मा.ना.उ.१.६

महायोगविद्वद्रूढ्योः स्वरूपतः प्रबलयोर्विष्णावसाधारण्योक्तेश्च । जीवे अङ्गरूढः सत्त्वेऽपि विद्वद्रूढ्यादेः प्राबल्येन तद्भञ्जकानपेक्षणेन तद्भञ्जकस्यैव हेतुत्वेनाभिधातव्यत्वोक्तेरयोगाच्च । विद्वद्रूढ्यादिबाधकस्य च परिहरिष्यमाणत्वेन निराबाधं तस्य साधकत्वाच्च । देवदत्तहन्तुर्देवदत्तध्वंसकत्वेन ध्वस्तस्य पुनरुन्मज्जनायोगेन शङ्कितस्यासिद्ध्यादिना तत्त्वे परिहते निराबाधं साधकस्य साधकत्वेन तन्न्यायाविषयत्वाच्च । अन्यथा पूर्वपक्षयुक्त्या बाधितस्य तन्निरासेऽपि सिद्धान्तेऽसिद्ध्यापत्तेश्च । विद्वद्रूढ्यादेरेव स्वरूपतः प्राबल्येन तद्विस्मरणोत्त्ययोगाच्च । जन्माधिकरणादौ आच्छाद्यैव विद्वरुडिं गुणपूर्तिसिद्ध्या कारणत्वरूपाङ्गरूढिबाधकोक्तेश्च । प्राचुर्यस्य तु बाधकनिरासकत्वेऽपि अङ्गरूढिभञ्जकत्वानङ्गीकाराच्च । आनन्दाभ्यासस्य प्राचुर्यपर्यवसायित्वस्य पूर्वमेव निरस्तत्वाच्च । तथाच ब्रह्मशब्दस्यैव साधकतया तस्यान्नमयादिसाधारण्येन पञ्चानामपि ब्रह्मत्वम् ।

मनोमयस्य ब्रह्मत्वे परोक्तबाधकानुवादः, तन्निरासश्च

विशिष्टाद्वैतिनः– 'मनो ब्रह्मेत्युपासीत' इत्यादाविव '१येऽन्नं ब्रह्मोपासत' इत्यादेरन्यथासिद्ध्या तथाविधब्रह्मशब्दप्रयोगमाश्रित्य न अन्नमयादेर्वास्तवं ब्रह्मत्वं युक्तमाश्रयितुम् । न चैतदसदुपासनमिति भ्रमितव्यम् । 'ब्रह्मदृष्टिरुत्कर्षात्' इति वदता सूत्रकृतैवाभिहितत्वात् । सर्वस्य ब्रह्मात्मकत्वाच्च । अत एव नृपचण्डालादिदृष्टान्तोक्तिः केषाञ्चिदाग्रहकृता न युक्ता । तद्गुणशालित्वत-

१.तै.उ.५.४

दभावाभ्यामुपासनौचित्यानौचित्ययोर्लोकसिद्धत्वाच्च । दृश्यते हि मन्त्रिणि राजगुणेन राजत्वोपचारः, ततोऽभ्युदयश्च । अत एव 'अन्नाद्भूतानि जायन्त' इत्यादिना तद्गुणवत्ता ख्याप्यते । मनोमये तु ब्रह्मशब्द एव नास्ति । 'आनन्दं ब्रह्मण' इति व्यतिरेकनिर्देशात् । अतो ब्रह्मानन्दवेदनसाधनत्वेन मन एवानेन श्लोकेन प्रशस्यत इति ।।

द्वैतिनः– तन्न । 'मनो ब्रह्मेत्युपासीत' इत्यादावपि मन इत्यस्य सप्तम्यर्थ-कप्रथमान्ततया अन्यथासिद्धेरभावात् । सर्वत्रापि ब्रह्मशब्दस्योपासनार्थतया अन्यथासिद्धत्वेन असाधकत्वापत्त्या 'विपश्चिद्ब्रह्मशब्दाभ्यां समानाधिकृतः श्रुतः । ब्रह्मशब्दस्तदभ्यास' इत्यादित्वदुक्तेरप्ययोगेन स्वव्याहत्यापत्तेश्च । असदुपासनस्यानर्थसाधनताया 'योऽन्यथा सन्तमात्मानम्' इत्यादिबहुप्रमाणैर-नुव्याख्यान एव साधितत्वाच्च । 'ब्रह्मदृष्टिरुत्कर्षात्' इति सूत्रे ब्रह्मणि पूर्णत्वदृष्टेरेव विधानेन असदुपासनाया अनभिहितत्वाच्च । 'अयं राजा त्वमित्युक्ते चण्डालेऽथ नृपेऽपि च' इत्यादिना चण्डाले राजत्वस्येवान्यत्र ब्रह्मत्वस्योपासनायां ब्रह्मकोषस्यैव बहोः सम्पादनाच्च । मातुलसुतायां स्वभार्यायां मातृगुणशालित्वे सत्यपि मातृत्वोपासनायाः लोकविरुद्धत्वेन तद्गुणशालित्वेन तत्त्वोपासनस्य लोकसिद्धत्वाभावाच्च । मन्त्रिणि राजगुणशालिनि राजशब्दस्यौपचारिकत्वेऽपि उपासनाया ज्ञानरूपाया औपचारिकत्वायोगाच्च । औपचारिकशब्दप्रयोगेण स्तुतिपर्यवसायिनाऽभ्युदयेऽपि असदुपासनया अभ्युदयस्य क्वाप्यदर्शनाच्च ।

'अन्नाद्भूतानि जायन्ते' इत्यत्रापि अन्नशब्दाद् ब्रह्मण एवाभिधानेन अन्यथाऽतिव्याप्त्यापत्त्या प्रसिद्धान्ने जगत्कारणानाख्यानाच्च । मनोमये ब्रह्मशब्द एव नास्तीति तु अतिसाहसम् । 'आनन्दं ब्रह्मणो विद्वान्' इति ब्रह्मशब्दस्य श्रवणात् । आनन्दमित्यनेन व्यतिरेकनिर्देशेऽपि मनोमयेन तदभावाच्च । प्रजाजनकत्वादिना अन्नमयस्येव वाङ्मनसागोचरानन्दत्वेन मनोमयस्यैव स्तवनाच्च । अप्राप्यनिवृत्तिमत्तया निन्दितस्य मनसः प्रशंसायाः सुतरामयोगाच्च । तस्मात् पञ्चानामपि ब्रह्मशब्दात् ब्रह्मत्वम् ।

ब्रह्मानन्दवेदनसाधनत्वेन मनःप्रशंसनमत्र क्रियत इति मार्ताण्डनिगमनानुवादः, तदयुक्तत्वव्यवस्थापनं च

विशिष्टाद्वैतिनः– '[१]ब्रह्मविदाप्नोति परं' इत्यादीनि बहूनि वाक्यानि विलुलितानि । तत्रापि यदुक्तम्- अनन्तशब्दोदितवस्त्वपरिच्छेदो-पयुक्तसर्वोपादानत्वरूप-सर्वात्मकत्वं व्यञ्जयितुं 'तस्माद्वा एतस्मात्' इत्यादिना सर्वोपादानत्वमुच्यते । गुहाशब्दितोपासनास्थानभूतहृदयपुण्डरीकाधारतया शरीरं निर्दिशते । उपासनाफल-भूतवाङ्मनसापरिच्छेद्यानन्दा-नुभवसिद्ध्युपयुक्ततया आनन्दमयपदेन ब्रह्म विवक्ष्यते । परमात्मायत्तमन्येषां प्रियत्वादिकमिति व्यञ्जयितुं तस्य प्रियमेव शिर' इत्याद्यभिधाय स्वरूपमेव आनन्दत्वब्रह्मत्वादिधर्मभेदेन मध्यकायत्वेन पुच्छत्वेन च निर्दिश्यते । पूर्वपूर्वश्लोकोक्तानां उपासनसाधनभूतानां तत्तदन्नमयादि ब्रह्मदृष्टिफलीभूतानां, शरीरधारणोपयुक्तेष्टान्नसमृद्धिपूर्णायुरवाप्तिपाप्माभावानां

१.तै.उ.२.१

साध्यभूतं वेदनं, तत्प्रयुक्त्युपासकस्यास्तिकत्वं च प्रदर्श्य तदुपासनासाधारणकरणे विशुद्धे मनसि ब्रह्मदृष्टिविद्धयनपेक्षणात् तमनुत्त्वैव सार्वकालिकोपासन-विच्छेदविरहस्य 'अथ सोऽभयं गतो भवति' इत्युक्तभयाभावस्य च बोधक एक एव श्लोकः संवेदनसाधनवेद्यब्रह्मविषयकत्वाभ्यां आदरातिशयात् द्विरभ्यस्यत इत्यादि ।

द्वैतिनः– तदेतदयुक्तम् । अनन्तशब्दस्य देशकालगुणापरिच्छेदवत् वस्त्वपरि-च्छेदावाचित्वात् । अपरिच्छेदस्य भेदाभावरूपत्वे जडदुःखात्मकत्वाद्यापत्तेश्च । वस्तुतस्तु अभेदो नापरिच्छेदः । परिच्छिन्नाद्भेदाभावेऽपरिच्छिन्नत्वायोगात् । कालापरिच्छिन्नेऽपि परमाण्वादौ देशपरिच्छेदेन परिच्छिन्नत्वबुद्धिवत् उभयापरिच्छिन्ने गगनादौ भेदमात्रेण परिच्छिन्नत्वबुद्धेरभावात् । आनन्दपदेनैव परिच्छिन्नाद्भेदस्यैवोक्तेश्च । भिन्न इत्यर्थे परिच्छिन्न इत्यप्रयोगाच्च । निर्विकारस्य सर्वोपादानत्वायोगाच्च । नित्यं प्रत्युपादान त्वाभावेन तदात्मकत्वासिद्धेश्च । 'तस्माद्वा एतस्मादात्मन' इत्यादौ पञ्चम्या हेतुत्वमात्रार्थकतया 'पुत्रात् प्रमोदो जायते' इत्यादाविव उपादानत्वासिद्धेश्च । व्यक्तमेतत् न्यायामृते । हृत्पुण्डरीकाधारस्य शरीरस्याध्यक्षसिद्धत्वेन बुद्ध्यवतारणाय तन्निर्देशवैयर्थ्याच्च । वाङ्मनसापरिच्छेद्यानन्दानुभवस्य जीवायोग्यतयोपासनाफलत्वासम्भवाच्च । सत्यपदेन विवक्षायाः मुक्तामुक्तनियन्तृत्वानुभवानुपयुक्तत्ववदानन्दमयपदेन

विवक्षाया अपि उक्तानुभवानुपयुक्तत्वाच्च । ब्रह्मशिरसः प्रियत्वेऽपि इतरप्रियतायास्तदायत्तत्वालाभाच्च । देवदत्ते यज्ञदत्तपुत्रे पण्डिते धर्मभेदमात्रेण देवदत्तो मध्यदेह यज्ञदत्तपुत्रः पुच्छमित्याद्यनिर्देशेन आनन्दत्वब्रह्मत्वादिधर्मभेदेन मध्यकायत्वाद्युक्तेरपहास्यत्वाच्च । अन्नमये ब्रह्मदृष्टेरिष्टान्नसमृद्धिफल-कत्वेऽनायाससाध्यत्वेन दरिद्रैः कर्तुं शक्यतया क्षमाभावप्रसङ्गात् । कृतायामप्यन्नमये ब्रह्मदृष्टौ इष्टान्नसमृद्ध्यदर्शनाच्च । एवं प्राणमये ब्रह्मदृष्ट्या पूर्णायुष्ट्वस्य सुसाधत्वेऽल्पायुषामभावप्रसङ्गाच्च । कृतायामपि तस्यां तददर्शनाच्च । विज्ञानमये जीवे ब्रह्मदृष्ट्या पाप्माभावे मुक्तेरेव प्राप्त्या संसार्यभावप्रसङ्गाच्च । कश्मलेऽन्नमये देहे ब्रह्मदृष्ट्या फलसद्भावे विशुद्धे मनसि ब्रह्मदृष्ट्या सुतरां महाफलसम्भवेन तत्र ब्रह्मदृष्टिविध्यनपेक्षणस्यानुचितत्वाच्च । 'न बिभेति कदाचनेति कुतश्च नेति' इति वा सार्वकालिकोपासनविच्छेदविरहस्यानुक्तेश्च । अभयगतेर्मुक्तिरूपतया मनोमयोपासनस्य तत्फलकत्वायोगाच्च । श्लोकस्य ब्रह्मविषयकत्वाभावेन ब्रह्मविषयकत्वेन तदादरणायोगाच्च । तस्माद्यत्किञ्चिदेतत् ।

अत्र प्रथमसूत्रे ब्रह्मशब्दाभ्यासो हेतुः । तस्यैव ब्रह्मत्वसाधकत्वात् । आनन्दमयाद्युदाहृतश्लोकेषु ब्रह्मशब्दस्य श्रवणेन ब्रह्मपरामर्शिना तच्छब्देन ब्रह्मत्वविधानेन च ब्रह्मशब्दस्योपस्थिततत्वाच्च । एतेनानुपस्थितब्रह्मपरत्व-मयुक्तमिति रामानुजोक्तमपास्तम् । द्वितीयसूत्रस्य चास्मद्भाष्योक्त एवार्थः । बाधकस्य कस्याप्यभावात् ।।

'तद्धेतुन्यपदेशाच' इति सूत्रस्य सिद्धान्त्युक्तार्थेपरोक्तास्वारस्यानुवादः, तद्विमर्शश्च

'तद्धेतुव्यपदेशाच्च' इत्यस्यापि तस्य विष्णोस्तस्य पूर्णानन्दत्वे 'को ह्येवान्यादिति लोकचेष्टकत्वाख्यहेतुव्यपदेशादित्येवार्थः ।।

विशिष्टाद्वैतिनः– तच्छब्दहेतुशब्दयोरस्वारस्यम् । किञ्च लोकचेष्टकत्वमानन्दकार्यम्, न तु तत्कारणम् । 'आनन्दोद्रेकमन्तरेण तत्प्रवृत्तौ कारणाभावादिति टीकोक्तेः । न च कारकहेतुत्वाभावेऽपि ज्ञापकहेतुत्वं सम्भवतीति वाच्यम् । रामानुजभाष्यरीत्या तत्सम्भवे ज्ञापकहेतुत्वाश्रयणायोगात् । लोकचेष्टकत्वे आनन्दाविनाभावासिद्धेश्च । दृश्यते हि राजादेः क्रोधादिनापि लोकचेष्टकत्वम् । इहापि 'भीषाऽस्माद्वातः पवत' इति भयप्रयुक्तमेव तदाम्नायते, नानन्दप्रयुक्तम् ।

किञ्च अन्यात्प्राण्यादिति यदि लोकचेष्टकत्वमुच्यते, तदा 'एष ह्येवानन्दयाति' इति न सङ्गच्छते । एष ह्येव चेष्टयतीति हि वक्तव्यम् । अतः भोगापवर्गात्मकसुखहेतुत्वमेव तद्धेतुशब्देनोच्यत इति युक्तमुक्तमिति ।

द्वैतिनः– तन्न । आनन्दमयस्तात्त्विति तच्छब्देन ब्रह्मणः प्रकृतस्य तस्येति षष्ठ्यन्तेन प्राचुर्यादिति प्रकृतस्य तस्मिन्निति सप्तम्यन्तेन परामर्शसौकर्यात् । हेतुशब्दस्यापि ज्ञापकहेतौ प्रसिद्धतया तस्यापि स्वारस्यात् । हेतुत्वप्रकारकबोधजनकपरत्वे भवन्मते लक्षणापत्तेश्च । पत्नीजीवस्य

पतिजीवानन्दयितृत्वेन जीवान्यत्वसाधकत्वायोगाच्च । सुखोद्रेकदुःखोद्रेक-सुखप्राप्तिकामनादुःखद्वेषानां अन्यतमत्वेन प्रवृत्त्यव्यापकवृत्तेः सुखोद्रेकेतरा-भावविशिष्टप्रवृत्त्या सुखोद्रेकाविनाभावस्यासिद्धेश्च । क्रोधादिना चेष्टकत्व-स्थलेऽपि अपराधप्रयुक्तदुःखनिवृत्तिकामनायाः तच्छिक्षणादिना प्राप्यसुखप्राप्ति-कामनया वा सत्त्वेनोक्तान्यतमत्वेन व्यापकत्वाभङ्गाच्च । भीषाप्रवृत्तावपि प्रवर्तकस्यानन्दोद्रेकसम्भवाच्च । लोकचेष्टकत्वेन पूर्णानन्दत्वं प्रसाध्य अखिलानन्दयितृत्वेनापि तत्साधयितुं 'एष ह्येवानन्दयाति' इति वाक्यस्य प्रवृत्तत्वेन तदनुपपत्तेरभावाच्च ।

मध्वसिद्धान्ते 'मान्त्रवर्णिकमेव च गीयते' इति सूत्रस्यार्थः

'मान्त्रवर्णिकमेव च गीयते' इति सूत्रस्यापि मन्त्रवर्णनलक्षणवत्तयोक्तं परं ब्रह्मैवान्नमयादिशब्दपञ्चकेन गीयते यतोऽतश्च पञ्चापि ब्रह्मैवेत्यर्थः । सत्यज्ञानानन्तपदानां अन्नमयादिशब्दानां चार्थानुसन्धाने एकार्थत्वप्रतीतेरिति भावः ।

मान्त्रवर्णिकसूत्रे मार्ताण्डोक्तदूषणानुवादः तत्समाधानश्च

विशिष्टाद्वैतिनः– ये तु ब्रह्मशब्दाभ्यासादन्नमयादेब्रह्मत्वमुक्तमयुक्त-मित्याशङ्क्य मान्त्रवर्णिकसूत्रमिति वदन्ति, तेषां तावत् शङ्का असमीचीना । मुख्ये सम्भवत्यमुख्यायोगात् । बाधकबलात् तत्त्याग इति चेत् । किं तद्बाधकम् । यद्यवयवत्वोक्तिः सा नान्नमयादाविति कथं तेषां अपरब्रह्मताशङ्का । न ह्येकत्र

बाधकबलात् त्यागे, अन्यत्रापि तत्त्यागः । अतिप्रसङ्गात् । अथ तत्रापि हेत्वन्तरात् तत्त्यागः । तथापि न मान्त्रवर्णिकगानमात्रोक्त्या तत्परिहारः । तेन बाधकानुद्धारात् । अत एव शब्दानुसन्धानादिति हेतूक्तिरपि प्रत्युक्ता । बाधकेन प्रत्यभिज्ञाप्रतिरोधात् । न च 'स शिरः सः दक्षिणः पक्षः स उत्तर पक्षः स आत्मा स पुच्छम्' इति चतुर्वेदशिखोक्त्या बाधकोद्धारः । उत्सूत्रत्वापत्तेः ।

किञ्च ब्रह्मणः शिरःपक्षपुच्छादिभावसामर्थ्येऽपि किमत्रान्नमयवत् स्वाभिन्नशिरःपक्षादिनिर्देशः किं वा प्राणमयादाविव स्वभिन्नशिरःपक्षदिनिर्देश इति सन्देहे नियामकं न किञ्चिदुक्तं स्यात् । अतर्क्यत्वेन परिहारस्तु निश्चिते ब्रह्मत्वे स्यात् । अतिप्रसङ्गापादकश्च । किञ्च ब्रह्मशब्दस्य चिदचित्साधारण्यम-नङ्गीकुर्वता ब्रह्मशब्दितस्य प्रकृत्यादेः प्रायपाठाविरोधेन पुच्छत्ववर्णनसम्भवे किमित्यौपचारिकव्यतिरेकनिर्देश आश्रीयते ।

अपि च 'स शिवः' इत्यादिचतुर्वेदशिखानुसारात् पञ्चस्वपि स्वाभिन्नशिरः पक्षादिनिर्देश इष्यते ? आनन्दमयमात्रे वा ? नाद्यः । इदंशब्दनिरोधात। विशेषणमात्रपरत्वे स्वाभेदायोगात् । प्राणमयादावपि तथा निर्देशापत्तेश्च विशिष्टपरत्वेऽप्यभेदायोगः । विशेष्यमात्रपरत्वे लक्षणाप्रसङ्गः । नान्त्यः । पञ्चानां ब्रह्मत्वानुपपत्तिप्रसङ्गात् । अत एव नारायणप्रद्युम्नानिरुद्धवासुदेवसङ्कर्षणानां शिरआदित्वकल्पनमपि निरस्तम् । इदमादिशब्दैः प्रियादिशब्दैश्च तदभिधाना-योगात् । पुच्छे प्रतिष्ठाशब्दानुपपत्तेश्च । सहि पर्यवसानस्थानपरः । नहि

सङ्कर्षणस्तथा । 'पूर्णमेवावशिष्यत' इति श्रुतिविरोधात् । मन्मते त प्रियमोदादीनां तत्तदानन्दरूपाणां पूर्णानन्दे ब्रह्मणि पर्यवसानात् युक्तं प्रतिष्ठात्वमिति दिक् । किञ्च ब्रह्मशब्दमुख्यत्वोपपादनेन अभ्यासरूपहेतूपपादकमिदं तदनन्तरमेव स्यात् । आनन्दमयमात्रासाधारणहेत्वानन्तर्यं तु सुतरां न स्यादिति ।।

द्वैतिनः– तदेतत् न समीचीनमिति भाति । ब्रह्मशब्दस्य परब्रह्मणि मुख्यत्वेऽपि विष्णोरानन्दमयावयवत्वोत्यादिनाऽमुख्यार्थस्यैव ग्रहणोपपत्तेरिति टीकावाक्येनैव बाधकवशादमुख्यार्थस्वीकारेण शङ्कासमीचीनत्वस्य मुख्यार्था-सम्भवस्यानन्दमयेऽवयवत्वस्य आदिपदेन अन्नमयादावन्यस्य बाधकस्योक्त्या त्वदुक्तेर्नयननिमीलनमूलत्वात् । अन्नमयादिशब्देन मान्त्रवर्णिकसत्यत्वादेर्गीय-मानतया परब्रह्मविषयकत्वस्यैव प्राप्त्या मुख्यार्थस्वीकारशङ्कायाः परिहाराच्च । अन्नमयादिशब्दार्थानुसन्धानस्य बाधकप्रतिरुद्धत्वाभावाच्च । 'स शिरः स दक्षिणः पक्ष' इत्यादिना बाधकस्योद्धाराच्च । सौत्रचशब्देन बाधकोद्धारस्य सूचितत्वेन उत्सूत्रत्वानापत्तेश्च ।

भगवद्द्रयेषु अवयवावयविभेदस्य क्वाप्यभावेन अन्नमयादिपञ्चकस्य ब्रह्मत्वेन किमन्नमयवत्स्वाभिन्नशिर आदिनिर्देशो वा प्राणमयवत्स्वभिन्नशिर आदिनिर्देशो वेति संशयस्यायोगेन नियामकस्यावक्तव्यत्वाच्च । 'स शिरः स दक्षिणः पक्ष' इत्यादिनैव नियामकत्वाच्च । ब्रह्मशब्दाभ्यासादिना ब्रह्मत्वे निश्चितेऽतयत्वे-नावयवावयविभावानुपपत्तिपरिहारसम्भवाच्च । विरुद्धयोरेकत्र

समावेशे प्रमाणेन निश्चितेऽतयत्वस्य विरोधतन्निमित्तकतया अतिप्रसङ्गाभावाच्च । ब्रह्मशब्दस्य विष्णावेव परममुख्यत्वेन अन्नमयादेरपि ब्रह्मत्वेन तेनौपचारिकव्यतिरेकनिर्देशस्याश्रयणीयत्वाच्च । भवता आक्षिप्यानन्दमये औपचारिकनिर्देशस्वीकाराच्च । विशेषबलादवयवावयविभावसद्भावेन औपचारिकत्वाभावाच्च । पञ्चस्वपि शिरआदीनामभिन्नत्वेन पञ्चस्वप्यभिन्नशिरआदिनिर्देशो वा आनन्दमयमात्रे वेति विकल्पस्यानवकाशाच्च । अन्नमयशिरआदेः सन्निहित्वेन इदंशब्दाविरोधाच्च । प्राणमयशिरआदेः सन्निहितत्वेन निर्देशोपपत्तेश्च । सर्वत्रापि ज्ञानानन्दा-द्यात्मकशिरआदिमात्रपरत्वेन इदंशब्दप्राणशब्दादेः विशेषणमात्रपरत्वविशिष्टपरत्वविशेष्यमात्रपरत्वानां अविकल्पनीयतया तथा विकल्प्य दूषणाभिधानायोगाच्च । पञ्चानामपि ब्रह्मत्वेन आनन्दमयमात्रे स्वाभिन्नशिरआदिनिर्देश इत्यपेक्षस्यैवायोगेन तस्य दूषणायोगाच्च । अन्त्यपक्षेऽपि अन्नमयादीनां ब्रह्मशब्दादिना साधकेन ब्रह्मावयवकत्वादिरूपबाधकाभावेन च पञ्चानां ब्रह्मतानुपपत्तिप्रसङ्गाभावाच्च । 'शिरो नारायण पक्ष' इत्यादिना अन्नमयादीनां नारायणादिशिरस्कादितायाः प्रमितत्वेन शिरआदित्वकल्पनमपि निरस्तमित्यस्यासम्भवाच्च । इदमादिशब्दैः प्रियादिशब्दैश्च तदभिधाने बाधकाभावाच्च । पुच्छप्रतिष्ठाशब्दयोर्देहावस्थितिहेतुपादरूपचरमावयववाचित्वेन नवनारीकुञ्जरादाविव सङ्कर्षणस्य पादत्वेन पुच्छत्वादावपि 'पूर्णमेवावशिष्यत' इति श्रुत्यविरोधाच्च । भवन्मत एव पुच्छादीनां भिन्नत्वे पर्यवसानस्थानत्वायोगेनाभिन्नत्वेऽवयवत्वायोगेन पुच्छत्वाद्यनुपपत्तेश्च ।

किञ्चेत्यपि न । मान्त्रवर्णिकगानस्य हेत्वन्तरत्वेनाभ्यासोपपादकत्वाभावात् । 'तद्धेतुव्यपदेशाच्चे'त्यस्य आनन्दमयसाधारणत्वेऽपि मयटः प्राचुर्यार्थकताया अपि सत्त्वेन 'विकारिशब्दादि'त्येतदानन्तर्ये मान्त्रावर्णिकसूत्रस्य तदानन्तर्योपपत्तेश्च । ब्रह्मशब्दादेः परब्रह्मविषयतासाधकत्वं तु आर्थिकमिति न तदानन्तर्य मान्त्रवर्णिकसूत्रस्य ।

नेतरोऽनुपपत्तेरिति सूत्रार्थः अत्र परोक्तदूषणानामलग्नकत्वप्रतिपादनम्

द्वैतिनः– '[१]नेतरोऽनुपपत्तेरि'त्यस्यापि विष्ण्वतरश्चतुर्मुखादिः आनन्दमयादिर्न भवति मुक्तिसाधनज्ञानत्वानुपपत्तेरित्येवार्थः।

विशिष्टाद्वैतिनः– अभ्यासादेः सर्वस्यापि हेतोरानन्दमयादौ जीवत्वाभावसाधकत्वे समाने जीवे तदनुपपत्तौ च समानायां इह विशिष्य तत्कीर्तनवैयर्थ्यात् । कथञ्चित्सार्थक्येऽपि वा पूर्ववत् चशब्दप्रयोगापत्तेश्च । अस्मन्मते तु मान्त्रवर्णिकत्वासिद्धिशङ्कापरिहाररूपत्वात् प्रधानसाध्यानन्वयाच्चशब्दाप्रयोगः ।

किञ्च आनन्दमयादिरिति पक्षेऽनुपपत्तेरिति हेतुरनन्वितः । तस्मिन् मुक्तिहेतुज्ञानविषयत्वसत्त्वात् । तदेव हेतुः, तस्याप्रयोजकत्वशङ्काव्यावर्तनाय 'अनुपपत्तेरि'त्युक्तमिति चेन्न । उक्तरीत्या साक्षाद्धेतुत्वसम्भवे उत्सूत्रहेतूपष्टम्भकत्वकल्पनाया अयुक्तत्वात् । सति आनन्दमयादेब्रह्मत्वे 'ब्रह्मविदाप्नोति'

१.ब्र.सू. १.१.१६

इत्युक्तज्ञानविषयत्वम्, तद्विषयत्वे च आनन्दमयादेब्रह्मत्वमितीतरेतराश्रयापत्तेश्च ।

अथेतरो न आनन्दमयादिरित्यन्वयेन इतरः पक्ष इत्युच्येत । तथापि मुक्तिहेतुज्ञानविषयत्वस्य हेतोरसिद्धिरेव ।। अथानुपपत्तिप्रतियोगिनिरूपणमिदम्, न हेतुनिरूपणमित्युच्येत । तदा प्रागुक्तसत्यत्वादिसकलानुपपत्तौ जाग्रत्यां कथं एकमात्रोपादानम् । सत्यत्वादेः साधारण्यमाशङ्कमानं प्रति इदमुच्यत इति चेत् । ब्रह्मशब्दसाधारण्यं शङ्कमानं प्रति तत्प्रतिपाद्यगोचरवेदनस्यापि साधारण्यशङ्काया अयत्नसिद्धत्वेन तेन तन्निवर्तनायोगात् । अत एव तदुपष्टम्भकतया 'तमेवं विद्वान' इति वाक्यमुदाहराम इति चेत् । सत्यम् । 'तमेवे'त्यत्रापि तच्छब्देन प्रागुपात्तपुरुषशब्दितस्यैव परामर्शन तेनापि तन्निवृत्त्यसम्भवात् । कारणत्वाम्नानात् पुरुषशब्दासाधारण्यकल्पनया वा ततस्तन्निवृत्तिरस्त्विति चेत् । सुदूरमपि गत्वाऽपेक्षणीयेन तेनैव क्रमेण इहैव तन्निवृत्तिरस्तु । 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूत' इति कारणत्वस्यानितरसाधारणप्रवृत्तिनिमित्तक-ब्रह्मात्मविपश्चिच्छब्दानामिहापि श्रवणादिति यत्किञ्चिदेतदिति ।।

द्वैतिनः– तन्न । अभ्यासादेब्रह्मत्वसाधकस्य सर्वस्य विरिञ्चादौ बाधकत्वेऽपि पूर्वं साधकत्वेनानुक्तस्य मोक्षसाधनज्ञानविषयत्वस्य परपक्षे बाधकमुखेनो-त्कीर्तनसाफल्यात् । अन्यथा प्रायेण साधकस्य परपक्षे बाधकत्वेन

बाधकस्य स्वपक्षे साधकत्वेन साधकोत्त्यनन्तरं परपक्षे बाधकान्तरस्य क्वाप्यनुपन्यस-नीयत्वापत्तेः । मोक्षसाधनज्ञानविषयत्वस्यानुक्तस्य मुखत उत्कीर्तनेऽपि उक्तसाधकानामप्युपलक्षणया विवक्षणसम्भवाच्च । 'नारायणोऽसौ परमो विचिन्त्यो मुमुक्षुभिः कर्मपाशादमुष्मात्' इत्यादिश्रुत्या अस्यान्यत्रा-शक्यशङ्कत्वाच्च । अस्येतरनिरास एव हेतूकरणेन स्वपक्षसाधकहेतुभिः समुच्चयार्थकचशब्दाप्रयोगस्यौचित्याच्च ।। आनन्दमयादिरिति पक्षे नेतर इति साध्ये इतरत्वेऽनुपपद्यमानहेतोरनुपपत्तिमुखेनैव 'न जलं गन्धानुपपत्तेः' इत्यादौ गन्धादेरिव अनुपपत्तिमुखेनैव हेतूकरणस्य लोकसिद्धतया अनुपपत्तेरिति हेतुरनन्वित इत्युक्तेरसङ्गतेश्च । व्यभिचारशङ्कानिरासाय व्यतिरेकव्याप्तेरिव अप्रयोजकत्वाशङ्कानिरासाय 'अनुपपत्तेरि' इत्युक्तेः स्वरसत्वाच्च । इतरः मुक्तावस्थो जीवः न मान्त्रवर्णिकः निरुपाधिकसार्वज्ञाद्यनुपपत्तेरिति साक्षाद्धेतुत्वसम्भवस्य नञः श्रुतेनेतरेण सम्बन्धेऽनुवृत्तेन पुल्लिङ्गतया विपरिणतेन मान्त्रवर्णिकपदेन अन्वयानुपपत्तिः, निरुपाधिकसार्वज्ञादेरश्रवणं चेत्यादिनान्यत्र दूषितत्वाच्च । मान्त्रवर्णिकज्ञानेनैव अन्नमयादेर्मुक्तिहेतुज्ञानविषयत्वस्य ब्रह्मत्वस्य च सिद्धेरितरेतराश्रयानवकाशाच्च ।

इतरो नानन्दमयादिरित्यन्वये मुक्तिहेतुज्ञानविषयत्वनिरूपणस्यानु-पपत्तिप्रतियोगिनिरूपणत्वेन मुक्तिहेतुज्ञानविषयत्वस्य हेतोरसिद्धिरेवेत्य-स्यासम्भवदुक्तिकत्वाच्च । सत्यत्वादिसकलानुपपत्तौ जाग्रत्यामपि सत्यत्वा-देलक्षणस्यान्नमयादिशब्दार्थत्वेन तत्रोदाहतश्लोकेषु 'सर्वं वै तेऽन्नमाप्नुवन्ति'

'सर्वमेव त आयुर्यन्ति' इत्यादिना श्रूयमाणस्य मुक्तिहेतुज्ञानविषयत्व-स्यैवानुपपत्तेर्वक्तुं युक्तत्वाच्च । सत्यत्वादेब्रह्मशब्दादेश्च साधारण्यं शङ्कमानं प्रत्ययं हेतुरुच्यत इत्यस्माभिरनुक्तत्वेन ब्रह्मशब्दप्रतिपाद्यगोचरवेदनस्यापि साधारण्यशङ्काया अयत्नसिद्धत्वेनेत्युक्तेरनुक्तोपालम्भत्वाच्च । ब्रह्मशब्दस्य कयाचिद्वृत्त्या जीवसाधारण्यशङ्कायामपि तु मुख्यार्थविष्णवसाधारण-मोक्षसाधनज्ञानविषयत्वसाधारण्यस्य वह्निशब्दस्य चित्रमूलादिसाधारण्य-शङ्कायामपि दाहकत्वसाधारण्यस्येव अशक्यशङ्कत्वाच्च । शङ्कानुत्पादनायैव 'तमेवं विद्वान्' इति पुरुषसूक्तवाक्यस्योदाहृतत्वाच्च । तत्र तच्छब्देन परामृश्यमानवाचि पुरुषशब्दस्य 'पुरुषः पर आत्माजो ब्रह्मा नारायणः प्रभुः । महानानन्द उद्विष्णुर्भार्गवोम इतीर्यते । स्वयं नारायणो देवो नान्यस्यैतानि कस्यचित् । तस्मादोमित्युदाहृत्य यज्ञदानादि कुर्वते । सूक्तेन पौरुषेणैनं यजन्त्यध्यात्मकोविदा' इत्यादिश्रुतिभिः, 'यथैव पौरुषं सूक्तं नित्यं विष्णुपरायणम्' इत्यादिस्मृतिभिः विष्णुपरत्वेन निर्णीततया अन्यपरत्वशङ्काया अनुदयाच्च । 'तस्माद्विराडजायत' इत्यादिना तस्य कारणत्वस्याम्नानाच्च । इहापि 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः' इति कारणत्वस्यानितरसाधारणप्रवृत्तिनिमित्तकब्रह्मात्मविप-श्चिच्छब्दानां च श्रवणेऽपि स्पष्टत्वेन शिष्यैरूहितुं शक्यत्वेन चानुक्तिसम्भवाच्च ॥

'भेदव्यपदेशाच्च' इत्यस्य चन्द्रिकादिशा अर्थद्वयकथनम्

'भेदव्यपदेशाच्च' इत्यस्यापि '[1]स एको ब्रह्मण आनन्द' इत्यादिना

१.तै.उ.२४

विरिञ्चादेः परिमितानन्दत्वमुक्त्वा 'यतो वाच' इत्यानन्दमयस्य पूर्णानन्दत्वोक्ते-रानन्दमयो नेतर इति वा, न केवलमितर आनन्दमयादिर्नेति किन्तु ब्रह्माभिन्नश्च न, 'स यश्चायं पुरुषे यश्चासावादित्ये' इत्यादावधिष्ठातृत्वादिना ब्रह्मभेदस्य व्यपदेशादिति वार्थः ।

'भेदव्यपदेशाच' इत्यस्य सिद्धान्त्युक्तार्थे परोक्तविमर्शानुवादः

विशिष्टाद्वैतिनः– नेत्थमर्थवर्णन युक्तम् । कण्ठोक्तत्वगमक-व्यपदेशशब्दविरोधात् । कण्ठोक्तभेदपरत्वसम्भवे गम्यमानपरत्वकल्पनाया अयोगाच्च । '[१]स एको ब्रह्मण आनन्द' इत्यत्र ब्रह्मशब्दस्य प्रकरणगत-ब्रह्मशब्दान्तराणामिव परमात्मपरत्वौचित्येन 'स एकः प्रजापतेरानन्दः' इत्येकवचनान्तप्रजापतिशब्दस्य दक्षादिपरत्वासम्भवेन चतुर्मुखपरत्वावश्यंभावेन तेन पौनरुक्त्यापत्त्या च परमात्मगतानन्दप्रतिपादने सति तत्रापि परिच्छिन्न-त्वप्रतीत्या तस्य भेदगमकताया उपपादकान्तरापेक्षत्वेन च तत्परत्वस्य क्लिष्टत्वाच्च ।

किञ्च आनन्दतारतम्यपरमिदं प्रकरणम् । न तु तद्भेदपरम् । तेन तु कामं आनन्दानां भेदः सिद्ध्येत् । न त्वानन्दिनाम् । न ह्यानन्दगततारतम्यप्रयुक्तः तद्भेदः तदाश्रयभेदव्याप्यः । एकस्मिन्नपि जीवे संसारिणि कालभेदेन आनन्दतारतम्यदर्शनेन व्यभिचारात् ।

किञ्च 'स एको ब्रह्मण आनन्द' इत्यस्य विरिञ्चिपरत्वे 'आनन्दं ब्रह्मणो

१.तै.उ.९१

विद्वान' इत्यस्यापि सारूप्यात् तत्परत्वशङ्काकलङ्कितत्वात् ब्रह्मशब्दमुख्यत्वत-द्धेत्वभिधानविरोधेन तत्त्यागस्य उभयत्र साम्येन च तत्प्रयुक्तभेदव्यपदेशस्य उपपादकान्तरनिरपेक्षत्वाभावेन भेदव्याप्यहेत्वन्तराणामपि अनेनैव सङ्ग्रहे सूत्रान्तरवैयर्थ्यापत्त्या चेदमयुक्तम् । एतेन 'अदृश्येऽनात्म्येऽनिरुक्तेऽनिलयने' इत्यादिरपि न भेदव्यपदेशः । उपास्यत्वोपासकत्वादिभेदव्यपदेशस्तु मान्त्रवर्णिक-सूत्रविषयत्वादवक्तव्यः । उपासनविच्छेदतदभावाभ्यां भयाभयप्रतिपादनपरत्वाच्च न भेदपरं तत् । एवं 'स यश्चायं पुरुषे, यश्चासावादित्ये' इत्यपि पुरुषादित्यान्तस्थयोरभेदपरम् । आर्थिकस्तु भेदप्रत्ययो न भेदव्यपदेशः। अत एव यत्र भेदगमकपरो भेदव्यपदेशशब्दः तत्रान्य इति पुनरुच्यते । यथोत्तराधिकरणे । वस्तुतस्तु तत्राप्यन्तरशब्दो भेदव्यपदेश इति वक्ष्यामः सुधारीत्या अर्थान्तरवर्णनमप्ययुक्तम् । अध्याहाराधिक्यात् । उक्तदूषणतौल्याच्चेति ।।

द्वैतिनः– तदपि न । भेदशब्दस्य भेदकपरत्वे भेदकधर्मस्य कण्ठोक्तत्वेन व्यपदेशशब्दस्य कण्ठोक्तत्वगमकत्वेऽपि तदविरोधात् । कण्ठोक्तत्वगमकत्वे नियामकाभावाच्च । 'अभिमानिव्यपदेशः' इत्यत्र पृथिव्यब्रवीदित्यादौ अभिमानिनीनां लक्षणया उक्तत्वेऽपि कण्ठोक्तत्वाभावेन तत्र व्यपदेशपदस्य भवद्भाष्यरीत्या दर्शनाच्च । 'इतरव्यपदेशात्' इत्यत्र इतरपदोक्तस्याभेदस्य तत्त्वमसीत्यादावभेदत्वेन कण्ठोक्तत्वाभावेऽपि भवद्भाष्यरीत्या तत्र व्यपदेशपदप्रयोगदर्शनाच्च । विज्ञानमयस्य ब्रह्मतायाः समर्थितत्वेनात्र अन्यपदस्य

भेदपरत्वाभावेन गम्यमानपरत्वकल्पनायाः युक्तत्वाच्च । बाधकाभावे ब्रह्मशब्दस्य परब्रह्मपरत्वेऽपि 'स एषो ब्रह्मण आनन्द' इत्यत्र परिमितानन्दबोधनस्यैव बाधकत्वेन ब्रह्मशब्दस्य चतुर्मुखपरत्वाच्च । प्रजापतिशब्दस्यैकवचनान्तत्वेऽपि दक्षपरत्वसम्भवेन तेन पौनरुक्त्यभावाच्च । 'तस्मात्प्रजापतिर्मुक्तो रुद्रः प्रजननेशिता । तस्माद्ब्रह्मा शतगुणो युक्त इत्येष निर्णय' इति यजुःसंहितायां प्रजापतिब्रह्मशब्दयो रुद्रचतुर्मुखपरतया व्याख्यातत्वाच्च ।

आनन्दतारतम्यपरे प्रकरणे मनुष्योत्तममारभ्य चतुर्मुखपर्यन्तं परस्पर-मानन्दतारतम्योक्तावपि तदाश्रयभेदो न सिद्ध्यतीत्यस्यापहास्यत्वाच्च । न ह्यत्र कालभेदेन एकस्मिन्नेवानन्दतारतम्योक्तिः शङ्कितुं शक्या । तथात्वे सर्षपमारभ्य मेरुपर्यन्तं परिमाणतारतम्योक्तावपि नाश्रयाणां भेद इति शङ्कितापि जायेत । परिमितानन्दसमभिव्याहृतब्रह्मशब्दस्य विरिञ्चिपरत्वे परिमितानन्द-समभिव्याहृतस्यापि तस्य सारूप्यात् तत्परत्वशङ्काया अल्पज्ञानवानयं पण्डितः बहुज्ञानवानयं पण्डित इत्यत्र श्रुतयोः पण्डितपदयोरेकव्यक्तिपरत्वशङ्काया इव सम्भवाच्च । ब्रह्मशब्दमुख्यत्वतद्धत्वभिधानाद्यनपेक्षतया भेदव्यपदेशस्योपपाद-कान्तरनिरपेक्षत्वाच्च । भेदव्याप्यहेत्वन्तराणामनेन सहेऽपि आनन्दमयस्य विष्णुत्वसाधकब्रह्मशब्दाभ्यासादिबोधकानां सूत्रान्तराणां वैयर्थ्यानापत्तेश्च । '१अदृश्येऽनात्म्येऽनिरुक्ते' इत्यादेः अनात्म्ये इत्यस्य जैवगुणविधुर इत्येतदर्थकतया स्पष्टं भेदव्यपदेशत्वाच्च । उपास्यत्वोपासकत्वादिभेदव्यपदेशस्यापि

१.तै.उ.१७.३

सत्यज्ञानानन्दशब्दार्थस्य अन्नमयादिशब्दैरनुसन्धीयमानत्वपरमान्त्र-वर्णिकसूत्रा-विषयतया पृथग्वक्तव्यत्वाच्च । अभयं यथा भवति तथा प्रतिष्ठां ध्यानं विन्दते स उपासक अभयं भगवन्तं प्राप्तो भवतीति सम्यक् ज्ञानिनः 'यदा ह्येवैष' इत्यादिनां विष्णुरूपाणां परस्परभेदविषयकमिथ्याज्ञानवत अनर्थफलस्य च प्रतीत्या उपासनाविच्छेदतदभावाभ्यां भयाभयप्रतिपादनपरत्वायोगाच्च । 'स यश्चायं पुरुष' इत्यत्रापि आदित्यपुरुषपदोपलक्षितोच्चावचजीवेषु अधिष्ठा-तुर्भगवतोऽधिष्ठानाजीवाद्भेदप्राप्त्या भेदव्यपदेशस्य त्वसम्भवाच्च । व्यपदेशशब्दोऽभिधावृत्त्या तद्वाचकपर इति तु प्रागेव निरस्तम् । द्वितीयवर्णने ब्रह्मभिन्नश्चेत्यध्याहारस्य जीवाभेदशङ्कानिरासकतया सार्थक्याच्च ।।

'कामाच नानुमानापेक्षा' इति सूत्रस्य सिद्धान्त्युक्तार्थः मार्ताण्ड-कारक्षेपस्य समाधानं च

'कामाच्च नानुमानापेक्षा' इत्यस्यापि अदृष्टेऽर्थे जीवब्रह्माभेदादौ शुष्कानु-मानापेक्षा न कार्या कामचारित्वादेवेत्यर्थः ।

विशिष्टाद्वैतिनः– श्रुत्युक्तभेदव्यपदेशविरोधेन अनुमानाभेदप्रतिपत्ति-शङ्कानुत्थानात् । कामशब्दस्य प्राकरणिकसङ्कल्पपरत्वत्यागेन यथा काम-प्रवृत्तिकत्वपरत्वकल्पनानौचित्याच्च । कामचारित्वे लक्षणाप्रसङ्गाच्च । अपेक्षाशब्दानर्थक्याच्च । अलौकिकेऽर्थेऽनुमानाप्रवृत्तेः शास्त्रयोन्यधिकरणन्याय सिद्धत्वाच्चेति ।

द्वैतिनः– तन्न । अभेदश्रुतिमूलकत्वभ्रान्त्या श्रुत्यपेक्षया दौर्बल्याभाव-भ्रान्त्या निरवकाशत्वेन वा भेदव्यपदेशविरोधेऽपि अनुमानादभेदशङ्कोत्थान-सम्भवात 'यथा कामानुमा यस्मात्तस्मात् साऽनपगा श्रुतेः' इति स्कान्दवच-नानुसारेण कामशब्दस्य यथाकामप्रवृत्तिकत्वपरत्वौचित्याच्च । भवत्पक्षेऽपि कामशब्दस्य कामादेव जगत्स्रष्टृत्वे लाक्षणिकत्वेन अस्मन्मते कामचारित्वे लक्षणायाः यथाकामेति स्मृत्यनुसारेणादोषत्वाच्च । शुष्कानुमानं क्वापि नापेक्षणीयमिति वक्तुं अपेक्षाशब्दसार्थक्याच्च । शास्त्रयोन्यधिकरणे ब्रह्मण अनुमानागोचरत्वोक्तावपि अलौकिकेऽर्थे क्वापि शुष्कानुमानाप्रवृत्तिरिति वक्तुमस्य सार्थक्याच्च ।

'अस्मिन्नस्य च' इति सूत्रार्थः

'अस्मिन्नस्य च तद्योगं शास्ति' इत्यस्यापि अस्मिन् प्रकरणे अस्येतरस्य जीवस्य तेनानन्दमयादिरूपेण ब्रह्मणा सह योगं सम्बन्धं उक्तावपि 'सोऽश्नुते' इति श्रुतिः शास्ति वक्ति यतोऽत ऐक्याप्रयोगादानन्दमयादिर्नेतर इत्यर्थः । यद्वा अस्मिन् प्रकरणे अस्य 'स एवं विदि'त्युक्तस्य ब्रह्मविदस्तैरन्नमयादिभि-र्योगफलत्वेन 'एतमन्नमयमात्मानमिति शास्ति यतोऽतश्चानन्दमयादि ब्रह्मैवेत्यर्थः ।।

विशिष्टाद्वैतिनः– मान्त्रवर्णिकसूत्रोक्तार्थकतया पुनरुक्ते तद्युक्तम् । अभयप्राप्तिहेतुत्वं तु 'तद्धेतुव्यपदेशादि'त्यनेनैवोक्तमिति तदपि न वक्तव्यम् ।

ननु आनन्दयितृत्वमेव तत्रोक्तमिति चेत् । अत्र यद्वक्तव्यं तच्छ्रुतप्रकाशिकायामुक्तम् । तद्यथा- आनन्दयितृत्वं हि मोक्षानन्दहेतुत्वम् । आनन्दश्च संसारभयनिवृत्तिपूर्वकः । तस्मादानन्दयितृवाक्यासन्नतद्वाक्योक्तमभयप्राप्तिहेतुत्वं मोक्षप्रदत्वान्तर्भूतमिति न पृथग्हेतुः । 'आनन्दयाति' इति वाक्ये आनन्दहेतुत्वमुक्तम् । ब्रह्मप्राप्तस्यैवानन्दः, अतोऽभयशब्दवाच्यब्रह्मप्राप्तिरत्रोच्यते इति चेत् । न । ब्रह्मशब्दसामानाधिकरण्याभावात् । 'अथ तस्य भयं भवति' इत्युक्तभयाभावप्राप्तेरेव 'अथ सोऽभयं गतो भवति' इत्युच्यमानत्वाच्च । अतो भयनिवृत्तिपूर्वकनिरतिशयानन्दहेतुत्वं 'तद्धेतुव्यपदेशात्' इत्यत्रान्तर्भूतमिति न पृथग्वक्तव्यमिति।

द्वैतिनः– तदपि न । सत्यज्ञानादिशब्दार्थस्य अन्नमयादिशब्दैरनुसन्धीयमानत्वस्यैव मान्त्रवर्णिकसूत्रार्थत्वेन तेनास्य अपुनरुक्तेः । अभयप्राप्तिहेतुत्वस्य तु एतत्सूत्रार्थतयाऽनुक्तत्वेन तद्धेतुव्यपदेशादित्यनेनोक्तत्वाभावेन अनुवादस्य खण्डनस्य चायुक्तेश्च । चेष्टकत्वरूपहेतुव्यपदेशस्यैव तद्धेतुव्यपदेशसूत्रार्थत्वेन आनन्दयितृत्वस्य तदर्थत्वाभावेन आनन्दयितृत्वादभयप्राप्तिहेतुत्वस्य पृथक्त्वशङ्काया तदन्तर्भावेन समाधानस्य च श्रुतप्रकाशिकोक्तस्य असङ्गतत्वाच्च । अभयशब्दस्य 'एतदमृतमि'त्यादौ ब्रह्मणि प्रसिद्धतया ब्रह्मशब्दसमभिव्याहाराभावेऽपि ब्रह्मपरत्वाच्च । 'अथ तस्य भयं भवति' इत्यत्र भयशब्दस्य तमःपरत्वात् ।

चन्द्रिकोक्तसूत्रक्रमहेतुचिन्ता

अन्नमयादिसाधारणहेतोरभ्यासात् पश्चान्मान्त्रवर्णिकगानादेस्तु पूर्वमानन्द-मयमात्रासाधारणस्य तद्धेतुव्यपदेशस्य निवेशनं तु मान्त्रवर्णिकसूत्रे आनन्दमयादिस्थब्रह्मशब्दस्य अपरब्रह्मपरत्वशङ्काया अपि मन्त्रवर्णस्थ-परत्वविशेषणेन निरासात् 'अस्मिन्नस्य च' इति सूत्रे च भेदस्य मुक्तावपि सत्त्वेन अपारमार्थिकत्वशङ्काया अपि निरासात्, अनन्तरं तद्धेतुव्यपदेशोक्तौ तन्निरासेऽपि तद्धेतुव्यपदेशो हेतुरिति शङ्का स्यात् । सा मा भूदित्येवमर्थमिति चन्द्रिकायामेव समर्थितम् ।

सिद्धान्तोक्तसूत्रक्रमे मार्ताण्डविचारविमर्शः

विशिष्टाद्वैतिनः– तद्धेतुव्यपदेश एव न वक्तव्यः । पञ्चानां ब्रह्मत्वेऽस्यानुपयोगात् । आनन्दमयमात्रासाधारणहेतोस्तत्र विशेषाकाङ्क्षाभावेन अकथनीयत्वात् । मध्ये तदभिधानं तु दूरनिरस्तम् । मान्त्रवर्णिकगानमे-वाभ्यासानन्तरं वक्तव्यम्, साधारणहेतुत्वात् । आनन्दमयादिस्थ-ब्रह्मपादीयशङ्कानिरासकत्वाच्चेति ।

द्वैतिनः– तदपि न । अनेकपक्षकैकसाध्यकसाधनस्थले पक्षविशेषे हेत्वन्तरस्यापि दर्शने तस्यापि वक्तव्यत्वात् । नहि पृथिव्यादिषु नवसु द्रव्यत्वसाधकस्य संयोगपरिमाणादेः सत्त्वे पृथिव्यादिषु पञ्चसु गन्धादिकं न वक्तव्यम् । किञ्च कण्ठोक्तशब्दस्य समानन्यायानेकशब्दोपलक्षत्वेन तत्र सर्वत्रापि

उक्तस्यैव हेतोरभावेन क्वापि हेतोरवक्तव्यत्वापातः । अपि च उपलक्षिते साधारणहेतूक्तेरस्वारस्येऽपि कण्ठोक्ते पक्षे साधारणहेतूक्तेरौचित्यम् । एवञ्च तद्धेतुव्यपदेशस्य वक्तव्ये मध्ये निवेशनं चन्द्रिकोक्तरीत्या युक्तम्।

नचैवं अभ्यासं तद्धेतुव्यपदेशं च साधकमुक्त्वाऽनन्तरं विकारशब्दादिति बाधकमुद्धर्तव्यमिति शङ्क्यम्। '[1]को ह्येवान्यादिति तद्धेतुव्यपदेशस्य आनन्दमयस्य विष्णुत्व इव प्राचुर्यं मयडर्थ इत्यत्रापि हेतुत्वात् । एतेन यावत्साधकोक्त्यनन्तरमेव बाधकमुद्धर्तव्यमिति मार्ताण्डोक्तं परास्तम् । बाधकनिरासकस्थापनेऽपि साधकस्य हेतुत्वे ततः पूर्वमेव बाधकस्य निरसनीयत्वात् । तद्धेतुव्यपदेशस्य प्राचुर्यस्थापकत्वं तु प्रागेव निरूपितम्।

'अस्मिन्' इति सूत्रस्य स्वपक्षसाधकत्वेऽपि 'नेतरः', 'भेदव्यपदेशात्' इत्याभ्यां सूत्राभ्यां परपक्षे बाधकोक्तौ भेदस्य पारमर्थिकत्वशङ्कानिरासेन परपक्षे बाधकत्वस्यापि सत्त्वात्तदानन्तर्यम् ।। नच मान्त्रवर्णिकगानेनैव तत्पारमार्थिकत्वसिद्धेः उभयोरपि मुक्तविषयकत्वाविशेषात् । अन्यथा उक्तेऽपि तस्मिंस्तच्छङ्काया दुर्वारत्वापत्तेः नैवमिति मार्ताण्डोक्तं युक्तम् । 'सत्यं ज्ञानमनन्तमिति मन्त्रवर्णलक्षितं परमेव ब्रह्मान्नमयादिशब्दानुसन्धानाद्गीयत' इति भाष्योक्तरीत्या सत्यादिशब्दानामन्नमयादिशब्दानां चैकार्थकत्वानुसन्धानेन अन्नमयादेब्रह्मत्वसाधनेऽपि भेदस्य पारमार्थिकत्वस्यानुक्तेः । 'एतमानन्दमयमात्मानमुपसङ्क्रम्य' इत्यनेन योगोक्तेरिव 'सोऽश्नुते सर्वान् कामान् सह । ब्रह्मणा विपश्चिता' इति योगोक्तेरपि अस्मिन्निति सूत्र एवोक्तेश्च ।

१. तै.उ.१६.४

तथा भेदव्यपदेशादित्यस्यानन्तरं भेदवदभेदोऽपि प्रामाणिकः । तत्र प्रत्यक्षस्या-सम्भवेऽपि 'श्रुतेश्च तद्गुणसारत्वादि'त्यत्र अन्यपरताया वक्ष्यमाणत्वेऽपि जगत्कारणस्य शास्त्रयोनित्वेऽपि तत्सार्वज्ञादौ सर्वकर्तृत्वादेरिव, विमता आत्मानः परमात्मनो न भिद्यन्त आत्मत्वात् परमात्मवदित्याद्यनुमानस्य सम्भवादिति परपक्षे साधकशङ्कायां श्रुत्यादिसाहाय्यरहितं तद्विरुद्धं चानुमानमप्रमाणम् अतिप्रसङ्गादिति 'कामादिति सूत्रेण निरस्तायामनन्तरं भेदश्रुत्यभेदानुमानयोः अपारमार्थिकपारमार्थिकविषयत्वादविरोध इति या शङ्का तस्या अपि अस्मिन्निति सूत्रेण निरासात् तस्यान्त्यत्वम् ।

नच नानुमानेनापि अभेदशङ्का । कालात्ययापदिष्टत्वात् । उक्तमान्त्र-वर्णिकगानेन भेदस्यापारमार्थिकत्वनिरासे भेदश्रुत्यभेदानुमानयोः अपारमार्थिक-पारमार्थिकविषयकत्वात् अविरोध इति शङ्कानुत्थानेन तव्द्यावर्तकतयाऽपि 'अस्मिन्निति सूत्रस्यान्त्यत्वायोग इति मार्ताण्डोक्तं युक्तम् । भेदव्यपदेशेऽपि श्रुत्यादिसाहाय्य-वत्त्वभ्रान्त्याऽनुमानशङ्कायां कालात्ययापदिष्टत्वाभावात् । मान्त्रवर्णिकगानस्य भेदास्पर्शितया तत्पारमार्थिकत्वस्य तेन सुतराम-सिद्ध्याऽविरोधशङ्काया उदयसम्भवाच्च ।

यद्यपि 'नेतर' इत्यत्रानुपपत्तेरित्यनेन हिरण्यगर्भादिजीवानां आनन्दमयत्वे तज्ज्ञानान्मोक्षानुपपत्तिरिव हिरण्यगर्भादीनां आनन्दमयाद्भेदव्यपदेशानुपपत्तिरपि विवक्षितुं शक्या । तथापि जीव एवानन्दमयो न ब्रह्मेति वदता पूर्वपक्षिणा

पूर्वाङ्गीकृतं जीवब्रह्मभेदं त्यक्त्वा जीवानामानन्दमयत्वेऽपि जीवचैतन्यस्य ब्रह्मचैतन्याभेदात् जीवतत्त्वज्ञानेनापि मोक्षोपपत्तिरिति प्रकारान्तरे वा शङ्किते तच्छङ्काया अपि जीवानन्दमययोरिव जीवब्रह्मणोरपि भेदं कथयता 'भेदव्यपदेशात्' इत्यनेन निरासाय भेदव्यपदेशः पृथगुक्तः । अत्र एव 'भेदेति सूत्रमत्र टीकायां हिरण्यगर्भादिजीवानां आनन्दमयत्वनिरासकतया व्याख्याय सुधायां जीवब्रह्माभेदनिरासकतया व्याख्यातम् । अत एव च 'कामादि'ति. सूत्रे जीवब्रह्माभेदानुमाननिरासः । भाष्ये च 'न च तत्त्वमसि' इत्यादिना जीवब्रह्माभेदश्रुतिगत्युक्तिः, अनुव्याख्याने च–

'[१]न जीवभेदसूत्राणां शङ्क्यात्र पुनरुक्तता ।
वाक्यान्तरद्योतकत्वात् पृथगित्यत्र पूर्णता ।।'

इति भेदेत्यस्य सूत्रस्य अन्तरधिकरणादिस्थैः 'भेदव्यपदेशाच्चान्य' इत्यादिजीवेश्वराभेदनिरासकैः पौनरुक्त्याशङ्का समाधानं च सङ्गच्छत इति । अत्र 'भेदव्यपदेशादिति सूत्रस्यैवाभावमाशङ्कमानत्वात् तदन्यथासिद्धिव्या-वर्तकतया सूत्रान्तरसार्थक्योपपादनासम्भव इति मार्ताण्डोक्तं निरस्तम् । उक्तरीत्या 'भेदव्यपदेशादि'ति सूत्रस्य सार्थक्यात् ।। न च मान्त्रवर्णिकगानोप-ष्टब्धब्रह्मशब्दाभ्यासेन आनन्दमयस्य ब्रह्मत्वे सिद्धे तद्भेदव्यपदेशे च सति ब्रह्माभेदशङ्कानुपपत्तेः । अन्यथा तदभिधानस्य इहोपयोगायोग इति मार्ताण्डोक्तं युक्तम् । स्वपक्षसाधकबाधकोद्धारपरपक्षबाधकसाधकनिरासरूपोपाय-

१.अ.नु.१.१.१९

चतुष्टयेनैवाभिमतस्य सम्यनिर्णयसिद्धेः परपक्षबाधकसमर्थनमन्तरा आनन्दमयस्य ब्रह्मत्वस्यैवासिद्धेः । तद्भेदव्यपदेशे सत्यपि अभेदानुमानेन तदन्यथासिद्धिशङ्कनाच्च । अभेदमवष्टभ्य मोक्षसाधनज्ञानविषयत्वस्यान्यथोपपत्तिशङ्कावत् मान्त्रवर्णिकगानब्रह्मशब्दयोरपि तच्छङ्कनेन तद्बलादानन्दमयस्य जीवत्वनिरासेन ब्रह्मत्वासिद्धेश्च । तस्मात् पूर्वपक्षसिद्धान्तप्रकारो निराबाधः

चन्द्रिकोक्तपूर्वपक्षसिद्धान्तप्रकारयोः मार्ताण्डविमर्शानुवादः

किञ्च ब्रह्मशब्दाच्छतानन्दत्वप्रसिद्धेः चतुर्मुख एवात्र आनन्दमय इति पूर्वपक्षस्तावदयुक्तः । पुल्लिङ्गान्तब्रह्मशब्दस्यैव चतुर्मुखवाचितया 'असद्ब्रह्म' इति नपुंसकान्तस्य तत्परत्वशङ्कानुत्थानात् । असदिति नपुंसकविशेषणेन ब्रह्मशब्दस्य नपुंसकत्वनिश्चयात् । असन्निति हि तदा भाव्यम् । न च छान्दसो लिङ्गव्यत्ययः सति सम्भवे कल्पयितुं युक्तः । '[1]प्रास्मा अग्निं भरत' इति अध्रिगुप्रेषस्य पशुधर्मसामानविध्ये मेष्यां निवृत्तिरिति सिद्धान्तासिद्धिप्रसङ्गात् । छान्दसत्वेन तत्रापि पुल्लिङ्गतानिर्वाहसम्भवात् । जातिजीवादिसाधारणस्य तस्य चतुर्मुखपरत्वानिश्चायकत्वाच्च । विद्वद्योगेन तस्य परब्रह्मतायाः प्रथमद्वितीयाधिकरणयोरेव निश्चयेन इह अपरब्रह्मपरतया पुनश्शङ्काऽनुत्थानाच्च । 'गौणश्चेन्नात्मशब्दात्' इति परमात्मासाधारणतया निर्णीतात्मशब्दविरोधेन शङ्काऽनुत्थानाच्च । तदाक्षेपेणैतदुत्थाने च तत्स्थापकस्यैतस्यापि तद्वदुपोद्घातत्वापत्तेश्च । एतेन 'तद्विजिज्ञासस्व' इत्यत्रेव इह रूढिभञ्जककारणत्वाद्यभावात् न तद्भङ्ग इति कल्पनापि निरस्ता।

१.शा.दी. ९.१.१६

'यवमयश्चरुर्भवति' 'आदित्यः प्रायणीयः पयसि चरुः' इत्यादौ 'यत्रान्या ओषधयो म्लायन्त अदितिमोदनेन' इत्यादिवाक्यशेषबलात् दीर्घशूकौदनादिपरत्वे सति तद्रहितेऽन्यत्रापि वैदिकप्रसिद्ध्या तस्यैव ग्रहणवत् इहापि तद्ग्रहणौचित्याच्च । कारणविषयकात्मशब्दस्योपक्रमावगतस्य इहापि सत्त्वाच्च । 'सोऽकामयत' इत्यानन्दमयपरामर्शेन इहापि कारणत्वाभिधानाच्च । अत एव शतानन्दत्वप्रसिद्धिः तत्सहकारिणीत्युक्तमिति चेन्न । 'स एको ब्रह्मण आनन्द' इत्येकत्वोक्तिविरोधेन तत्प्रसिद्ध्यप्रतिज्ञानात् । 'ते ये शतं प्रजापतेरानन्दाः' इत्यन्यस्यैव हि तदुच्यते । नन्वन्यस्य शतानन्दा एतस्यैक आनन्दः इत्युक्ते अर्थाच्छतानन्दत्वमपि लभ्यत इति चेत् । किञ्चातः । तद्धि देवतादिसाधारणं तत्रावगतम् । तत्तदकामहतश्रोत्रिय-साधारणञ्च । अतो न तेनापि निर्णयः।

किञ्च 'यतो वाचो निवर्तन्ते' इति मनोमये पठितस्यैव श्लोकस्य इहापि पाठात्, तत्र च पूर्वोत्तरनपुंसकब्रह्मशब्दसमभिव्याहारात् शतानन्दत्वस्य च साधारणत्वान्न ताभ्यां चतुर्मुखत्वशङ्का । ननु न ब्रूमो वयं शतानन्दत्वमत्रोच्यत इति । किन्तु शतानन्दत्वप्रसिद्ध्या आनन्दमयश्चतुर्मुख एवेति ब्रम इति चेत् । प्रतिब्रूमो वयम्, शास्त्रस्थानुगृहीतब्रह्मशब्दप्रसिद्धिविरोधात् एकानन्दत्व-श्रुतिविरोधाच्च न शतानन्दत्वप्रसिद्धिरनुरोद्धव्येति ।।

यदपि 'स यश्चायं पुरुषे, यश्चासावादित्ये' इति सूर्ये प्रोक्तत्वात्, रुद्रो वा आनन्दमय इति । तदपि न । सूर्यान्तर्वर्तित्वस्य रुद्रासाधारण्यासिद्धेः । न

चाष्टमूर्तित्वाभिव्यञ्जकं तदिति कल्पना युक्ता । मूर्त्यष्टकानन्तर्गतपुरुषसाहित्येन तत्प्रतिबन्धात् । पुरुषपदस्य उपासकपरस्य दीक्षितमात्रपरत्वे च नास्ति कल्पकम् । ब्रह्मशब्दविरोधाच्च । आनन्दमीमांसायामस्पृष्टस्य आनन्दमयत्वानुपपत्तेश्च । कारणत्वस्य प्राग् रुद्रवृत्तित्वनिरासेन कारणवाच्यात्मशब्दितस्य रुद्रत्व-शङ्कानुत्थानाच्च । अन्तरादित्यविद्यायां आदित्यान्तर्वर्तिनः पुण्डरीकाक्षत्वाम्नानेन तस्य विष्णवसाधारण्याच्च । शारीरश्रुत्या जीवमात्रशङ्कायां सत्यां तदुपेक्षाहेत्वभावाच्च ।

एतेन बृहस्पत्यादिपरत्वशङ्कापि दूरोत्सारिता । तदसाधारणहेत्वदर्शनाच्च । साधारणेन ब्रह्मशब्देन प्रकृत्यादिपरत्वशङ्कापि अत एव निरस्ता । तदसाधारण्य-स्यासिद्धत्वात् । आत्मविपश्चिच्छब्दादिविरोधेन अचित्पूर्वपक्षानुत्थानाच्च । 'सोऽकामयत' इति चिद्धर्मकामनाविरोधेन बहुरूपत्वलिङ्गमात्रस्य तदनुपष्टम्भ-कत्वाच्च । अतो जीवमात्रपूर्वपक्ष एव भाष्योक्तः शारीरत्वादिलिङ्गको युक्तः । न त्वन्नमयादिविकारप्रायपाठः प्रामाणकः । प्रायपाठस्य प्रमाणानुग्राहकत्वेऽपि स्वयमप्रमाणत्वात् । अत एव 'विकारशब्दान्नेति चेत्' इति तस्य ब्रह्मत्वाभावहेतु-तयैव शङ्का कृता । न तु जीवत्वसाधकतया । अचित्साधारणत्वादतिप्रसङ्गित्वादिति ।।

मार्ताण्डविमर्शपूर्वकं चन्द्रिकोक्तपूर्वपक्षसिद्धान्तप्रकारयोः युक्ततरत्वसमर्थनम्

द्वैतिनः– तन्न । पूर्वपक्षसिद्धान्तप्रकारयोः समर्थितत्वात् । 'तस्मादेतद्ब्रह्म

नामरूपमन्नं च जायत' इत्याथर्वणे जनिलिङ्गेन 'एतद्ब्रह्म चतुर्मुख' इत्यस्मद्भाष्यव्याख्यानेन च 'स एनान् ब्रह्म गमयति' इत्यत्र चतुर्मुखपरत्वस्य 'कार्यं बादरिरसङ्गत्युपपत्तेः' इति सूत्रकृता बादरिमतत्वेनोक्तत्वेन च नपुंसकलिङ्गब्रह्मशब्दस्यापि चतुर्मुखपरत्वसम्भवेन किञ्चेत्यारभ्य पुल्लिङ्गतानिर्वाहसम्भवादित्यन्तस्य प्रलापस्यापहास्यत्वाच्च । जात्यादिसाधारणस्यापि चतुर्मुखे शक्तिविशेषेण क्षेत्रज्ञसाधारणस्याप्यात्मशब्दस्य विष्णौ शक्तिविशेषेणेव निश्चायकत्वसम्भवाच्च । विद्वद्योगेन परब्रह्मपरताया निश्चयेऽपि तत्र बाधकेन रूढ्या चापरब्रह्मपरतया पुनः शङ्कोत्थानाच्च । आत्मशब्दस्य 'यो गुणैः सर्वतो हीन' इत्यादिना भगवदसाधारणतया निर्णीतस्यापि बाधकदर्शने मुख्यवृत्त्याऽन्यत्रापि सम्भवेनान्यपरत्वशङ्काविरोधकत्वाच्च । अन्यथा त्वन्मतेऽप्यात्मशब्दविरोधेन शारीरत्वेनापि जीव इति पूर्वपक्षानुत्थित्यापाताच्च । 'गौणश्चेदिति सूत्रोक्तदिशा आत्मशब्दस्य परमात्मनि मुख्यतामुपेत्यैव अत्र बाधकवशेन पूर्वपक्षोदयेन अस्याधिकरणस्योपोद्घाततत्वानापत्तेश्च । 'तद्विजिज्ञासस्व' इत्यत्रेव रूढिभञ्जककारणत्वाद्यभावाच्च ।।

यवचर्वादिशब्दानां दीर्घशूकोदनादौ आर्यप्रसिद्धेः, वाक्यशेषस्य च सत्त्वेनान्यत्र तद्ग्रहणे बाधकाभावेन म्लेच्छप्रसिद्ध्याद्यनादरेऽपि ब्रह्मशब्दस्यान्यत्र रूढेरेव सत्त्वेन तद्वैषम्याच्च । कारणे उपक्रमावगतस्याप्यात्मशब्दस्य बाधकवशादिहान्यपरत्वसम्भवाच्च । 'सोऽकामयत' इत्यानन्दमयपरामर्शन कारण-

त्वाभिधानेऽपि चतुर्मुखस्यापि तत्सम्भवाच्च । शतानन्दत्वप्रसिद्धेश्चतुर्मुखपरत्वे सहकारित्वाच्च । '[1]ते ये शतं प्रजापतेरानन्दाः स एको ब्रह्मण आनन्द' इत्यनेन 'पुरुषस्य यानि दश प्रमाणानि तान्येकं प्रमाणं परिखाया' इत्यनेन पुरुषदशगुणित-प्रमाणत्वस्येव प्रजापतिशतगुणितानन्दत्वस्यैव लाभेन एकत्वोक्तिविरोधेन तत्प्रसिद्ध्यप्रत्यभिज्ञानोक्तेरसम्भवदुक्तिकत्वाच्च । शतानन्दत्वस्य देवादिसाधारण्येऽपि शतानन्दतारतम्यविश्रान्त्यधिकरणतया

'चतुर्मुखः शतानन्दो ब्रह्मणः पद्मभूरिति ।
उग्रो भस्मधरो नग्नः कपालीति शिवस्य च ।
विशेषनामानि ददौ स्वकीयान्यपि केशवः ।।'

इत्यादिप्रमाणबलेन च तस्यैव शतानन्दत्वप्रसिद्धेश्च । तत्तदकामहत-श्रोत्रियस्य शतानन्दत्वसाधारण्यस्य त्वनुभवविरुद्धत्वेनापहास्यत्वाच्च । 'यतो वाचो निवर्तन्ते' इति मनोमये पठितस्य श्लोकस्य तत्र नपुंसकब्रह्मशब्दसमभि-व्याहृतस्येह पाठेऽपि नपुंसकस्य चतुर्मुखे व्युत्पादितत्वेन तस्याबाधकत्वाच्च । शतानन्दत्वस्य असाधारण्यस्याप्युपपादितत्वाच्च । शतानन्दत्वस्यात्राश्रयणेऽपि आनन्दमयशब्दस्यानन्दप्राचुर्यवाचिनः शतानन्दत्वप्रसिद्ध्या चतुर्मुखे औचित्याच्च । ब्रह्मशब्दस्य च चतुर्मुखे रूढत्वेन तत्प्रसिद्धिविरोधाभावाच्च । एकानन्दत्वश्रुतेः शतानन्दत्वे पर्यवसानस्योक्तत्वेन तद्विरोधाभावाच्च । तस्माच्चतुर्मुखपरत्वेन पूर्वपक्षो युक्तः।। ।

१.तै.उ.९१

'स यश्चायं पुरुषे यश्चासावादित्ये' इति सूर्ये प्रोक्तत्वात् तस्य चाष्टमूर्तित्वव्यञ्ज-कत्वात् रुद्रविषयकपूर्वपक्षस्यापि युक्तत्वाच्च । पुरुषपदस्य दीक्षितसाधारणस्य रुद्रप्रतीत्यविरोधित्वाच्च । ब्रह्मशब्दस्य जीवसाधारण्येन तस्याप्यविरोधित्वाच्च । प्रजापतिशब्देन रुद्रस्योक्ततया आनन्दमीमांसायामस्पृष्टत्वोक्तेरयोगाच्च । आत्मशब्दस्य कारणे प्रयुक्तत्वेऽपि अकारणे रुद्रे जीवत्वेन रूढ्या सम्भवेन रुद्रत्वशङ्कानुत्थापकत्वायोगाच्च । अन्तरादित्यविद्यायाम् आदित्यान्तवर्तिनः पुण्डरीकाक्षत्वाम्नानेन तस्य विष्णुत्वेऽपि तत्र बाधके रुद्रोपस्थितिसम्भवाच्च । चतुर्मुखादिदेवताविशेषपरत्वेन पूर्वपक्षसम्भवे शारीरत्वश्रुत्या जीवमात्रपरत्वेन पूर्वपक्षस्य प्रथममुपेक्षाया एवौचित्याच्च । तत्परत्वेनापि पूर्वपक्षस्य भाष्ये कृतत्वाच्च ।

'तस्यै विश स्वयमेवानमन्ति यस्मिन् ब्रह्मा राजनि पूर्व एति' इत्यादौ बृहस्पत्यादौ ब्रह्मशब्दप्रयोगेण ब्रह्मजातिप्रवर्तकत्वेन च ब्रह्मशब्दादिना बृहस्पत्यादिविषय-कपूर्वपक्षस्यापि सम्भवाच्च । 'मम योनिर्महद्ब्रह्म', 'पञ्चभिः पञ्चभिर्ब्रह्मे'त्यादौ चिदचित्प्रकृत्योरपि ब्रह्मशब्दप्रयोगेण शक्त्यन्तरकल्पनया तद्विषयकपूर्वपक्षस्यापि सम्भवाच्च । 'अहं सोममाहनसं बिभर्मि' इत्यादौ अभिमन्यमानधर्मस्याहन्यमानत्वस्य अभिमानिनीव आत्मविपश्चिच्छब्दा-देरभिमन्यमानाचिति सम्भवाच्च । बहुभावलिङ्गेन अचित्पूर्वपक्षोपष्टम्भे 'सोऽकामयत' इति चिद्धर्मकामनादेः 'वृष्टिप्रतीक्षाः शालयः वर्षेण बीजं

प्रतिसञ्चहर्षे' त्यादाविवा-विरोधकत्वाच्च । शारीरत्वलिङ्गकजीवमात्रपूर्वपक्ष स्यान्यत्र निरस्तत्वाच्च । उक्तप्रापकबलेनोक्तपूर्वपक्षेषु साक्षादभिमन्यमानद्वारा वा सम्भावितस्य विकारप्रायपाठस्यानुग्राहकत्वाच्च । प्राचुर्यविकारार्थकत्वस्य सन्देहे विकारप्रायपाठस्य निर्णायकत्वाच्च । अस्मन्मतेऽपि विकारसूत्रे ब्रह्मत्वे बाधकस्यैवाशक्यनिरासोपगमाच्च । तस्माद्यत्किञ्चिदेतत् ।।

विशिष्टाद्वैतिनः– किञ्चानन्दविकारत्वोक्त्या आनन्दात्मकं वस्त्वन्तरं प्रकृतिभूतमुक्तं स्यात् । तदेव च ब्रह्म स्यात् । तस्यैव पुनरवयवत्वोक्त्या आनन्दमयस्याब्रह्मत्वोक्तिविरुद्धा स्यात् । एतेन ब्रह्मश्रुत्यनुग्राहकः प्रायपाठ इत्याशापि प्रत्युक्ता । अन्नादिविकाराभिमानिजीवप्रायपाठात् आनन्दमयो जीव इत्यप्यत एव निरस्तम् । प्रायपाठाच्छ्रुतेर्बलीयस्त्वेन ब्रह्मात्मश्रुत्यादिभिः तद्बाधस्यैवौचित्याच्च । न च पुच्छत्वोक्त्या श्रुतिभङ्गः । स्वाभेदेन तदविरोधस्य सिद्धान्तवदुपपत्तेः । अत एव न जिज्ञास्यत्वविरोधोऽपि । अवयवावयविना-ऽब्रह्मशब्दस्य श्रुत्या भेदोन्नयनाच्च । विशेषेणाभेदेऽपि भेदव्यपदेशोपपत्तेश्चेति ।।

द्वैतिनः– तदपि न । ब्रह्मणो निर्विकारत्वेन प्रकृतिभूतस्य जडत्वप्राप्त्या ब्रह्मत्वाप्राप्तेः । ब्रह्मणोऽवयवत्वोक्त्या आनन्दमयस्य अब्रह्मत्वोक्तेविरुद्धत्वाभावाच्च । ब्रह्मश्रुतेर्ब्रह्मप्रापकत्वेन विकारप्रायपाठस्य तद्विरुद्धत्वेन ब्रह्मश्रुत्यनुग्राहकप्रायपाठ इत्येतन्नोक्तमेवास्माभिः । भवतु वा ब्रह्मश्रुत्या चित्प्रकृतिपूर्वपक्षे विकार-प्रायपाठोऽनुग्राहकः । अन्नादिविकाराभिमानिजीवप्रायपाठात् आनन्दमयो जीव इत्यपि युक्तमेव । ब्रह्मात्मश्रुत्यादेर्बलीयस्त्वेऽपि बाधकवशेन जीवे सावकाशतया

च प्रायपाठात्तद्बाधस्यौचित्यात् । पुच्छत्वोक्त्या श्रुतिभङ्गाच्च । अत एव जिज्ञास्यत्वाक्षेपोऽपि । अवयवावयविनोर्ब्रह्मणि भेदाभावः । ऐश्वर्यादवयवावयविभावाविरोधः । विशेषेणाभेदेऽपि भेदव्यपदेशोपपत्तिरित्येतदादिकं च सिद्धान्तप्रमेयम् । न ह्येतदालब्म्य पूर्वपक्षानुपपत्तिर्वाच्या । तथात्वे पूर्वपक्षी बाधकोद्धारं सैद्धान्तिकमालम्ब्य सर्वत्रापि तदनदयापत्तेः । अवयवावयविनोर्ब्रह्मशब्दश्रुत्या भेदोन्नयनं तु न युक्तम् । रुद्रादिपूर्वपक्षे आनन्दमये ब्रह्मशब्दस्यानुपस्थितेः । कर्णस्यायं कर्ण इत्यादावेकश्रुतावप्यवयवावयविभावेन भेदस्यैव प्राप्तेः।।

विशिष्टाद्वैतिनः– सिद्धान्तेऽपि न त आनन्दमयशब्देनोच्यन्त इति न्यूनम् । अन्नमयादेरपि ब्रह्मताया इष्टत्वात् । ब्रह्मशब्दाभ्यासहेत्वनन्वयस्तूक्त एवेति ।

द्वैतिनः– तदपि न । आनन्दमयशब्दस्य सौत्रस्योपलक्षणत्वेन भाष्यस्थपदस्याप्युपलक्षणत्वात् । 'पदैः सूत्रानुकारिभिरि'ति भाष्यलक्षणाच्च । ब्रह्मशब्दाद्धिरण्यगर्भस्य प्राप्तिरित्यादिना आनन्दमयविषय एव पूर्वपक्षस्य कृतत्वेन आनन्दमयपदमात्रोक्तेर्युक्तत्वाच्च । अन्नमयादेस्तु ब्रह्मतायाः समानन्यायेनैव सिद्धत्वात् । ब्रह्मशब्दमान्त्रवर्णिकगानयोगशासनरूपसाधारणहेतूपन्यासेन सूचितत्वाच्च । 'अन्नादीनां च प्राचुर्यमेवे'ति भाष्येणान्नमयादेर्ब्रह्मत्वलाभाच्च । ब्रह्मशब्दाभ्यासरूपहेत्वन्वयस्तु अभ्यासपदस्याम्नानमात्रपरत्वात्,

विज्ञानमयानन्दमयाभिप्रायकत्वात्, आत्मशब्दाद्यभिप्रायकत्वाच्च युक्त इत्युक्तं मा विस्मार्षीः ।

ब्रह्मशब्दस्य विष्णुपरत्वे भाष्योक्तयुक्तीनां मार्ताण्डे विमर्शः

विशिष्टाद्वैतिनः– यत्तु ब्रह्मशब्दस्य विष्णुपरतायां '[१]तदेव ब्रह्म परमं कवीनाम्' इति सावधारणश्रुतिः प्रमाणम् । तत्र तच्छब्दस्य विष्णुपरत्वे 'यमन्तः समुद्रे' इत्युक्तं समुद्रस्थत्वलिङ्गम् । तत्साधारण्यशङ्कायां 'तन्नो विष्णुः प्रचोदयात्' इत्युक्तिर्नियामिका । 'तन्नो रुद्र' इत्यपि दर्शनात् ततोऽप्यनिर्णयशङ्कायां 'यो देवानां नामधा एक एव' इत्यादिना विष्णोः सर्वनामधारकत्वोक्त्या रुद्रशब्दस्यापि तत्परत्वेन तन्निरासः । तेषामपि वाक्यानां समाख्यावशादत्यपरत्वशङ्कायां 'अजस्य नाभावध्येकमर्पितम्' इति पद्मनाभत्वलिङ्गात् तन्निरासः । अजस्य नाभावर्पितमेकं पद्मवेति कुतो निर्णय इत्याशङ्कायां 'अजस्य नाभाविति यस्य नाभेरभूच्छुतेः पुष्करं लोकसारम्' इति स्कान्दवचनात् तन्निरासः । विश्वकर्मश्रुत्या लिङ्गबाधः किं न स्यादिति शङ्कायां 'परो दिवा पर एना पृथिव्या' इति लक्ष्मीसूक्तसमाख्यासहितेन लिङ्गेन श्रुतिबाधकल्पनया तद्व्युदासः । तत्रापि विष्णुपरत्वाभावशङ्कायां 'मम योनिरप्स्वन्तःसमुद्र' इति लक्ष्म्याः स्वकारणत्वेन गृहीतस्य समुद्रस्थत्वेनाभिधानात् तन्निराकरणम् । तत्कारणं चतुर्मुखादि किं न स्यादिति शङ्कायां 'यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं सुमेधाम्' इत्यादिना चतुर्मुखादेस्तदधीनत्वबोधनात् अर्थात् विष्णुरूपं तदिति निश्चीयत

१.मा.ना.उ.१.६

इति कल्पनम्, तत्तु हनुमत्पुच्छसच्छायं हनुमद्भाष्यत्वसूचनमात्रफलकं न युक्तिव्यवस्थापकमिति विभावयन्तु पण्डिताः । 'योनिष्ठ इन्द्र' इत्यादाविव योनिशब्दस्य स्थानमात्रपरत्वशङ्कायाः कारणपरत्वेऽपि कार्यरुद्रातिरिक्तो-त्तीर्णशिवपरतायाश्च तत्रापि सम्भवात्, समुद्रस्थत्वस्य साधारण्यशङ्कायाः प्रागेव कृतत्वेन तेन तद्व्यावृत्तेरयोगादिति ।।

उक्तमार्ताण्डविमर्शपुरःसरं भाष्योक्तयुक्तीनां युक्ततरत्वस्थापनम्

द्वैतिनः– तदप्ययुक्तम् । किं विष्णोः परम्परानपेक्षं ब्रह्मशब्दशब्दार्थ-तासाधकं प्रमाणं नास्तीति तात्पर्यम् । यद्वा तादृशं भगवत्पादै!पन्यस्तमिति । अथ वोक्तपरम्परासापेक्षोक्तश्रुत्युदाहरणमन्याय्यमिति । नाद्यद्वितीयौ । एवमेव ब्रह्मेत्याचक्षते', 'वासुदेवात्परः को नु ब्रह्मशब्दोदितो भवेत् । स हि सर्वगुणैः पूर्णस्तदन्ये तूपचारतः। ब्रह्मशब्दः परे विष्णौ नान्यत्र क्वचिदिष्यते' इत्यादिश्रुतिस्मृतीनां सत्त्वात् । भगवत्पादैत्रान्यत्र चोदाहृतत्वाच्च । नापि तृतीयः । मीमांसायां प्रसक्तानुप्रसक्तयुक्तिसाधकयुक्तिपरम्पराविचारस्य गुणत्वात् । अन्यथा त्वद्भाष्योक्तरीत्या ईक्षतिसाधकात्मशब्दोपन्यासस्य सूत्रेऽसामञ्जस्यापत्तेः । प्रसाध्यकाङ्क्षानुमानस्य शास्त्रेऽयुक्तत्वापातात् ।

किञ्च हनुमत्पुच्छसच्छायत्वमपि न हनुमद्भाष्यत्वसूचनमात्रफलकम । किन्तु वर्धमानपुच्छस्य परस्परसम्बन्धलङ्कानानागेहदाहकत्ववत् तादृशशा-मोहदाहकत्वसूचनफलकमपि । तथाहि । 'तदेव ब्रह्म परममि'त्यत्र

तच्छब्दपरामृष्टस्य नारायणत्वे 'ऋचोऽक्षरे परमे व्योमन्', 'अक्षरं ब्रह्म परमम्' इत्यादिश्रुतिस्मृतिषु भगवति प्रसिद्धस्याक्षरनाम्नः 'मम योनिरप्स्वेति 'तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तमे'त्यादिश्रुतिस्मृतिषु विष्णुलिङ्गत्वेन प्रसिद्धस्य मूलप्रकृतिकारणत्वस्य च 'यदक्षरे परमे प्रजाः', 'यतः प्रसूता जगतः प्रसूती' इति च श्रवणेन सिद्धेऽपि समुद्रन्तःस्थत्वस्य साधकतया कीर्तनं तत्साधारण्यशङ्कादाहाय । तत्साधारण्ये 'महोदधिशयोऽन्तक' इत्यादिप्रसिद्ध्या सुनिरासेऽपि 'तन्नो विष्णुरिति पूर्ववाक्योदाहरणं तर्हि रुद्रादेरपि स्यादिति शङ्कादाहोपक्षेपाय । तच्छङ्कायामपि 'नामानि सर्वाणि यमाविशन्ति' इति श्रुत्या निरासायामपि 'यो देवानां नामधा एक एव' इति श्रुत्युदाहरणं तस्य विश्वकर्मविषयत्वशङ्कादाहोपक्षेपाय । विश्वकर्मपरत्वशङ्कायामपि 'नामानि विश्वाभि न सन्ति लोक' इत्यादिना सर्वनामधारकत्वस्य विष्णोरन्यत्र निरवकाशत्वेन विश्वकर्मशब्दस्य योगेन सावकाशत्वेन च सुनिरासायामपि 'अजस्य नाभाविति वाक्योदाहरणं नाभावर्पितं पद्ममेवेति कुत इति शङ्कादाहोपक्षेपाय । तस्यामपि 'न हि प्रसिद्धार्थं विनाऽन्योऽर्थो युज्यत' इति न्यायेन. 'अजस्य नाभावि'ति 'यस्येति स्मृत्या च निरस्तायामपि पुनः 'परे दिवा पर एना' इति सूक्तसमाख्याकथनं तत्राप्यन्यपरत्वशङ्कादाहोपक्षेपाय तस्यामपि शङ्कायां लक्ष्मीकारणत्वेन नारायणशब्दार्थानुसन्धानेन च निरस्तायामपि चतुर्मुखादिपददातृत्वेन तन्निराकरणं शङ्कागेहप्रज्वलनायेति

अल्पमेतन्मयोक्तम् । पण्डितास्त्वितोऽपि बहुप्रयोजनानि विभावयन्ति । 'कृणोमि' इति स्वस्य कारणत्वस्य प्रकृततया योनिशब्दस्य कारण त्वार्थकतया स्थानार्थकत्वकथनं तु व्यर्थात् समुत्थमेव । कार्यरुद्रातिरिक्त कारणरुद्र-परतोत्कीर्तनं तु विष्णुभक्तं मन्यमानस्य प्रायश्चित्तावहम् । परमशिवस्वरूपं तु परतत्त्वप्रकाशिकादौ निरस्तम् । मया च कुलिशे पाशुपताधिकारे । समुद्रस्थत्वस्य निरवकाशस्य उक्तप्रयोजनाय साधारण्येन शङ्कितस्यापि प्रसिद्धिसूचितत्वादिना लक्ष्मीकारणत्वसाहाय्येन च निरवकाशस्यान्ते कीर्तनं युक्तमेव ।।

ब्रह्मशब्दस्य महायोगविद्वद्रूढिभ्यां विष्णुपरत्वात् । तदभ्यासस्यैव हेतुत्वस्थापनम् ।

अत्र ब्रह्मशब्दस्य तदेव ब्रह्म', 'ब्रह्मशब्दः परे विष्णौ नान्यत्रे'-त्यादिश्रुतिस्मृतिषु अन्यत्र निरासेऽपि प्रयोगादिसद्भावेन सर्वथा तन्निरासायोगेन महायोगविद्वद्रूढिरूपपरममुख्यवृत्तिनिरास एव तात्पर्येण अन्यत्राज्ञरूढ्यादि-सद्भावेऽपि ब्रह्मशब्देन आनन्दमयादेब्रह्मत्वनिर्णय इति सिद्धान्तस्थितिः ।।

विशिष्टाद्वैतिनः– 'ब्रह्मशब्दः परे विष्णौ नान्यत्र क्वचिदिष्यते' इति स्मृतिस्तु प्रत्यक्षविरुद्धा । अन्यत्रापि ब्रह्मशब्दप्रयोगस्य सर्वेष्टत्वात् । रूढ्या नेष्यत इत्यर्थ इति चेत् तर्हिपूर्वपक्षोत्थानं न स्यात् । अज्ञरूढिरियं न विद्वद्रूढिरिति चेन्न असम्पूर्ण इति हेतूक्तिविरोधेन स्मृते रूढिविषयत्वायोगात् । सा हि

बृहधात्वर्थपूर्णतानिमित्तकत्वेन यौगिकत्वमावेदयति । अस्तु तावतैव निर्णयः स्यादिति चेत् । मैवम् । योगाद्रूढेबलीयस्त्वात् । अज्ञाश्रयत्वात् सा दुर्बलेति चेत् । 'बृहजातिजीवे'त्यनुशासनस्याज्ञमात्राश्रयत्वायोगात् । स्वरूपप्राबल्यस्य आश्रयदौर्बल्येन अनपहवस्य प्रागुक्तत्वाच्च । 'ब्रह्मेति परमात्मेति भगवानिति शब्द्यत' इत्युक्त्या रूढिरपि सिद्ध्यतीति चेत् । कथं तर्हि ब्रह्मश्रुत्यैव पूर्वपक्षोत्थानम् । किञ्चैवमभ्यासहेतूक्तिरपि व्यर्था स्यादिति दिगिति ।।

द्वैतिनः– तदत्यन्तायुक्तम् । नान्यत्रेत्यस्य परममुख्यवृत्त्यभावे तात्पर्येण प्रत्यक्षविरोधाभावात् । अज्ञरूढ्या पूर्वपक्षोत्थानसम्भवात् । 'असम्पूर्णा' इति हेतूत्त्या महायोगसूचनेऽपि 'एतमेव ब्रह्मेत्याचक्षते' इति श्रुत्या विद्वद्रूढेरपि लाभेन तदनपायात् । महायोगस्य अज्ञरूढ्यपेक्षया प्राबल्याच्च । बृहजातिजीवेत्यनुशासनस्य विद्वत्सम्मतत्वेऽपि अज्ञानां गोशब्दस्य धेनोरन्यत्रेव विदुषां ब्रह्मशब्दस्य विष्णोरन्यत्र तादृशप्रयोगबाहुल्याभावेन विद्वद्रूढ्यभावात् । योगस्य श्रौतत्वेन स्वरूपप्रबलरूढ्यपेक्षया प्राबल्यस्य आज्यादिशब्दे दर्शनाच्च । 'ब्रह्मेति परमात्मेति' इति स्मृत्या विद्वद्रूढिसिद्धावपि तदज्ञानेनाशरूढ्या पूर्वपक्षसम्भवाच्च । एतादृशब्रह्मशब्दाभ्यासस्य सुतरां निर्णायकत्वेन तस्य हेतुत्वसम्भवाच्च ।

अन्नमयादिचतुर्वपि मयटः प्राचुर्यार्थत्वं न लगतीति मार्ताण्ड-विचारानुवादः

यत्तु- यदपि 'तादात्म्यार्थे विकारार्थे प्राचुर्यार्थे मयट् त्रिधा' इति प्रमाणमुदाहृत्य विकारत्वविकाराभिमानित्वाभ्यां मयडिति कल्पनम्, तत्र विकाराभिमानित्वे मयडित्यनाकरम् । 'तस्य विकार' इत्यधिकारस्य विकाराभिमानिपर्यन्तताया: केनाप्यनुक्तेरननुभवाच्च । अन्नमयादावपि प्राचुर्योपपादनमयुक्तम् । अन्नप्राचुर्यस्य ब्रह्मण्यसम्भवात्। 'अद्यतेऽत्ति च भूतानि' इति निर्वचनात् अन्नशब्दो ब्रह्मपर एवेति कल्पनं तु 'ओषधीभ्योऽन्नम्' इत्युपक्रमविरोधादुपेक्ष्यम् ।

तथापि सुतरां प्राचुर्यासम्भवः । ब्रह्मणि ब्रह्मप्राचुर्यायोगात् । अत्तृत्वादौ प्राचुर्यान्वययोग्यतासत्त्वेऽपि प्रकृत्यर्थतावच्छेदके प्रत्ययार्थान्वयस्याव्युत्पन्नत्वात् । सर्वभूतात्तृत्वस्य ब्रह्मधर्मतया अत्त्रधिकरणे निर्णेष्यमाणस्य अनतिप्रसङ्गिनो विशेषणानपेक्षितत्वाच्च । अन्नशब्दरूढिप्रसिद्धिविरोधेन ब्रह्मपरत्वासम्भवाच्च । न च व्युत्पत्तिविरोधः । 'अन्नं मृत्यु तमुपजीवातुमाहुः' इत्युपपादनेन 'अन्नाद्भवन्ति भूतानी'त्युपबृंहितेन भूतवृद्धिहेतुतया भूतोत्पादकत्वस्येव दोषप्रयुक्तप्रातिकूल्येन तत्क्षयहेतुत्वस्यापि तत्राविरोधात्।

इयांस्तु विशेषः । यद्ब्रह्मणि प्रथमश्रुतं भूताद्यत्वं भूतोपजीव्यत्व-रूपत्वादमुख्यम् । अस्माकं तु चरमावगतं भूतात्तृत्वं गौणमिति । प्रथमानुरोधेन चरमस्यामुख्यत्वं तु '१यो होता सोऽध्वर्युः' '२न प्रथमयज्ञे प्रवृद्ध्यात' इत्यादिवत् प्रामाणिकमिति ।

१.शा.दी. ३-८-१३

२.शा.दी. ३-३-१२

किञ्च 'अन्नात्पुरुष' इत्युपादानपञ्चम्युपक्रमात् 'अन्नरसमय' इति मयडपि विकारार्थ एव युक्तः । अत एव 'स वा एष पुरुष' इति सन्निहितः कारणीभूत आत्मा परामृश्यत इति कल्पनापि निरस्ता । असन्निहितपरामर्शितच्छब्दविरोधात् । प्रत्यक्षनिर्देशविरोधाच्च । अन्नपदस्योक्तनिर्वचनाब्रह्मपरत्वं वदतामन्नरस-मयत्वविरोधाच्च । अत एव रसशब्दः सारवाची । तथाच आकाशाद्यन्नान्त-सर्वसारप्राचुर्यं ब्रह्मण्येवेत्यपि निरस्तम् । 'कारणत्वेन चाकाशादिष्वि'त्यत्र आकाशादिशब्दानां परमात्मपरत्वस्थापनविरोधाच्च । अन्नसारत्वोक्तिमात्रेण सर्वसारत्वाप्रतिपत्तेश्च । कार्यस्यैव कारणसारत्वेन वैपरीत्याच्च । स्वप्रकाश-चैतन्यात्मकस्य ब्रह्मण आकाशादिभूतसारत्वानुपपत्तेश्च । शरीरेऽन्नसारत्वं तु छान्दोग्यादिप्रसिद्धमित्युक्तम् ।

एतेन '[१]रसो वै स' इति रसशब्दप्रत्यभिज्ञानोक्तिरपि निरस्ता । अन्नशब्द-मयट्प्रत्ययविरोधेन प्रत्यभिज्ञाऽसम्भवाच्च । आकाशादिकारणत्वेन प्रक्रान्तस्य पुनः परामर्शानर्थक्याच्च । अन्नमयादिरूपपञ्चकप्रपञ्चनार्थः पुनः परामर्श इत्यपि न युक्तम् । तथा सति 'स वा एष पुरुष' इतिवत् प्राणमयादिष्वपि पुनः परामर्शापत्तेः । अन्यत्वोक्तिविरोधेन एकविषयकत्वानुपपत्तेश्च । अन्यद्रूपमिति वक्तव्ये 'अन्य आत्मे'त्युक्तिविरोधाच्चेति ।।

१.तै.उ.१६.३

मार्ताण्डनिराकरणपूर्वकं अन्नमयादिषु मयटः प्राचुर्यार्थत्वस्थापनम्

द्वैतिनः– तदेतदयुक्तम् ।। अभिमन्यमानवाचिशब्दानां अभिमानिपरत्वेन मयडन्तस्यापि तदभिमानिमुख्यत्वोपपत्तेः । 'अहं सोममाहनसमि'त्यादौ आहन्यमानत्ववाचिशब्दस्यापि तदभिमानिसोमपरत्वेन न्यायेनेतरेषामपि तत्परत्वोपपत्तेश्च । शरीरिवाचकानां शरीरिपर्यन्तस्य त्वन्मतत्वेनानभिमानिनं प्रति अभिमन्यमानस्य शरीरस्थानत्वेन तद्वाचितायाः त्वया शङ्कितुमशक्यत्वाच्च । अन्नशब्दस्य भावप्रधानतया 'अद्यतेऽत्ति चेति श्रुत्यनुसारेण योगलभ्याद्यत्वादिप्राचुर्यस्य ब्रह्मणि सम्भवेन अन्नशब्दस्य अन्नमयशब्दस्य च ब्रह्मण्युपपत्तेश्च । 'ओषधीभ्योऽन्नमि'त्योषध्यन्नशब्दयोः प्रसिद्धपरत्वस्य 'संसारे दह्यमानानामाश्रयत्वात् स ओषधिम् । अन्ननामा चान्नसंस्थः शरीरेषु च संस्थित' इति यजुःसंहितावचनेन तत्स्थब्रह्मपरत्वस्यापि सत्त्वेनोपक्रमविरोधाभावाच्च ।।

ब्रह्मणि ब्रह्मप्राचुर्यायोगेऽपि अन्नपदप्रवृत्तिनिमित्तप्राचुर्यसम्भवेन ब्रह्मणि ब्रह्मप्राचुर्यायोगादित्यस्यायुक्तेश्च । भावप्रधानत्वे प्रकृत्यर्थतावच्छेदके प्रत्ययार्थान्वयस्य व्युत्पन्नत्वाच्च । सर्वभूतात्तृत्वस्यानतिप्रसङ्गत्वेऽपि अन्नशब्दार्थेषु अद्यत्वजातिसर्वभूतात्तृत्वादिषु रसो मुख्योऽर्थोऽत्तृत्वादिलक्षणस्तत्प्रचुर इत्युक्तं भवति इति सुधोक्तरीत्या अत्तृत्वादिस्वरूपलाभायैव रसशब्देन विशेषणस्यापेक्षितत्वेन विशेषणानपेक्षितत्वोत्त्ययोगाच्च । टीकाया अप्यत्रैव तात्पर्यम् । उक्तप्रकारेण रसशब्देन विद्वद्रूढिसद्भावेन चाज्ञरूढिविरोधस्यानादरणीयत्वाच्च ।

'अन्नं मृत्युमि'त्यादेरजरसमित्यादिना ब्रह्मपरत्वस्य प्रागुक्तत्वेन सहजजीवनस्यापि दोषप्रयुक्तप्रातिकूल्येन क्षयहेतुत्वेन तत्प्रवृत्तिनिमित्तकान्न-शब्दार्थत्वे हेतुत्वस्य अत्तृशब्दप्रवृत्तिनिमित्तत्वस्य पितुरपि हन्तृशब्दार्थत्वस्यापत्त्या प्रसिद्धान्ने श्रौतयोगासम्भवाच्च ।।

'यजमानः प्रस्तरः', 'आदित्यो यूप', 'ये यजमानास्ते ऋत्विज' इत्यादाविव उत्तरस्य मुख्यार्थत्वानुरोधेन अद्यत्वस्यैवोपजीव्यत्वरूपतायाः स्वरसत्वाच्च ।

आत्मनो निर्विकारत्वेनोपादानत्वायोगेन पञ्चम्या अपादानार्थकतया इतरपञ्चम्या अपि तदर्थकतयोपादानपञ्चमीबलान्मयटो विकारार्थत्वस्य वक्तुमयुक्तत्वाच्च । 'ओषधीभ्योऽन्नम', 'अन्नमयो मख' इत्यत्रापि प्राचुर्यार्थकत्वदर्शनाच्च । 'स' इत्यस्यासन्निहितात्मपरामर्शित्वस्य 'एष' इत्यस्य सन्निहितशरीरगतपरामर्शित्वस्य युक्तत्वाच्च । वस्त्रप्रावृतजानुनीव प्रत्यक्षनिर्देशाविरोधाच्च । अन्नशब्दस्य ब्रह्मपरत्वेऽपि अन्नशब्दार्थमुख्यार्थात्तृत्वादिप्राचुर्यविवक्षया अन्नरसमयशब्दस्य ब्रह्मण्युपपादितत्वाच्च । तथाचाकाशाबन्नान्तशब्दमुख्यार्थभूतसमन्तात्काशमानत्वादिरूपमुख्यार्थलक्षणसारपाचुर्यस्य ब्रह्मण्युपपन्नतया 'स' इत्यनेन तादृशसारवतो ब्रह्मणः परामर्शस्य युक्तत्वाच्च । 'कारणत्वेन चाकाशादिष्वि'त्यत्र आकाशादिशब्दानां परमात्मपरत्वस्थापनं 'स' इत्यनेन परामर्शानुगुणत्वाच्च । अन्नसारत्वोक्तिमात्रेण उपलक्षणया

सर्वसारत्वप्रतिपत्तेश्च । कारणेषु कारणताप्रदस्य स्वयंकारणस्य कार्यगतस्वरूप-व्यञ्जकस्यैव सारत्वेन कार्यस्यैव कारणसारत्वेन वैपरीत्याचेत्यस्य बुद्धि-वैपरीत्यमूलत्वाच्च । ब्रह्मण आकाशादिभूतेषु उक्तरीत्या सारत्वोपपत्तेश्च । शरीरे अन्नसारत्वं तु छान्दोग्यादि प्रसिद्धमित्ये-तत्प्रागेव प्रत्युक्तम् । असितस्य त्रेधाविभक्तस्यान्नस्य रेतोविकारत्वेऽपि अन्नसारत्वाभावात् ।।

एतेन 'रसो वै सः' इति रसशब्दप्रत्यभिज्ञोक्तिरपि युक्ता । अन्नशब्दम-यट्प्रत्यययोश्चाविरोधित्वेन प्रत्यभिज्ञासम्भवाच्च । आकाशादिकारणत्वेन प्रक्रान्तस्यान्नमयादिरूपपञ्चकप्रपञ्चनार्थं पुनः परामर्शस्य सार्थक्याच्च । पञ्चरूपोपदेशोपक्रमे परामर्शेन प्रतिरूपं परामर्शायोगाच्च । रूपविवक्षया अन्यत्वोक्तिसम्भवेनैकब्रह्मविषयत्वोपपत्तेश्च । प्राणमयादेरेव प्रद्युम्नादिरूपत्वेन अन्यः प्राणमयः परमात्मा इत्युक्तेरविरोधाच्चेति यत्किञ्चिदेतत् ।।

टीकायां सुधायां प्रतिपादितमयडर्थविचारे मार्ताण्डविचारः

विशिष्टाद्वैतिनः– किञ्च अन्नमयादयः शब्दाः किं कोशविशिष्टात्मपराः ? केवलात्मपराः ? । आये आनन्दमयस्यापि तथात्वप्रसङ्गः । विशिष्याभि-धानवैयर्थ्यञ्च । सर्वस्यापि तदात्मकत्वाविशेषात् । न द्वितीयः । रूपपञ्चकपरत्वासिद्धेः । 'तस्येदमेव शिर' इत्यादिनिर्देशविरोधाच्च । नचैतत्पक्षे वस्त्रप्रावृतादिन्यायोऽपि सम्भवति । किञ्च आद्यपक्षे 'स शिर' इत्यादिचतुर्वे-दशिखावचनं च विरुद्धयते । नारायणादीनां शिरआदिरूपणानुपपत्तेश्चेत्यास्तां

तावत् । अत एव प्राणमयादावपि न प्राणप्राचुर्यादिर्मयडर्थः । 'अप्राणो ह्यमना' इति श्रुतिप्रतिपन्ने ब्रह्मणि तदसम्भवात् । विज्ञानमये तु यद्यपि प्राचर्य सम्भवति । तथापि यज्ञकर्मादिकर्तृत्वानुपपत्तिरुक्तैव । आनन्दमये तु प्राचुर्यस्य मयडर्थत्वे न कस्यचिद्विवादः । यत्तु विकारप्राचुर्ययोः प्रसिद्ध्यविशेषेऽपि ब्रह्मशब्दानुरोधात् प्राचुर्यादर इति टीकायामुक्तम् । तन्न । ब्रह्मशब्दबलादान्दमयस्य ब्रह्मत्वे उक्ते विकारार्थकमयड्विरोधान्न ब्रह्मशब्दमुख्यार्थो विव-क्षणीय इत्याक्षेपे तेनैव ब्रह्मशब्दसामर्थ्येन तत्समाधानस्यान्योन्याश्रयग्रस्तत्वात् ।

ननु विकारप्राचुर्ययोः साधारणत्वात् सावकाशो मयट निरवकाशेन ब्रह्मशब्देन बाध्यत इति चेन्न । अन्नमयादिविकारप्रायपाठेन विकारार्थकत्व-निश्चयेन मयटोऽपि निरवकाशत्वात् । अन्नमयादिष्वब्रह्मसु अपि प्रयुक्तस्य अपरब्रह्मपरताप्रायपाठेन प्रकृतेऽपि ब्रह्मशब्दमुख्यत्वाय यत्नान्तरस्यैवावस्थेयत्वाच्च । तत्र ब्रह्मशब्दसामर्थ्यस्य इतरेतराश्रयणस्य दुर्वारत्वात् । तस्मादुपसंहार-गतानन्दाभ्यासेन मयटः प्राचुर्यपरत्वमास्थाय आनन्दमयस्य ब्रह्मत्वे उक्ते उपक्रमस्थविकारप्रायपाठबलात् प्राचुर्यपरत्वासिद्धिशङ्कायां प्राणमयादिषु विच्छेदात् प्रायपाठ एवासिद्ध इत्युपसंहारप्राबल्यवादिन उत्कण्ठां कुण्ठयन् प्राचुर्यपरतां व्यवातिष्ठिपत् भगवान् सूत्रकार इति श्रीभाष्याभिमत एव निष्कण्टकः । ब्रह्मशब्दः प्रकरणे तपस्यब्रह्मणि प्रयोगादनिर्णायक इति चासकृदुक्तम्।

यदपि प्राचुर्यपरत्वेऽपि 'ब्राह्मणमयो ग्राम' इत्यत्र अब्राह्मणस्येव आनन्दमय

इत्यत्रानानन्दप्रसक्तिशङ्कायां प्राचुर्यस्य विशेष्यतायामयं नियमः। इह तु प्रचुरानन्द इति विपरीतसमासेन पूर्णानन्दतैव लभ्यत इति टीकायामुक्तम् । तदपि न । प्रचुरानन्द इति स्ववाक्ये विपरीतसमाससम्भवेऽपि प्रकृतिप्रत्यययोस्तदसम्भवेन आनन्दमय इत्यत्र पूर्णानन्दत्वाप्रतिपत्तेः । तस्मादुक्तरीतिरेव युक्तेति ।।

टीकायाः सुधाया आशयाविर्भावपुरःसरं तयोरखण्ड्यत्वव्यवस्थापनम्, भगवत्पादरीतेरेव समीचीनत्वव्युत्पादनम्

द्वैतिनः– तदपि न । गेहादिपदानां स्तम्भादिविशिष्टसंस्थानविशेषविशिष्ट-परत्ववद्विशिष्टपरत्वं वा राजादिपदानां देशाधिपत्यविशिष्टपरत्ववद्विशिष्टपरत्वं वा अभिप्रैषि, एवं केवलात्मपरत्वमपि कोशं विहाय तत्स्थितभगवद्रूपपरत्वं वा तत्स्थितभगवत्परत्वं वा अभिप्रैषि । नाद्यः । अन्नमयादेब्रह्मत्वं वदतामस्माकं कोशविशिष्टात्मपरत्वस्यानाशङ्कनीयत्वात् । द्वितीये सतः सौन्दर्येऽपि देशस्य तदभाववत् कोशस्य ब्रह्मत्वानापत्त्या बाधकाभावात् । अन्नमयादिपञ्चकस्यापि अविशेषेण ब्रह्मत्वेनानन्दमयशब्दस्य सौत्रस्योपलक्षणत्वेन आये आनन्दमयस्येत्यादिदूषणायोगाच्च । तृतीये रूपपञ्चकपरत्वस्यैव प्राप्त्या तदसिद्धेरभावात् । तस्येदमेव शिर' इत्यादिनिर्देशस्यापि कोशशिरआदिस्थ-शिरआदौ वस्त्रप्रवृत इवाविरोधाच्च । 'स शिर' इत्यादिचतुर्वेदशिखावचनस्य 'शिरो नारायणः पक्ष' इत्यादेश्च द्वितीयतृतीयपक्षयोरविरोधात् । चतुर्थस्य चानङ्गीकृतत्वात् । 'प्राणं देवा अनुप्राणन्ति' इत्यादिना सर्वदेवादिचेष्टकत्वस्यैव

प्राणपदप्रवृत्तिनिमित्ततया 'अप्राणो ह्यमना' इति श्वासोच्छ्वासरूपजड-प्राणरहिततया प्रतिपन्नेऽपि परमात्मनि प्रवृत्तिनिमित्तप्राचुर्यस्य मयडर्थतयोपपत्तेश्च । विज्ञानमये 'यज्ञभृद्यज्ञकृदि'त्यादिना यज्ञकर्तृत्वाद्युपपत्तेरसकृदावेदितत्वाच्च । विकारमात्रार्थकत्वेन मयटा पूर्वपक्षेऽपि प्राचुर्यार्थकत्वेन तस्य सावकाशतया निरवकाशेन ब्रह्मशब्देन सिद्धान्तेऽन्योन्याश्रयाभावाच्च ।

अन्नमयादिष्वपि मयटः प्राचुर्यार्थकत्वेन ब्रह्मशब्दस्यापि परब्रह्मपरत्वेन विकारप्रायपाठभावेन यत्नान्तरस्यानास्थेयत्वाच्च । आनन्दाभ्यासस्य हेतुताया असद्धर्मप्रकाशे निरासाच्च । तपस्यब्रह्मणि गौण्या ब्रह्मशब्दप्रयोगेऽपि ब्रह्मशब्दस्य मुख्यया वृत्त्या विष्णुनिर्णायकत्वोपपत्तेश्च । अन्यत्र प्रयोगेणानिर्णायकत्वे हरिशब्दस्य मण्डके प्रयोगात् 'तावन्ति हरिनामानि' इत्यस्य वेदाक्षराणां पुण्डरीकाक्षनामतानिर्णायकत्वानापत्तेश्च ।।

'आनन्दप्रचुर इति यद्युच्यत' इति टीकावाक्यस्य प्राचुर्यस्य विशेषणताया-मनानन्दाप्राप्तेः परैरप्यङ्गीकृतत्वात् 'प्रचुरानन्दत्वादिति वदता यथा प्रचुरानन्द इत्युक्तावनानन्दाप्राप्तिः तथा श्रुतिसूत्रानुसारेण आनन्दमय इति प्राचुर्यस्य विशेष्यत्वेनोक्तावपि तदप्राप्तिः । प्रकाशप्रचुरो रविरित्युक्तेऽपि सवितर्यन्ध-कारलेशाप्रतीतेरिति सूचितमित्यर्थ इति चन्द्रिकायामेव व्याख्यातत्वात् तदनवलोकनिबन्धनमिदं दूषणम् । तस्माद्भगवत्पादोक्तरीतिः अत्यन्तसमीचीना वर्तते ।

।। विशिष्टाद्वैतिनां सूत्रव्याख्यानप्रकारविमर्शः ।।

विशिष्टाद्वैतिनः– 'तस्यैष एव शारीर आत्मा' इति शारीरत्वेन जीव एवानन्दमय इति प्राप्ते 'सैषानन्दस्य' इत्यारभ्य निरतिशयदशाशिरस्कस्यानन्दस्याभ्यासात् तस्य चानन्ददुःखमिश्रपरिमितसुखलवभागिनि जीवे अनुपपत्तेः, तदाश्रयः आनन्दमयः परमात्मा ।

द्वैतिनः– पूर्वपक्षस्यैव अनुत्थानात् अधिकरणारम्भो विशिष्टाद्वैतिमते नोपपद्यते । पूर्वपक्षिणापि प्राणमयादयः जीवतया न अनङ्गीकृताः । तत्साधारणं शारीरत्वरूपहेतुः भवति । अतः जीवत्वाभाववति प्राणमयादिकोशे शारीरत्वरूपहेतोः विद्यमानत्वात् व्यभिचारः सम्भवति । अतः शारीरत्वरूपहेतुना जीवत्वशङ्का नोदेति । श्रूयते हि प्राणमयादावपि 'तस्यैष एव शारीरात्मा' इति शारीरत्वम् । अतः एवं पूर्वपक्षकरणमयुक्तम् ।

पूर्वपक्षस्य अयुक्तत्वे तन्निरासरूपसिद्धान्तोऽप्ययुक्त एव भवति । आनन्दमयस्य ब्रह्मत्वे ब्रह्मणः पुच्छत्वाद्यनुपपत्तयः कथं परिह्रीयन्ते । ब्रह्मस्वरूपमेव शिरःपक्षपुच्छादिना रूप्यत इति चेत् रूपणं नाम किं विवक्षितं भवता ? अध्यासो वा सदृशतया उक्तिर्वा ?

यद्यध्यासः तर्हि अध्यस्थाविषयप्रतिपादकत्वात् श्रुतेरप्रामाण्यं स्यात् । ब्रह्मलिङ्गानां जीवे अध्याससम्भवेन कुत्रापि सिद्धान्तनिरूपणं न स्यात् इति

अतिप्रसङ्गः । अन्नमयादेरपि शिरःपुच्छादिना रूपेणाध्यस्तत्वेन तस्याप्यानन्दमयवत् ब्रह्मत्वापत्त्या कोशत्वोक्तिरयुक्ता स्यात् ।

यदि तु सदृशतयोक्तिः तदा मुख्यार्थत्यागः सादृश्याभावश्च । न हि ब्रह्मस्वरूपं शिरआदिसदृशम् ।

विशिष्टाद्वैतिनः– विज्ञानमयस्तु जीवः । '१विज्ञानं यज्ञं तनुते । कर्माणि तनुतेपि च' इति विज्ञानमयस्य कर्मकर्तृत्वं प्रतीयते । तच्च विज्ञानमयस्य ब्रह्मत्वे न सम्भवति । ब्रह्मणः कर्तृत्वाद्यभावात् ।

द्वैतिनः– विज्ञानमयस्य जीवत्वे 'विज्ञानं देवाः सर्वे ब्रह्म ज्येष्ठमुपासते । विज्ञानं ब्रह्म चेद् वेद । तस्माच्चेन्न प्रमाद्यति शरीरे पाप्मनो हित्वा । '२सर्वान् कामान् समश्नुते' इत्यादेरयोगः । अत्र श्रुतौ देवाः विज्ञानमयं देशतः कालतः ज्यायांसं ब्रह्म गुणपूर्णं उपासते । एवं यः श्रवणादिना जानाति नित्यं प्रमादं विना ध्यायति सः तस्यापरोक्षज्ञानं लब्ध्वा सकलपापनिर्मुक्तोः भवति । तथा सर्वान् अभिलषितान् कामान् आप्नोति । इति विज्ञानमयवेत्तुः सकलपापक्षयद्वारा सकलकामावाप्तिरूपमोक्षः श्रूयते । एतच्च विज्ञानमयस्य जीवत्वे न सम्भवति । तर्हि 'विज्ञानं यज्ञं तनुते' इत्यादिकं तु ब्रह्मणि कथमुपपद्यते इति चेत् ब्रह्मणः सर्वकर्तृत्वात् 'यज्ञभृद् यज्ञकृद् यज्ञी' इत्यादिप्रमाणसद्भावाच्च युज्यते एव ।

विशिष्टाद्वैतिनः– अन्नमयादयस्तु त्रयः कोशा इति सिद्धान्तः ।

१.तै.उ.११.१ २. तै.उ.२.५

द्वैतिनः– अन्नमयादीनां कोशत्वं तु सिद्धान्तनिरूपणावसरे प्रतिपादितमस्ति ।

विशिष्टाद्वैतिनः– नन्वमन्नमयाद्युपदेशानन्तरं 'अन्योऽन्तर आत्मा' इत्युक्तेः आनन्दमयोपदेशानन्तरं तदनुक्तेः आनन्दमय एव ब्रह्म न त्वन्नमयादय इति ।

द्वैतिनः– तर्हि छान्दोग्ये '१यो वै भूमा तत्सुखं' इति भूमोपदेशानन्तरं '२अथात आत्मादेशः' इत्युक्तेः तदनन्तरं चान्यानुक्तेः भूमा ब्रह्म न स्यात् । 'यत्र नान्यत् पश्यति' इत्यादिब्रह्मलिङ्गाद् भूम्नो ब्रह्मत्वे त्वन्नमयादिरपि ब्रह्मशब्दाभ्यासादिना ब्रह्मास्तु ।

विशिष्टाद्वैतिनः– ननु उत्तरानुवाके अन्नप्राणमनोविज्ञानज्ञानानन्तरं 'तद्विज्ञाय पुनरेव वरुणमुपससार' इति पुनरुपसत्तिवत् 'आनन्दो ब्रह्मेति व्यजानात्' इत्यानन्दमयज्ञानानन्तरं पुनरुपसत्तेरभावेनानन्दस्य ब्रह्मत्वात् । अन्नप्राणमनोविज्ञानानन्तरं श्रुतेन आनन्देन अन्नमयप्राणमयमनोमय-विज्ञानमयानन्तरं श्रुतस्यानन्दमयस्य स्थानप्रमाणेनाभेदाद् आनन्दमय एव ब्रह्म । अन्नमयादयस्तु तद्द्वारभूताः इति ।

द्वैतिनः– अन्नादीनां द्वारत्वेऽपि पुनरुपसत्त्ययोगस्योक्तत्वात् ।

किञ्चैव छान्दोग्ये '३यथा सोम्य मधु मधुकृतो निस्तिष्ठन्ति' इति नानात्ययानां वृक्षानां रसानां समवहारमेकतां गमयन्ति । ते यथा तत्र न

१.छा.उ.७ २.छा.उ. ७ ३.छा.उ. ७

विवेकं लभन्ते इति दृष्टान्तपूर्वं 'एवमेव खलु सोम्येमाः प्रजाः सति सम्पद्य नो विदुः' इत्युद्दालकोपदिष्टेपि ब्रह्मणि श्वेतकेतुः विशेषजिज्ञासया '१भूय एव मा भगवन् विज्ञापयतु' इति बहुकृत्वः पुनः पुनः पृष्टवानिति तत्रोद्दालकेनोक्तं अब्रह्म स्यात् । '२पुरुषं सोम्योत हस्तगृहीतम्' इत्यादेरनन्तरं 'भूय एव मा भगवन् विज्ञापयतु' इति प्रार्थनायाः अश्रवणात् तत्रोक्तमेव ब्रह्म स्यात् । '३यथा सोम्य मधु' इत्यादौ '४ऐतदात्म्यमिदं सर्वम्' इत्यादिब्रह्मलिङ्गादिना तत्रोक्तस्य ब्रह्मत्वे त्वत्रापि '५अन्नं ब्रह्मेति व्यजानात् । अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते' इति ब्रह्मश्रुत्यादिनान्नादिकमपि ब्रह्मास्तु ।

सूत्रार्थमपि प्रत्येकमत्र किञ्चित् विमृश्यते ।

आनन्दमयोभ्यासाद् सूत्रार्थविमर्शः

विशिष्टाद्वैतिनः– आनन्दमयोऽभ्यासात् इति सूत्रमित्थं व्याख्यातम् । आनन्दमयः प्रत्यगात्मनार्थान्तरभूतः सर्वज्ञः परमात्मैव । अभ्यासात् । निरतिशयदशाशिरस्कस्य आनन्दस्याभ्यासात् । 'ते ये शतं प्रजापतेरानन्दाः । स एको ब्रह्मण आनन्दः' 'यतो वाचो निवर्तन्ते' इति ब्रह्मानन्दस्य निरतिशयत्व-कथनात् । इति प्रथमसूत्रार्थं वर्णयन्ति ।

द्वैतिनः– आद्यसूत्रे हेतुत्वेन निर्दिष्टस्य अभ्यासादित्यस्य भास्करमत

१. छा.उ.६
२. छा.उ.६
३. छा.उ.६
४. छा.उ.६
५. तै.उ.६

इव आनन्दमात्राभ्यासः इत्यर्थो वा निरतिशयानन्दाभ्यासादित्यर्थो वा ? यदि भास्करमत इवानन्दमात्राभ्यासो हेतुः स्यात् । तदा 'आनन्दमयः ब्रह्म आनन्दाभ्यासात्' इति अनुमानं कर्तव्यम् । तथा च ब्रह्मत्वरहितेपि जीवे आनन्दमात्रस्य सत्वात् हेतोः व्यभिचारात् ब्रह्मत्वासिद्धिः ।

यदि निरतिशयत्वविशिष्टानन्दस्याभ्यासः हेतुरिति विवक्ष्यते तदा अभ्यासरूपहेतुः असिद्धः भवति । 'यतो वाचो निर्वर्तन्ते' इति निरतिशय-विशिष्टानन्दस्य सकृदेव श्रवणात् । तत्परिहाराय यदि शतगुणितोत्तरक्रमेण गुणितानन्दाभ्यासः हेतुरित्युच्यते तदा नाभ्यासशब्दस्याभिधेयं सम्भवति ।

विकारशब्दान्नेति चेन्न प्राचुर्यात् सूत्रार्थविमर्शः

विशिष्टाद्वैतिनः– '[1]स वा एषः पुरुषोऽन्नरसमयः' इत्यत्र विकारार्थकमयट्प्रकरणात् आनन्दमयः ब्रह्म न भवति । कुत इति चेत् ब्रह्मणः विकारशून्यत्वात् । तर्हि कः इति चेत् जीव एव इति प्राप्ते अर्थविरोधात् प्राचुर्यार्थ एव मयट् भवति । 'आत्मनः आकाशः सम्भूतः' इति अविकारः आत्मा प्रकृतः । विकारार्थत्वं तु प्राणमये त्यक्तं वर्तते । अतः आनन्दप्रचुरः ब्रह्मैव आनन्दमयः भवति ।

द्वैतिनः– द्वितीयसूत्रव्याख्यानमपि न युक्तम् । प्रायपाठबाधात् । त्वया आनन्दमयमात्रविषयत्वेन प्राचुर्यार्थस्योक्त्या इतरेषु विकारार्थत्वस्वीकारात् । ननु प्राणमय एव विकारार्थत्वं त्यक्तम् । अतः न प्रायपाठविरोधः इति चेत्

१.तै.उ.४.१

तर्हि प्राणमये मयट् स्वार्थिकः इति स्यात् । तथा वैयर्थ्यमापद्यते । किञ्च विज्ञानमयेपि तत्प्रसङ्गश्च ।

विशिष्टाद्वैतिनः– विज्ञानमये मयटः सम्बन्धोर्थः । वैयर्थ्यादप्य-मुख्यार्थत्वस्य ज्यास्त्वादिति ।

द्वैतिनः– अन्नमये विकारार्थः प्राणमयमनोमययोः स्वार्थिको विज्ञानये सम्बन्धार्थ आनन्दमये प्राचुर्यार्थ इति वैरूप्यप्रसङ्गात् ।

विशिष्टाद्वैतिनः– प्राणमयादावपि मयटः सम्बन्धार्थता स्वीक्रियते ।

द्वैतिनः– प्राणादेः प्राणादिसम्बन्धाभावात् । प्राणशब्दस्याप्रसिद्धार्थत्वे तु वरं परमात्मपरत्वात् ।

तद्धेतुव्यपदेशात् सूत्रार्थविमर्शः

विशिष्टाद्वैतिनः– 'एष ह्येवानन्दयाति' इति जीवान् प्रति आनन्दहेतुत्वं आनन्दमयस्य व्यपदिश्यते । अतः आनन्दमयः जीवः न सम्भवति । स्वस्यैव स्वानन्दहेतुत्वं जीवे न युक्तम् ।

द्वैतिनः– यद्यपि जीवानन्दहेतुत्वेनानन्दमयस्य जीवात् भेदः सिद्ध्यति । तथापि आनन्दमयस्य ब्रह्मत्वं सिद्ध्यति । कुत इति चेत् ब्रह्मभिन्नानामपि वनितादिविषयाणां जीवानन्दहेतुत्वस्य प्रमाणप्रमितत्वात् । आद्यसूत्रानन्त-र्यप्रसङ्गाच्च ।

मान्त्रवर्णिकमेव च गीयते सूत्रार्थविमर्शः

विशिष्टाद्वैतिन– 'सत्यं ज्ञानमनन्तं ब्रह्म' इति मन्त्रवर्णोदितं ब्रह्मैव 'तस्माद्वा एतस्मादात्मनः' इत्यारभ्यानन्दमय इति गीयते । अतः जीवः आनन्दमयः न भवति ।

द्वैतिनः– मान्त्रवर्णिकब्रह्मणः आनन्दमयविषये इव अस्मदाचार्य-भाष्याद्युक्तदिशा अन्नमयादिष्वपि गीयमानत्वेन तेषामब्रह्मत्वं न सम्भवति ।

नेतरोनुपपत्तेः सूत्रार्थविमर्शः

विशिष्टाद्वैतिन– इतरो जीवो मन्त्रवर्णोदितः इति मन्तव्यम् । 'सोऽश्नुते सर्वान् कामान् सह । ब्रह्मणा विपश्चिता' इत्युक्तविपश्चित्वरूपसार्वज्ञस्य बद्धस्य मुक्तस्य वा प्रत्यगात्मनः अनुपपत्तेः । 'सोऽकामायत । बहु स्यां प्रजायेय' इति विचित्रस्थिरत्रसरूप-बहुभवनसङ्कल्परूपं विपश्चितत्वम् । मुक्तस्य सर्वज्ञस्यापि जगद्व्यापाराभावात् ईदृशविपश्चित्वं न सम्भवति ।

द्वैतिनः– अन्नमयादीनामब्रह्मत्वेप्युक्तविपश्चित्वानुपपत्तेः तुल्यत्वात् ।

भेदव्यपदेशात् सूत्रार्थविमर्शः

विशिष्टाद्वैतिनः– 'भीषास्माद् वातः पवते' इत्यादिना प्रशासितव्यवर्गाद् वायुसूर्यादेः आनन्दमयस्य प्रशासितृत्वेन भेदव्यपदेशाद् आनन्दमयो ब्रह्म ।

द्वैतिनः– 'ब्रह्मविदाप्नोति' इत्युपक्रान्तब्रह्मविषयस्य भेदव्यपदेशस्यान्न-मयादिसाधारण्यात् व्यभिचरितः हेतुः ।

कामाच्च नानुमानापेक्षा सूत्रार्थविमर्शः

विशिष्टाद्वैतिनः– 'सोऽकामयत' इत्यारभ्य 'स इदं सर्वमसृजत' इति कामादेव सर्गश्रवणादस्यानन्दमयस्य सृष्टौ नानुमानिकप्रधानापेक्षास्तीति ।

द्वैतिनः– एवं व्याख्याने अनुमानपदस्य आनुमानिके प्रकृतौ लक्षणा स्यात् । लक्षणाबीजानुपपत्त्यादीनि वक्तव्यानि । भेदसूत्रानन्तरं अस्य सूत्रस्य प्रणयने हेत्वभावाच्च । कामादेव सर्गश्रवणादित्याद्यध्याहारप्रसङ्गाच्च ।

अस्मिन्नस्य च तद्योगं शास्ति सूत्रार्थविमर्शः

विशिष्टाद्वैतिनः– 'रसो वै सः । रसं ह्येवायं लब्ध्यानन्दी भवति' इति शास्त्रं रसशब्दनिर्दिष्टे अस्मिन्नानन्दमये अस्य जीवस्य तल्लाभाद् आनन्दयोगं शास्ति ।

द्वैतिनः– 'रसं ह्येवायम्' इति शास्त्रमप्यन्नरसमय इति रसशब्दनिर्दिष्टे अन्नमय एव जीवस्यानन्दयोगं शास्तीति तस्यैव ब्रह्मत्वापत्तेः अयुक्तम् ।

अतः अन्नमयादि पञ्चानाम् ब्रह्मत्व विषये उपरिउक्त सादकसद्भावात् आनन्दमयः ब्रह्म उपलक्षणया अन्नमयादीनामपि ब्रह्मत्वं उपपादितम् भवति।

इति विशिष्टाद्वैतस्य विमर्शः समाप्तम्

*****

उपसंहारः

भारतीयदर्शनेषु बन्धध्वंसादेव मोक्षः इति साधारणः सिद्धान्तः। तादृश बन्धादि निवृत्तये ईश्वरस्य सुस्पष्ठं ज्ञानं अपेक्षितं। सुस्पष्टज्ञानं तु वेदान्तानां विमर्शेनैव भविष्यति। तनैव च मोक्षोऽपि। तदर्थं मया आनन्दमयाधिकरणविषये मतत्रयस्य अभिप्रायं संगृह्य यथा योग्यं विस्तारतया विमर्शितम्।

प्रथमोऽध्याये द्वैतमतानुसारेणआनन्दमयाधिकरणस्य विचारः कृतः। तत्र ब्रह्मसूत्रभाष्यम् - अनुवाख्यानम् - श्रीमन्यायसुधा इत्यादि ग्रन्थोक्ताः विचारः मण्डितः।

द्वितयोऽध्याये अद्वैतमतानुसारेण आनन्दमयाधिकरणस्य स्वरूपचिन्तनम् मया विचारितं । तत्रपि शाङ्करभाष्य - भामति - कल्पतरु - कल्पतरुपरिमल इत्यादि ग्रन्थोक्त विषयाःआपि निरूपिताः।

तृतीयोऽध्याये विशिष्टाद्वैतमतरीत्या आनन्दमयाधिकरणस्य विचारः मण्डितः तत्र श्रीभाष्य -श्रुतप्रकाशिक - भावप्रकाशिकाधि ग्रन्थोक्त विचारानपि विस्तातय कृतमस्ति।

चतुर्थोध्यये अद्वैतभिः आनन्दमयाधिकरणोपरि कृतस्य व्याख्यानस्य विमर्शः द्वैतमतरीत्या कृतः

पञ्चमोऽध्याये विशिष्याद्वैतमरीत्य तत्वमार्तण्डादि ग्रन्थेषु उक्तस्याक्षेपस्य द्वैतमतरीत्याविस्तारतया विमर्शः कृतः वर्तते ।

ततः द्वैतमते इतोपि नवीनाः विचाराः प्रतिपादिताः वर्तन्ते। अयं प्रबन्धं विदूषां, छात्रानां च कृते महते उपयोगाय भवतीति मम विश्वासः वर्तते। अतः अस्य प्रबन्धस्य कृते विध्यावारिधिः पदवीं प्रदास्यन्तु इति सम्पार्थयामि।

श्रीकृष्णार्पणमस्तु

*****

उपोद्घातः

द्वपरे सर्वत्र सज्जनेषु कालबलेन गैतमशापाच्च संदेहविपर्ययावृतनयनेषु सत्सु तान् भक्तजनान् उद्धर्तुं कृपालवः ब्रह्मरुद्रादयः श्रीमन्नारयणं शरणं ययुः । ब्रह्मादिदेवताः,भास्करः यथा स्वरश्मिभिः बाह्यान्धकारं निवर्तयति तथा त्वदीयज्ञानरश्मिभिः सज्जनेषु स्थिताज्ञानान्धकारं निर्वत्य ज्ञानमार्गं प्रकाशय इति प्रर्थयामासुः । ब्रह्मरुद्रादिभिः एवं प्रर्थितसन् भगवान् नारायणः पराशरत् सत्यवत्यां वेदव्यासरूपेण अवततार । प्रदुर्भूतः भगवान् व्यासः सांप्रदायपरंपराविच्छेदेन,अपपाठादिना तिरोहितान् वेदान् उज्जहार । चतुर्धा विभजच्च । वेदे न केवलं विष्णुप्रतिपादकवाक्यानि न सन्ति । अपि तु रमाब्रह्मरुद्रादिप्रतिपादकवाक्यानि सन्ति । अतः वेदः केवलविष्णुप्रतिपादकः इति वक्तुं न शक्यते । वस्तुतस्तु विष्णुरेव समस्तेन वेदेन परमुख्यवृत्या प्रतिपाद्यः । अतः तत् प्रतिपादनाय भगवान् व्यासः ब्रह्मसूत्रं चकार । 'ज्ञानेनैव परंपदम्' इत्युक्तानुसारेण ब्रह्मज्ञानेनैव मोक्षः इति ज्ञायते । तत्र ब्रह्मज्ञानार्थं तस्य जिज्ञासाकर्तव्या इति ज्ञापनार्थं ॐॐ अथतोब्रह्मजिज्ञास ॐ इति सूत्रं प्रवर्तितं । ब्रह्मजिज्ञासार्थं तस्य स्वरूपज्ञानं आवश्यकं भवति इति भगवता व्यासेन ॐ जन्माद्यस्य यतः ॐ इत्यत्र सृष्ट्यादिकर्तृत्वरूपब्रह्मणः स्वरुपं प्रतिपादितं । ननु चर्तुमुखब्रह्मद्याः सृष्टिकारः रुद्रः लयकारः इति युत्त्या साधयितुं शक्यत्वात् । अतः उक्त सृष्टादिकर्तृत्वं न परब्रह्मणः स्वरुपमिति चेत् । न । बहुश्रुतिविरोधात् । उक्तस्य अप्रामण्यं प्रसज्जेत । अतः सृष्ट्यादिकर्तृत्वं परब्रह्मणः स्वरुपमेव,तस्य विषये श्रुतिरुपप्रमाणानि ॐ शास्त्रयोनित्वात् ॐ इत्यत्रोपपादितः । रुद्रो वा वा लोकाधारः 'एकोरुद्रो नद्वितीयोयतास्थे'इत्यादिश्रुतिभिः रुद्रादेरपि सृष्ट्यादिकर्तृत्वं प्रतिपादायितुं शक्यते ।

अतः सृष्ट्यादिकर्तृत्वपरब्रह्मणः लक्षणं इति यदुक्तं तल्लक्षणातिव्याप्तम् इति शङ्कायां ॐ तत्तु समन्वयात् ॐ इतिसूत्रे उपक्रमादिलिङ्गैः ऋगादिसकालशास्त्रमुख्यप्रतिपादकत्वं ब्रह्मणः समर्थितम् । ब्रह्मणः ऋगादिसकालशास्त्रप्रतिपादकत्वं तदा भवति यदा येनकेनापि शब्देन वाच्यःस्यात् । न चैवम् । कुतश्चेत् । ब्रह्मणः शब्दवाच्यत्वाङ्गिकारे 'यतोवाचो निर्वतन्ते'इत्यदि श्रुति विरोधः स्यात् । इत्याशङ्कायां ॐ इक्षतेर्नाशब्दम् ॐ इति सूत्रे ईक्षणकर्तृत्वरुपहेतोः ब्रह्मणः सर्वशब्दवाच्यत्वं समर्थितम् । ननु यद्विषयकलक्षणप्रमाणानि सन्ति तदेव वस्तु इति कथ्यते । ब्रह्मविषयकसृष्ट्यादिकतृत्वरुपलक्षण,तद्विषयक प्रमाणनिरुपणात् अन्यत् किमपि वस्तुएव नास्ति। अतः ब्रह्मणः लक्षणज्ञानेनैव मोक्षः भवितुमर्हति । ततः किं अध्यायशेषेण इति प्राप्तस्याशङ्कानिवर्तयितुं उच्यते । यद्यपि लक्षण, प्रमाणात् अतिरिक्तवस्तु नास्ति । तथापि 'तत्तुसमन्वयात्' इत्यत्र शास्त्रब्रह्मणोः यत् प्रतिपाद्य-प्रतिपादकरुपसङ्गतिरस्तीति प्रतिज्ञातं तत् प्रपञ्चयति । ॐ आनन्द-मयोभ्यासात् ॐ इत्याराभ्य अध्यशेषेण । अतः सार्थकं भवति । प्रकृतानन्दमयाधिकरण-मधिकृत्य मतत्रयाभिप्रायं संक्षेपतः अनुवदामि ।

अद्वैतिभिः आनन्दमयः अवयवि जीवः । पुच्छतयोक्तावयवः ब्रह्मः इत्यङ्गीकरोति । अत्र ब्रह्म एव प्रधानतया प्रतिपाद्यः । कुतश्चेत् । 'ब्रह्मविदाप्नोतिपरम्' इति श्रुतौ ब्रह्मवित् स्वरूपानन्दरूपमोक्षं प्राप्नोति इत्युक्तं । ब्रह्मज्ञानाय ब्रह्मणः स्वरुपज्ञानमावश्यकं भवति । तत् 'सत्यंज्ञानमनन्तंब्रह्म' इत्यदि श्रुतिभिः समान्यतया व्याख्याय विशेषज्ञानार्थं 'तस्मद्वा एतस्मात्' इति श्रुतिः प्रवर्तते । तत्र 'तत्' शब्देन ब्रह्मवित् इत्याक्षिप्य,'एतत्' शब्देन सत्यज्ञानतयोपपादितं ब्रह्म अनूद्य 'आत्मनः' इति श्रुत्या ब्रह्मणः सह जीवाभेदमनुसन्धाय 'अन्नात् पुरुषः'इत्यन्तेन ब्रह्मणः सकलजगत्कारणत्वं उपपादयति । अपि च 'स वा एष' इत्यारभ्य 'ब्रह्मपुच्छंप्रतिष्ठा'इत्यन्तेन गुहानिहितत्वरूपब्रह्मणः स्वरूपं समर्थ्यते । ननु अवयवावयविरूपजीवेशभेदस्तु अनुभवसिद्धः । तत् कथं तयोः

अभेदः वक्तुं शक्यते इति चेन्न । अविद्यावशात् तयोः मध्ये औपाधिकभेदः प्रतीयते । अतः न क्वापि अनुपपत्तिः । तस्मात् आनन्दमयः जीवः तस्याधारत्वेन पुच्छतयोक्तब्रह्म स्वप्राधान्येन प्रतिपाद्यः।

विशिष्टाद्वैतिभिः आनन्दमयः परमात्मा । विज्ञानमयः जीवः ।अन्नमयादयः कोशाः इत्याङ्गिक्रियन्ते । तत्र 'ब्रह्मविदाप्नोतिपरम्' इति श्रुतौ यः ब्रह्मवित् तस्य मोक्षरुपफलं उक्तं । तमेव 'सत्यंज्ञानमनन्तंब्रह्म' इत्यदिश्रुतिभिः समान्यतया ब्रह्मणः स्वरुपं व्याख्याय 'तस्मद्वा एतस्मात्' इत्यारभ्य 'अन्नात् पुरुषः' इत्यन्तेन ब्रह्मत्वं प्रतिपादितं । ननु 'अन्नात् पुरुषः' इत्यत्र पुरुषशब्देनशरीरः वाच्यः । तत् कथं ब्रह्मपरत्वं उपपादयति इत्याशङ्कायां 'अन्नात् पुरुषः' इत्यत्र विद्यामानपुरुषशब्दः न शरीरः वाच्यः । किन्तु ब्रह्मैव । यतोहि ब्रह्मवत् तस्य शरीरस्यापि अप्रत्यक्षः । अतः पुरुषशब्दः न शरीरवाची । आनन्दमयः परमात्मा इति केन प्रमाणेन सिध्यति इति जिज्ञासायां 'आनन्दंब्रह्मणोविद्वान्''आनन्दो ब्रह्मेतिव्यजानात्' इत्यादि ब्रह्मशब्दाभ्यासात् आनन्दमयः परमात्मा इति उपपादयति । अतः सूत्रकारोऽपि 'आनन्दमयोभ्यासात्'इति सूत्रितवान् । द्वैतमते आनन्दमयः परामात्मा उपलक्षणतया अन्नमयादानामपि परब्रह्मत्वं अङ्गीक्रियन्ते । तत् कथं । ब्रह्मशब्दाभ्यासरूपतात्पर्यलिङ्गात् आनन्दमयस्य ब्रह्मत्वं साधायिष्यन्ति । ब्रह्मशब्दाभ्यासविषयकागमप्रमाणानि दर्शयन्ति । 'रसो वै सः रसह्येवायं लब्ध्वानन्दी भवति तदेव ब्रह्मपरमं कवीनाम्' 'एतमेव ब्रह्म इत्याचक्षते' 'असन्नेवसभवति''असद्ब्रह्मेतिवेदचेत्' 'आनन्दंब्रह्मणोविद्वान्''आनन्दो ब्रह्मे तिव्यजानात्' । इत्यादि श्रुतौ श्रुतब्रह्मशब्दाभ्यासात् आनन्दमयः ब्रह्म इति उपपादितः ।

अद्वैतमतानुसारेण आनन्दमयाधिकरणसारः

अद्वैतवादिभिः स्वसिद्धान्ते सकलवेदमीमांसाः जीवब्रह्मणोः ऐक्यं मुख्यतया

प्रतिपाद्यते इत्यङ्गीक्रियन्ते । ततश्च वेदार्थनिर्णायकसूत्राण्यपि तत्रैव तात्पर्यवन्ति इति मन्यन्ते । प्रकृतानन्दमयाधिकरणस्थसूत्राणाम् कथं जीवब्रह्मैक्यपरत्वं तैः साधितं इति किञ्चित् विचार्यते । अवयविरुपानन्दमयः जीवः आनन्दमयवाक्यस्थब्रह्मपुच्छंप्रतिष्ठा इति अवयवरूपब्रह्म आनन्दमयशब्देन लक्ष्यते । ब्रह्मपदस्यलक्षाण कुतः इति चेत् । ईक्षत्यधिकरणे समस्तवेदादिभिः परब्रह्म न वाच्यः किन्तु लक्ष्यः इत्यङ्गीकारात् । अत्र ब्रह्म आनन्दमयशब्देन लक्ष्यः । अत्राधिकरणे पुच्छतयोक्त ब्रह्म एव स्वप्राधान्येन प्रतिपादितः न तु आनन्दमयरूपजीवः । ब्रह्मशब्दाभ्यासात् ब्रह्मशब्दविषयकाभ्यासरूप-तात्पर्यलिंङ्गस्य विद्यमानात्वात् ।'असन्नेवसवति''असद्ब्रह्मेति वेदचेत्' इत्यादिश्रुतिभिः ब्रह्मणः एव केवलाभ्यास्यमानत्वात् ।

ननु आनन्दमयवाक्ये ब्रह्म आनन्दमयस्य अवयवत्वेन उक्तः । ततः कथं स एव स्वप्राधान्येन प्रतिपाद्यः इत्यतः उच्यते आनन्दमयः इत्यत्र मयट् प्रत्ययस्य विकारार्थः स्वीक्रियते । विकारार्थस्तु जीवे उपपद्यते । न तु ब्रह्मणि । यतः ब्रह्म निर्विकारः । तर्हि पुच्छशब्दस्य का गातिः चेत् पुच्छो नाम पुच्छवत् पुच्छप्रायम् इत्यङ्गीकुर्मः । अपि च आनन्दमयरूपजीवस्य लौकिकानन्दस्य आधारभूतः ब्रह्म इति 'प्रतिष्ठा' शब्देन कथ्यते । किञ्च 'इदंसर्वमसृजत्'इति जगत्सृष्ट्यादिकार्यहेतुत्वं ब्रह्मणः एव प्रतिपाद्यते । 'सत्यंज्ञानमनन्तंब्रह्म'इत्यादि मन्त्रवर्णप्रतिपाद्यं ब्रह्मेव । ब्रह्मणवाक्यपि 'ब्रह्मपुच्छंप्रतिष्ठा' इति ब्रह्मैव स्वप्राधान्येन प्रतिपाद्यते । अपि च आनन्दमयोहि जीवः न तु ब्रह्मपुच्छं इति वाक्यघटकं ब्रह्म । यतो हि 'सोऽकामयत्'इत्यादि जगत्स्राष्टृत्वदिकं आनन्दमयरूपजीवे अनिपपत्तेः । 'रसोवै सहः रसह्येवायंलब्ध्वानन्दीभवति' इति आनन्दमयब्रह्मणोः भेदव्यपदेशात् आनन्दमयः

जीवः । ननु युक्त्या आनन्दमयः ब्रह्म इति साधयिष्यामः इति चेत् न । विकारार्थक मयट् प्रत्ययस्यविद्यमानात्वात् विकारार्थस्य जीवे उपपन्नत्वात् । अतः युक्त्या आनन्दमयस्य ब्रह्मत्वं साधयितुं न शक्यते । ननु भेदव्यपदेशाच्च इत्यत्र सगुणनिर्गुणयोः भेदः प्रतिपादितश्चेत् न । निर्गुणं ब्रह्मैव अत्र प्रतिपाद्यः । तथा च 'सएको' इत्युपसंहारवक्यानुसारेण पुच्छब्रह्मैव निर्गुणब्रह्म इति उपपादितं । लोके पुच्छशब्दः अवयावार्थेन प्रसिद्धः । अतः अनन्दमयावयवरूपब्रह्म कथं स्वप्राधान्येन प्रतिपाद्यः इतिचेत् उच्यते पुच्छशब्दः न अवयववाचि किन्तु लाङ्गुलवाचि । अनन्दमयस्य लाङ्गुलं नास्ति तस्य गवादि लक्षणत्वात् । अतः पुच्छशब्दस्य मुख्यार्थत्वासंम्बवात् योग्यतवशाच्च आधारइत्यर्थे लक्षणा । अतः न अवयवत्व विरोधः । अपि च पुच्छब्रह्मविषये अभ्यासस्यविद्यमानत्वात् पुच्छब्रह्मैव स्वप्राधान्यतया आनन्दमय शब्देन लक्ष्यते । अतः आनन्दमयः जीवः तस्याधरत्वेन पुच्छब्रह्म स्वप्राधान्येन-प्रतिपाद्यते ।

विशिष्टाद्वैतमतानुसारेण आनन्दमायाधिकरणसारः

विशिष्टाद्वैतिभिः आनन्दमयः परमात्मा, विज्ञानमयः जीवः, अन्नमय, प्रणमय,मनोमयाः कोशाः इति अङ्गीक्रियन्ते । आनन्दमयाधिकरणे प्रकृतआनन्दमयः परमात्माएव कुतः श्चेत् । ब्रह्मशब्दाभ्यासात् । 'ते ये शतं प्रजापतेरानन्दाः स एको ब्रह्मण आनन्दाः' 'यतोवाचोनिवर्तन्ते अप्राप्यमनसा सह आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन' इत्यादि श्रुतौ श्रूयमाणब्रह्मशब्दाभ्यासात् आनन्दमयः परमात्मा

एव इति सिध्यति । 'स वा एषपुरुषोन्नरसमयः' इति विकारार्थक मयट्प्रत्यय-श्रवणात् आनन्दमयस्यऽपि विकारार्थत्वं प्रतीयते । अतः आनन्दमयः न परमात्मा इति चेत् । उच्यते । मयट् प्रत्ययस्य प्राचुर्यार्थमपि वक्तुं शक्यते । 'तस्माद्वाएतस्मादात्मन आकाश सम्भूतः' इत्यत्र प्रकृत आत्मशब्दात् अविकारित्वं ज्ञायते । आकाशकारणतया प्रतिपादितात्मा अविकारित्वात् । अतः मयटः विकारार्थकासम्भवात् प्राचुर्यार्थकः मयट् इति सिध्यति । तथा च आनन्दप्राचुर्यात् आनन्दमयः परब्रह्मैव इति ज्ञायते । अपि च 'एष ह्येवानन्दयाती'इति जीवान् प्रति आनन्दहेतुत्वं आनन्दमयस्य प्रतिपादकत्वात् आनन्दमयः परमात्मैव । 'सत्यंज्ञानमन्तंब्रह्म' 'तस्मद्वाएतस्मात्' इत्यादि मन्त्रवर्णोदितः परमात्मैव । ननु मन्त्रवर्णोदितः जीवः इति चेत् । न । 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मण विपश्चित' इति श्रुतौ ब्रह्मणः सर्वज्ञत्वं प्रतिपादितमस्ति । तदृशसर्वज्ञत्वं बद्धस्य जीवस्य,मुक्तस्यऽपि अविद्यमानत्वात् मन्त्रवर्णोदितः आनन्दमयः परब्रह्मैव । 'तस्मद्वाएतस्मात् विज्ञानमयात् अन्योऽन्तर आत्म आनन्दमयः' इत्यत्र विज्ञानमयरूप जीवात् भेदः आनन्दमयस्य व्यपदिश्यते । 'सोऽकामयत्' इत्यारभ्य 'इदसर्वमसजत्' इत्यन्तं कामदेव जगत्सर्गादिकं श्रवणात् आनन्दमयस्य जगत्सृष्ट्यादिकार्ये न अनुमानगम्यप्रकृत्यपेक्षा प्रतीयते । अतः कथं आनन्दमयः परमात्मा । 'रसोवै सहः रसह्येवायंलब्ध्वानन्दीभवति' इत्यस्मिन् आनन्दमये रसशब्दनिर्देशं प्रतिपाद्या अयं शब्दनिर्दिष्टस्य आनन्दमययोगमुक्तं । जीवस्ययल्लाभाय आनन्दमययोगः प्राप्तः तत् तस्मात् अन्यः इति सिद्धति । अतः

आनन्दमयः परमात्मा, विज्ञानमयः जीवः,अन्नमय,प्रणमय,मनोमयाः कोशाः इति सिद्धान्तितं ।

द्वैतमतानुसारेण आनन्दमयाधिकरणसारः

अत्राधिकरणे अन्नमयादिपञ्चकस्य विष्णुत्वे साध्ये ब्रह्मशब्दाभ्यासरूपहेतुः उदिमस्ति । विकारार्थकमयट् प्रत्ययान्तान्नमयादिशब्दवाच्यत्वं कथं निर्विकारस्य विष्णोः इत्याशङ्क्य मयटः प्रचुर्यार्थत्वोक्त्य तन्निराकरिष्यते । आनन्दमयस्यविष्णुत्वे लोकचेष्टकत्वरूपहेतुव्यपदेशात् लक्षणा उक्तं भवति । ननु तस्य विकारशब्दात् इत्येतदानन्तर्यं कथं इति चेत् । 'कोह्येवान्यात्कः प्राण्यत्' इति हेतुव्यपदेशाद- काशाख्यानन्दमयस्य पूर्णानन्दत्वे तत् संवादेनानन्दमयगतमयट्ः प्रचुर्यार्थत्वे सिद्धे तत्प्रायपठितान्नमयादिशब्दगतमयटमपि प्रचुर्यार्थत्वमङ्गीकार्यमिति पूर्वोक्तमयटोऽपि प्रचुर्यार्थत्वे एतत्सूत्रोक्तहेतुव्यपदेशस्य हेतुत्वात् । अन्नमयादिपश्चकस्य विष्णुत्वे अवयवत्वोक्ति विरोधपरिहाराय मन्त्रवर्णसमाख्यारुपहेतुक्तिः । स्वपक्षसादनान्तरं परपक्षप्रतिक्षेपः इति प्रतिज्ञापूर्वकं मान्त्रवर्णिकसूत्रसिद्धान्नमयादिरुपपश्चकनिष्ठायाः मोक्षजनकज्ञनविषयरूपहेतुः उक्तमस्ति । तेषामेवानन्दमयत्वनिरासे तेषां ततो भेदः प्रतिपादितं । ननु अस्य नेतरोऽनुपपत्तेः इत्येतदान्तर्यम् कथं इति चेत् । विरिश्चादीनामानन्दमयत्वाभवे तेषां ततो भेदव्यपदेशस्यहेतुत्वकथानात् पूर्वसूत्रक्तमोक्षजनकज्ञानविषयत्वस्य जीवब्रह्मणोरभेदेन ब्रह्मस्वरूपाभेदस्य विरिश्चादि जीवसमूहस्यऽपि सम्ववति इत्याङ्कानिरासहेतुत्वेन जीवब्रह्मणोः भेदव्यपदेशस्य

कथितमस्ति । अतएव सुधायां उपनिषदर्थानवबोधदित्यादिन जीवब्रह्मणोरभेदेन स्वरूपापेक्षयामोक्षजनकज्ञानविषयत्वस्यापि सम्भवः इत्याशङ्कनिरासहेतुत्वेन एतत् सूत्रक्तभेदव्यपदेशो व्याख्यातः ।

भेदव्यपदेशविरोधकाभेदसाधकानुमानस्याभ्यासोक्तिः। अनुपपत्तिभेदव्यपदेशाभ्यां पूर्वपक्ष्यभिप्रेतानां विरिञ्चदीनां सर्वेषामन्नमयादिपञ्चरूपकामगामित्वोक्तिः अनुव्याख्यानोक्तरीत्यानुपपत्या दूषितस्यापि शरीरादिकोशा एवान्नमयादिशब्दवाच्या इति पक्षस्य विशेषदूषणाभिधानेन निराकरणम्। भाष्यदिशा तु भेदव्यपदेशस्यानुमानविरोधाभावेऽपि तस्य सांसारिकभेदपरत्वेन पारमार्थिकाभेदविरोधित्वाभावात्, विरिञ्चादीनामानन्दमयत्वनिरासे कथं स हेतुरित्याशङ्कापरिहारार्थं तद्भेदस्य पारमार्थिकत्वसिध्यर्थं मोक्षेऽति तदुक्तिः।

अत्राद्वैतोक्तस्य विमर्शः

आनन्दमयः जीवः न ब्रह्म। कुतः श्रुतिविरोधात्। का सा श्रुतिः कथं विरोधः इति चेत् उच्यते 'तस्यप्रियमेव शिरः मोदोदक्षिणपक्षः, प्रमोद उत्तर पक्षः, आनन्दआत्मा, ब्रह्मपुच्छं प्रतिष्ठा' इति श्रुतौ ब्रह्म आनन्दमयस्य पुच्छतयोक्तं। अतः आनन्दमयः अवयवि ब्रह्म तु अवयवः इति श्रूयते। लोके अवयवावयविनोः भेदः अनुभवसिद्धः। अतः आनन्दमयः न ब्रह्म किन्तु जीवः। आनन्दमयरूपजीवस्य अधारः ब्रह्म इति श्रुत्या प्रतिपाद्यते। इति अद्वौतिनां अभिप्रायः।

अत्र विषये द्वैतीनां अभिप्रायः एवं विद्यते। आनन्दमयस्य ब्रह्मत्वे अवयव अवयविविरोधः उक्तः तत् परिहराय पुच्छति (१)किं अवयवस्य पूर्णत्वे अवयविनः पूर्णत्वं न सम्भवति इति (२) किं वा आनन्दमयस्य अवयविनः पूर्णत्वे तदवयवस्य पूर्णत्वाभावः (३) अथवा अवयवावयविनोः भेदात् अवयवः परमात्मत्वे अवयवि न परमात्मा भवति इत्यभिप्रायेणानन्दमयस्य ब्रह्मत्वं नङ्गीक्रियते। इति विकल्प्य सामादधति (१) आद्यस्यसमाधानमाहुः यदा अवयवः ब्रह्म स्यात् तदा अवयवि अनायासेन ब्रह्मता स्यात्। यतो हि अवयवापेक्षयावयविनः महत्वं लोके दृष्टं। अतः अवयवपूर्णत्वे अवयविनोऽपि पूर्णत्वं विज्ञायते। (२) द्वितीयं समाधत्ते-यथा अवयविनः मूलनारायणस्य पूर्णत्वं। तथा तदवयवकृष्णकेशावतारस्यकृष्णस्यऽपि पूर्णत्वं पुरुणेषु प्रसिद्धं। तथा च अवयविनः पूर्णत्वे अवयवस्यऽपि पूर्णत्वविषये किमपि बाधकं नास्ति। तत् केन प्रमाणात् अवगम्यते इति चेत् 'द्यावापृथिव्योरिदमन्तरंहि व्याप्तं त्वयैकेन दिशाश्चसर्वा' इति गीतोक्तश्लोके अवयवावतारस्यकृष्णस्य पूर्णत्वं ज्ञातुं शक्यते। ननु लोके अवयवस्य परिच्छिन्नत्वं दृष्टं। तत् कथं अवयवावतारस्य कृष्णस्याऽपि पूर्णत्वं वक्तुं शक्यते इत्यतः आह तत् परमेश्वरस्याघटितघटकतया सर्वत्राप्रतिबद्धया शक्त्या अन्यत्रादृष्टमपि घटते। (३) तृतीय विकल्पस्य समाधानं एवमहुः अत्राऽपि अघटितघटना समार्थ्यात् अवयवावयविनोः पूर्णत्वं उपपद्यते। अतः आनन्दमयः न जीवः किन्तु ब्रह्मैव इति द्वैतिनां अभिप्रायः।

अत्र विशिष्टाद्वैतमतोक्तस्य विमर्शः

विशिष्टाद्वैतवादिनः आनन्दमयः ब्रह्म अन्नमय-प्रणमय-मनोमयाः कोशाः

विज्ञानमयः जीवः इत्यभिप्रेयन्ति। विज्ञानमयः जीवः कथं ? इत्यतः आह - 'विज्ञानं यज्ञं तनुते कर्माणि तनुतेपि च' इत्यत्र यज्ञकर्तृत्वं विज्ञानमयस्य श्रूयते। तत् यज्ञकर्तृत्वं लोके जीवे प्रसिद्धः। अतएव उत्तरवाक्ये 'विज्ञानं च अविज्ञानं च' इति विज्ञानशब्देन तद्गुणं चेतनं वदति। अपि च अन्योन्तरात्माऽनन्दमयः इति श्रुत्यनुसारात् अन्यः अर्थात् जीवादन्यः अन्तरात्मा अर्थात् जीवान्तर्यामि आनन्दमयः इति आन्दमयः एव परमात्मा, विज्ञानयः जीवः इति समर्थ्यते। इति विशिष्टाद्वैतीनां अभिप्रायः।

अत्र विषये द्वैतीनां एवमभिप्रायः विद्यते। यथा आनन्दमयस्य ब्रह्मत्वविषये ब्रह्मशब्दाभ्यासस्य प्रमाणत्वेन उक्त्वा आनन्दमयस्य ब्रह्मत्वं साधयिष्यति भवद्भिः। तथा विज्ञामयेऽपि ब्रह्मशब्दाभ्यासस्य विद्यमानत्वात् विज्ञानमयोऽपि ब्रह्म एव इति उच्यते, 'विज्ञानं ब्रह्म चेद्वेद' 'विज्ञानं देवा सर्वे ब्रह्मज्येष्ठमुपासते' इत्यादि श्रुतिभिः ब्रह्मशब्दाभ्यासात्, सर्वदेवज्येष्ठोपसकत्वादि हेतुभिः विज्ञानमयः ब्रह्म इति विज्ञायते। यज्ञकर्तृत्वादिकं तु सर्वकर्तृत्वात् ब्रह्मणः उपपद्यते। 'यज्ञभृद्यज्ञकृत्' इत्यत्र 'यज्ञकृत्' इति यज्ञकर्तृत्वस्यापि ब्रह्मणः श्रुतत्वात्। अतः विज्ञानमयः ब्रह्म इति द्वैतिनां अभिप्रायः।

मङ्गळाचरणम्

श्रियःपत्ये नित्यागणितगुणमाणिक्यविशदप्रभाजालोल्लासोपहतसकलावद्यतसे ।
जगज्जन्मस्थेमप्रलयरचनाशीलवपुषे नमोअशेषाम्नामयस्मृतिहृदयदीप्ताय हरये ।।
येन प्रदुरभावि भूमिवलये व्यस्तारि गोसन्ततिः प्राबोधि श्रुतिपङ्कजं करुणया प्राकाशि तत्वं परम् ।
ध्वान्तं ध्वंसमनायि साधुनिकरश्चाकारि सन्मार्गगस्तेन व्यासदिवाकरेण सततं मा त्याजि मे मानसम् ।।
नारायणं निखिलपूर्णगुणैकदेहं निर्दोषमाप्यतममप्यखिलैः सुवाक्यैः ।
अस्योद्भवादिदमशेषविशेषतोपि वन्द्यं सदा प्रियतमं मम सन्नमामि ।।
अशेषवाक्जाड्यमलापहन्त्रि नवंनवं स्पष्टसुवाक्प्रदायिनि ।
ममेहजिह्वाग्रसुरङ्गनर्तकि भवप्रसन्नवदनेच मे श्रीः ।।
व्याप्तिर्यस्य निजे निजेन मनसा पक्षे सपक्षे स्तिथिर्व्यावृत्तिश्च विपक्षोतोथविषये सर्क्तिनैव बाधिते ।
नैवास्ति प्रतिपक्षयुक्तिरतुलं शुद्धं प्रमाणं स मे भूयात् तत्वविनिर्णयाय भगवान् आनन्दतीर्थो मुनिः ।।
भवति यदनुभावादेडमूकोपि वाग्मि जडमतिरपि जन्तुर्जायते प्राज्ञमौलिः ।
सकलवचनचेतोदेवता भारती सा मम वचसि निद्धत्तां सन्निधिं मानसे च ।।
नमोस्तु तात्विकादेवाः विष्णुभक्तिपरायणाः ।
धर्ममार्गे प्रेरयन्तु भवन्त सर्वएवहि ।

परिशीलितग्रन्थसूची

ग्रन्थनाम	ग्रन्थकर्तृ	प्रकाशनम्	स्थलम्	इस्वि
अनुव्याख्यानम्	श्री मध्वाचार्यः	व्यासमध्वसेवप्रतिष्ठानम्	बेङ्गुळूरु	१९९९
ब्रह्मसूत्रभाष्यम्	श्री मध्वाचार्यः	व्यासमध्वसेवप्रतिष्ठानम्	बेङ्गुळूरु	१९९९
श्रीमन्नायसुधा	श्रीजयतीर्थः	उत्तराधिमठम्	बेङ्गुळूरु	१९९७
उपनिषद्भाष्यम्	श्री मध्वाचार्यः	व्यासमध्वसेवप्रतिष्ठानम्	बेङ्गुळूरु	१९९९
तत्वप्रकाशिका	श्रीजयतीर्थः	श्री आर्,एस्, पञ्चमुखी इन्डोलाजिकल रीसेर्च सेंटर		१९९४
तात्पर्यचन्द्रिका	श्री व्यासराजः	द्वैतवेदान्त स्टेडीस अण्ड रीसर्च फोन्डेशन्	बेङ्गुळूरु	२०००
चन्द्रिकाप्रकाशः	श्रीराघवेन्द्रतीर्थः	द्वैतवेदान्त स्टेडीस अण्ड रीसर्च फोन्डेशन्	बेङ्गुळूरु	२०००
चन्द्रिकामण्डनम्	श्रीसत्यध्यानतीर्थः	द्वैतवेदान्त स्टेडीस अण्ड रीसर्च फोन्डेशन्	बेङ्गुळूरु	२००९
श्रीशरदागमः	श्रीमद्वासतत्वज्ञतीर्थः	श्रीगुरुशर्वाभौम संशोधनमंदिरम्	मन्त्रालयः	२०१६
तन्त्रदीपिका	श्रीराघवेन्द्रतीर्थः	श्रीगुरुशर्वाभौम संशोधनमंदिरम्	मन्त्रालयः	१९९८
न्यमुक्तवालि	श्रीराघवेन्द्रतीर्थः	श्रीगुरुशर्वाभौम संशोधनमंदिरम्	मन्त्रालयः	१९९८
ब्रह्मसूत्रशंङ्करभाष्यम्	श्रीशंङ्कराचार्यः	चौखम्बकृष्णदास अकादमी	वारणासि	२०१४
भामति	श्रीवाचस्पतिमाश्र	चौखम्बकृष्णदास अकादमी	वारणासि	२०१४
वेदान्तकल्पतरु	श्री अमलान्दसरस्वति	चौखम्बकृष्णदास अकादमी	वारणासि	२०१४

ग्रन्थनाम	ग्रन्थकर्तृ	प्रकाशनम्	स्थलम्	इस्वि
कलपतरुपरिमळ	श्री अप्पय्यदीक्षितः	चौखम्बकृष्णदास अकादमी	वारणासि	२०१४
भाष्यरत्नप्रभा	श्रीगोविन्दानन्दः	मोतिलाल् बनारसीदास्	पुणे	२०००
न्यायनिर्णय	श्रीमदानन्दगिरि	मोतिलाल् बनारसीदास्	पुणे	२०००
ब्रह्मसूत्र श्रीभाष्यं	श्रीभगवद्रामानुजाचार्य	सुदर्शनसेव श्रीउत्तनूरुवीरराघवाचार्यार् सेन्टिनेरि ट्रस्ट्	चेन्नई	२००२
वेदान्तसार	श्रीभगवद्रामानुजाचार्य	आद्यार् लैब्ररि रिसर्च अण्ड सेन्टर		१९७९
वेदान्तदीप	श्रीभगवद्रामानुजाचार्य	आद्यार् लैब्ररि रिसर्च अण्ड सेन्टर		१९७९
श्रुतप्रकाशिका	श्री सुदर्शनसूरि	श्रीनृसिंह ट्रस्ट्	चेन्नई	२००६
भावप्रकाशिका	श्रीरङ्गरामानुजमुनि	श्रीनृसिंह ट्रस्ट्	चेन्नई	२००६
तत्वमार्तण्डम्	सुरपुरं श्रीनिवासाचार्य	श्रीरङ्गंश्रीमदाण्डवनाश्रमः	चेन्नई	२००८
व्याकरणसिद्धान्तकौमुदि	भट्टोजिदीक्षितः	चौखम्ब सुरभारति प्रकाश	वारणासि	२०१५
शास्त्रदीपिका	श्रीपार्थसारथिमिश्र	कृष्मदास अकादमी	वारणासि	२०००
